# संस्कृत - विमर्शः

(राष्ट्रिय संस्कृत संस्थानस्य षाण्मासिकी शोध पत्रिका)

त्रयोदशः खण्डः    १९८५    प्रथमद्वितीयभागौ

प्रधान सम्पादकः
डा० मण्डन मिश्रः, निदेशकः

सम्पादकः
पं० श्री संपन्नारायणाचार्यः
न्याय, मीमांसा, वेदान्त विद्वान्, उपनिदेशकः

**राष्ट्रिय संस्कृत संस्थान**
राजा गार्डन, नई दिल्ली-२७

मूल्यम् पञ्चदशरूप्यकाणि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# संस्कृत - विमर्शः

(राष्ट्रिय संस्कृत संस्थानस्य षाण्मासिकी शोध पत्रिका)

त्रयोदशः खण्डः 	१९८५ 	प्रथमद्वितीयभागौ

प्रधान सम्पादकः

**डा० मण्डन मिश्रः, निदेशकः**

सम्पादकः

**पं० श्री संपन्नारायणाचार्यः**

न्याय, मीमांसा, वेदान्त विद्वान्, उपनिदेशकः

**राष्ट्रिय संस्कृत संस्थान**

राजा गार्डन, नई दिल्ली-२७

मूल्यम् पञ्चदशरूप्यकाणि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाशकः
निदेशकः
**राष्ट्रिय संस्कृत संस्थानम्**
जी. एन्-४, विशाल इन्क्लेव,
राजा गार्डन, दिल्ली-११००२७

मुद्रकः
अमर प्रिंटिंग प्रेस
८/२५, विजयनगर, दिल्ली-९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# विषय सूची

## संस्कृतम्


१. सुकन्याच्यवनम् — डॉ. यु० शंकर भट्टः — १

२, श्री इन्दिराशतकम् — गोपी कृष्ण व्यासः — ४१

३. त्रिधातुः त्रैधातवीयञ्च — नावल्पाक्क श्री देवनाथाचार्यः — ५०

४. माघ ज्योतिषम् — डॉ० आजाद मिश्रो 'मधुकरः' — ७१

५. उदयनाचार्यस्य ईश्वरविचार — लङ्नाथ मिश्रः — ८६

६. भारतराष्ट्रीय कांग्रेसइतिहासः राष्ट्रीयान्दोलनकथा १८५७-१८८५
के. कस्तूरि रंगाचार्य — १०१


## English


1. Sarvilaka-The Yaugandharayana of Sudraka — 1
**Dr. Sudharshan Kumar Sharma**

2, The Verse Kathamapi Krtapratyapattau an aesthetic Analysis — **Dr. M. V. Raman** — 31

3. Historical geography in Banabhatta
**Dr. Pranabananda Jash** — 48


CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्रीः

चाङ्गुलि सुब्बरायभट्टवीरचितं

# सुकन्या च्यवनम्

(एकाङ्करूपकम्)।

## सम्पादकः—डा. यु. शङ्कर भट्टः।

महदिदं प्रमोद स्थानं यदत्र प्रकाश्यमानं भासनाटकानुसारि महाकविकालिदासादिकृतिप्रभावितं सुकन्या च्यवन चरितचित्रणपरं सुकन्या च्यवन संज्ञकमेकाङ्करूपकमप्रकाशितं प्रकाशनार्हं च पौराणिकं किंचिद् दृश्यकाव्यमास्ते इति। दृश्यकाव्यमेतदद्यतनकेरलराज्यान्तर्गत कासरगोडुमण्डलस्य पेरडालग्रामे कीर्तिशेषैस्तत्रभवद्भिः चाङ्गुलि सुब्बराय भट्टमहोदयैः पाठशालादिषु वार्षिकोत्सवादिसमारोहेषु अभिनयानुकूलतया विलिखितं वर्तते। सहृदयहृदयावर्जकस्यास्य रूपकस्य रचयितुः परिचयः समासेनात्र प्रस्तूयते।

प्राक्तनमदरास् संस्थानस्य (Madras Presidency) दक्षिण-कन्नड (South Kanara) मण्डले कासरगोडूपमण्डले (Kasaragod Taluk) प्रथिते पेरडालग्रामे चाङ्गुलिगृहमधिवसतोः अत्रिगोत्रयोः ऋक्शाखानुसारिणोः कावेरी नारायण भट्टयोः कहडिभूसुरदम्पत्योः सुपुत्राः कीर्तिशेषास्तत्रभवन्तः सुब्बरायभट्टमहोदयाः दुर्मुखसंवत्सरे कुम्भमासे (सौरमानानुसारेण) द्वादशदिने इन्दुवासरे (२२-२-१८९७) समजायन्त।

स्वग्राम एव माध्यमिकस्तरपर्यन्तं शिक्षणमवाप्य, संस्कृताध्ययनोन्मुखाः श्रीमन्तो भट्टपादाः प्रथमतः तञ्जावूरु संस्कृतपाठशालां गत्वा, तत्र वर्षमेकं व्याकरणमधीत्य, ततो मैसूरुनगरं प्राप्य, तत्र महीशूर महाराज संस्कृतमहापाठशालायां साहित्य विद्यामधीत्य, मैसूरुनगरे प्रथितानां महामहोपाध्याय विरूपाक्षशास्त्रिणां सविधे वेदान्तशास्त्रमधिगम्य, 'साहित्यविद्वान्' उपाधि प्राप्य, मैसूरुमहाराजात् 'विद्याभूषण' विरुदमुपलभ्य स्वग्राममागच्छन्।

अधीतशास्त्राः श्रीमन्तो भट्टमहोदयाः प्रथमतः स्वग्रामाद्वीयसि बायारुग्रामे कंचित् कालं संस्कृतपाठशालायामेकस्यां मुख्याध्यापकपदमलमकुर्वन्। ततः स्वग्रामस्य नेदीयसि ग्रामे अगलपाडि श्रीमदन्नपूर्णेश्वरीसंस्कृतपाठशालायामध्यापकपदमधिष्ठाय द्वित्रान् वत्सरान् संस्कृतमध्याप्य, ततः स्वग्राममागत्य, तत्र नीर्चालप्रदेशे तदानीं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रथितायां महाजनसंस्कृतमहापाठशालायां षट्त्रिंशदुत्तर नवशताधिकैकसहस्रतमे (१९३६) क्रिस्तु वर्षे साहित्य-व्याख्यातृपदमध्यतिष्ठन् । तत्र मामिव परः शतान् संस्कृतविद्यार्थिनः व्याकरणालंकारादि शास्त्राण्यध्यापयन् ! सहृदयाः संगीत साहित्य विशारदाश्च ते चाङ्गुलि सुब्बरायशास्त्रिसंज्ञया समन्तात् प्रथामवाप्य षड्विंशति-वत्सरान् अध्यापनकार्यं यशस्विनया निरुह्य कालमहिम्ना नामावशेषभावं प्राप्नुवत्यां महाजनसंस्कृतमहापाठशालायां द्वाषष्ट्युत्तरनवशताधिकैकसहस्रतमे (१९६२) क्रिस्तुवर्षे साहित्य व्याख्यातृपदान्निवृत्ता अभवन् ।

महता परिश्रमेण जटिलानि शास्त्राण्यधीत्य, अध्याप्य, अपत्यसंपदा शिष्य-संपदा च परिपूर्णाः श्रीमन्तो भट्टमहोदयाः सार्धषट्षष्टि वत्सराणां यशस्वि जीवनं निरुह्य अनारोग्यपीडिताः सन्तः शोभकृत्संवत्सरे सिम्हमासे द्वादशदिने बुधवासरे (२८-८-१९६३) परः शतान् शिष्यान्, धर्मपत्नीं, पुत्रत्रयं, बन्धुवर्गम्, इहलोकं च विहाय यशः शरीराः समभवन् ।

श्रीमतां सुब्बराय भट्टमहाभागानामद्वितीयं कृतिरत्नं सुकन्या च्यवनमेकाङ्क-रूपकमेतदिदंप्रथमतया द्वापञ्चाशदुत्तरनवशताधिकैक सहस्रतमे (१९५२) क्रिस्तुवत्सरे महाजनसंस्कृतमहापाठशालायां शिक्षकैरभिनीतं सत् प्रेक्षावतां रसकवलमुपाकल्प-यदित्येतदनेन जनेन स्वयमनुभूतमास्ते । प्रसादगुणेन द्राक्षापाकेन चोपेतं रूपकमेतत् सहृदयानां हृदयमावर्जयतीत्यत्र नास्ति कापि संशीतिः । रूपकस्यास्य प्रकाशनं करणीयमित्यनेन संकल्पेन ग्रन्थकर्तृभिः श्रीमद्भिर्भट्टमहाभागैः ग्रन्थलेखनात् परं दशमे वत्सरे (६-२-१९६२ दिनाङ्के) प्रस्तावना काचिदुपकल्पिता विद्यते । किं तु दैवप्रातिकूल्येनाद्यावधि रूपकस्य प्रकाशनं न संपन्नमित्येतन्मनसः खेदमावहति ।

इत्थमप्रकाशितस्य प्रकाशनीयस्य चास्य पौराणिकैकाङ्करूपकस्य प्रकाशने उद्युक्ताय मह्यं ग्रन्थकर्तृभिः प्रकाशनाय स्वहस्ते समर्पितं हस्तलिखितं सुकन्या च्यवनं प्रदायानुगृहीतवद्भ्यः अस्मद्गुरुभ्यः भूतपूर्व महाजन संस्कृत महापाठशाला-प्राचार्येभ्यः प्रथितकीर्तिभ्यस्तत्रभवद्भ्यः खण्डिगे श्यामभट्टमहाशयेभ्यः, पितुः कृतिं प्रकाशयितुमनुमतिं प्रदत्तवद्भ्यामस्मद्गुरूणां कीर्तिशेषाणां चाङ्गुलि सुब्बरायभट्ट महाभागानां सुपुत्राभ्यां श्रीमद्भ्यां नारायणभट्ट श्रीनिवासभट्टाभ्यां च त्रिकरणपुरःसरं कृतज्ञतामावेदयामि ।

तदिदमस्मद्गुरु कृतिरत्नं सुकन्या च्यवनं विदुषां परितोषाय कल्पतामिति सर्वशक्तं प्रार्थये ।

—यु. शङ्कर भट्टः
केन्द्रीय संस्कृत विद्यापीठम्,
तिरुपतिः, आन्ध्र प्रदेश.

८-७-१९८४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ श्रीः ॥

# ॥ प्रस्तावना ॥

महाजन संस्कृत कलाशाला,
पेरडाल, नीर्चाल पोस्ट ।

आर्याः सहृदय धुरीणाः !

विदितमेव हि भवतां यदद्यत्वे सर्वत्र कलाशालादीनां वार्षिकाद्युत्सवसमारम्भेषु प्रायेण नाटकाभिनयनमपि कार्यक्रमेष्वन्यतमत्वेन निवेश्यत इति । तथैवास्यामपि कलाशालायां प्रतिवर्षं नवरात्र-वार्षिकोत्सवादि संदर्भेषु सभासदां मनोरञ्जनाय विद्यार्थिभिः शाकुन्तलादीनि नाटकानि, भासादिप्रणीतान्यन्यानि रूपकाणि चाभिनीय प्रदर्शितानि भवन्ति । बहोः कालादारम्य नैकावारमभिनीतानां तेषामेव पुनः पुनरनुवृत्त्या समुद्वेजितैः कैश्चन सहोद्योगिभिर्विद्यार्थिभिश्च कस्यापि नूतनदृश्यप्रबन्धस्य निर्माणे प्रोत्साह्य प्रेरितोऽहमस्यैकाङ्क[1]नाटकस्य विरचने मतिमकरवम् ,

कष्टं खलु नाटकरचनम् ! यदाह मुद्राराक्षसे विशाखदत्तः—"कर्ता वा नाटकानामिममनुभवति क्लेशमस्मद्विधो वा" (iv. 3) इति । "नाटकान्तं कवित्व" मित्याभाणकोऽपि नाटकं कवित्वस्य परमोऽवधिरिति ज्ञापयति । नैसर्गिक प्रतिभादित्रयं हि काव्यसंपत्तेर्निदानम् । निरुक्तसामग्रीरहितानामस्माकमेतादृशदृश्यप्रबन्धनिर्माणे प्रवृत्तिर्यद्यप्युपहासास्पदमेव भवेत् तथापि पूर्वैर्भासकालिदासादिभिर्महाकविभिर्दर्शितेन पथा संचरमाणस्य तेष्वचलनिष्ठावतश्च मे तेषामेवानुग्रहलाभो भवेदिति मनीषया भागवतपुराणे नवम स्कन्धे संक्षेपेण निबद्धं "सुकन्याचरित" कथाभागं (ix. III. 1-26) मूलत्वेनादायास्य दृश्यप्रबन्धस्य रचने प्रावर्तिषि ।

नाटके वीरशृङ्गारयोरन्यतरस्य प्राधान्येन निबन्धनमिष्यते । अस्मत्प्रतिज्ञाते सुकन्या चरिते वीररसस्य प्राधान्येन वर्णने प्रसक्तिर्नास्ति । वृद्धं मुनिं विभावत्वेनालम्ब्य युवत्याः नायिकाया अनुरागवर्णनं सुतरामनुचितमिति मुखसन्धौ बीजन्यास एव न घटते । अतः शृङ्गारस्यापि प्राधान्येन वर्णने नास्त्यौचित्यम् । किं च शाला वार्षिकाद्युत्सवेषु कार्यक्रमबाहुल्यान्नाटकाभिनयस्याल्प एव समय उपलभ्यते । तावत्यल्पसमये साङ्गनाटकरचने यत्नमनास्थायास्यैकाङ्कनाटकस्य कृतिरारब्धा :

---

टिप्पणी — १. एकाङ्कनाटकपदं भासनाटकचक्रपदवदौपचारिकं द्रष्टव्यम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संस्कृतनाटकेषु यं कमपि रागमाश्रित्य पठिताः श्लोकाः श्रोतॄणां मनो हर्षयन्ति; विपरीताश्चोद्वेजयन्ति। कलाशालासु शास्त्र साहित्य भागेष्वधीतिनः प्रायेण संगीत ज्ञानरहिता एव दृश्यन्ते। श्लोकबाहुल्य जटिलेषु संस्कृतरूपकेषु समग्रश्लोकपठनं तथाविधविद्यार्थिनां कष्ट साध्य मिति नाटकीयानि बहूनि पद्यानि गद्यरूपतया परिवर्त्य तैः पठ्यन्त इत्यनुभवसिद्धम्। परिस्थितिमिमां मनस्याधाय विद्यार्थिनामभिनयस्य कृते विरचिते रूपकेऽस्मिन् श्लोका विरलीकृताः।

प्रयोगकाले अभिनेतॄणां श्रोतॄणां च सुखेनार्थावबोधाय प्रबन्धेऽत्र बाहुल्येन प्रसादगुणस्य यथावसरमल्पशो माधुर्यौजसोश्चाधाने यत्नः कृतः।

यद्यप्यस्य कथासंनिवेशे यथावत् तत्तत्पात्रस्वभावनिरूपणादौ च सावधानेन मया प्रयत्नपूर्वकं प्रबन्धोऽयं निरमायि तथापि नात्र स्यात् क्वचिदपि स्खालित्यमिति वक्तुं न शक्नोमीत्येव निवेदये कृतधियां पुरतः। यतः सहजौ किलाबोधविभ्रमौ मानुषचित्तस्य। तदत्र ये केचन काव्यदोषाः यानि कानिचिदक्षरच्युति प्रभृतीनि स्युः स्खलितानि वा तानि सर्वाणि नः सुहृदः पठनसमये सम्यक् परिशील्य पत्र पृष्ठपङ्क्त्यादि सूचनपूर्वकं विलिख्य च यद्यस्मान् प्रति प्रेषयेयुस्तदातानि शुद्धीकृत्य ग्रन्थमिमं सफलीकर्तुं तथा प्रेषयितॄणां सुहृदां परः सहस्रं प्रणतीरुपदीकर्तुं च धृत मतिः प्रतीक्षे तेषां तथाविधं निरुपाधिकमुपकारम्। एवं दृश्यप्रबन्धोऽयं प्रयोगदर्शनेन जनतायाः अध्ययनाभिनयाभ्यां चाध्येतॄणां चेदल्पायाप्युपकाराय कल्पेत तदा कृतार्थेयं भारतीत्यलं पल्लवितेन॥

प्लवसंवत्सरस्य माघ शुक्लद्वितीयायाम्- } इति सज्जनविधेयः—
सि. हेच्. सुब्बराय भट्टः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# सुकन्याच्यवनम्—पात्राणि

(क) पुरुषपात्राणि—

| | |
|---|---|
| सूत्रधारः— | नाट्यप्रयोगस्य निदेशकः । |
| मारिषः— | सूत्रधार सहचरः । |
| राजा (शर्यातिः)— | सूर्यवंश्यो राजा, अयोध्याधिपतिः, सुकन्यायाः पिता । |
| वसिष्ठः— | शर्यातिः कुलगुरुः । |
| मन्त्री— | शर्यातेः सचिवः । |
| दौवारिकः (सुनन्दः)— | शर्यातिः द्वारपालकः, |
| सारथिः— | शर्यातिः रथवाहकः । |
| सेनापतिः— | शर्यातिः सेनाध्यक्षः । |
| पुरुषः— | शर्यातिः सैनिकेष्वन्यतमः । |
| सैनिकाः— | शर्यातिः तीर्थक्षेत्रपर्यटने सहचराः । |
| च्यवनः— | भृगुनन्दनो महर्षिः, सुकन्यायाः पतिः । |
| आहिताग्निः (शङ्करनारायण राधाकृष्ण आहिताग्निः)— | श्रोत्रियो ब्राह्मणः । |
| त्र्यम्बकभट्टाचार्यः— | श्राद्धभोजी ब्राह्मणः । |
| अश्विनौ— | स्वर्वैद्यावसोमपौ सूर्यपुत्रौ । |
| सोमदत्तः— | दरिद्रो ब्राह्मणः । |
| सभासदः (चत्वारः)— | वेदविदो ब्राह्मणाः । |
| महेन्द्रः— | देवराजः । |

(ख) स्त्रीपात्राणि

| | |
|---|---|
| देवी (सुशीला)— | शर्यातेः, पत्नी, सुकन्यायाः माता । |
| सुकन्या— | सुशीलायाः शर्यातेश्च पुत्री, च्यवनस्य पत्नी । |
| चन्द्रलेखा— | सुकन्यायाः सखी । |
| वासन्ती— | सुकन्यायाः सखी । |

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ श्रीः ॥

॥ श्रीगणेशाय नमः ॥

# ॥ सुकन्याच्यवनम् ॥

(नान्यन्ते प्रविशति सूत्रधारः)

सूत्रधारः—

त्रैलोक्य प्रथितोरु कीर्तिरनिशं संप्राप्तकामोऽपि यो ।
लोकानुग्रहकाङ्क्षया ननु तपश्चक्रेऽतिगाढं पुरा ।
कान्तं यं विषमाक्षमप्यतिमुदा संसेवते शैलजा ।
कल्याणं कुरुतात् सवोऽनवरतंसोमार्धधारी शिवः ॥ १ ॥

(नेपथ्याभिमुखमवलोक्य) मारिष, इतस्तावत् ।

(प्रविश्य)

मारिषः—भाव, अयमस्मि ।

सूत्र०—मारिष, विश्वव्यापिनोऽपि दक्षिणकर्णाटिकस्थपेर्डलिजनपदवासिनां सुकृतविशेषादिह भव्यदेवालये विहितसांनिध्यस्य चराचरगुरोरुदने[२]श्वरस्य यात्रायां नानादेशेभ्य आगत्य समवेतया विद्वज्जनपरिषदा समादिष्टोऽस्मि यदद्य रात्रौ महोत्सवानन्तरसमयं नवीनेनापि पौराणिकेन केनचिदेकाङ्क[३]नाटकेन विनोदयितव्या वयमिति । तद्वद, केन तादृशेन दृश्यप्रबन्धेनैनामाराधयामः ?

मारिषः— (स्मरणमभिनीय) भाव, किं गवेषणेन वहुना ? जानात्येव, भावो यदिदं पेर्डलाभिजनेन श्रीनारायणभट्टतनूजनुषा साहितीविदुषा महाजन संस्कृतकलाशालाप्राध्यापकेन सुब्बरायशास्त्रिणा प्रथितं सुकन्याच्यवनं नामैकाङ्क नाटकं महाजनानुरागं प्राप्य वरीवर्तीति ।

सूत्र — मारिष, सम्यक् स्मारितोऽस्मि । सुकन्याच्यवनं मयापि पर्यवेक्षितत् । संप्रति तदेव सामाजिकमनोरञ्जन क्षमं भवेदिति मन्ये ।

मारिषः— निरुपाधिकः सज्जनपरिश्रमः कुतो विफलीभवेत् ? तथा चानन्तरकरणीयं भाव आदिशतु ।

---

टिप्प०—२. पेरडालग्रामाधिदेवः (अभिषेकप्रियः) शिवः अत्र उदनेश्वरपदेनाभिधीयते ।

३. टिप्पणी-१.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सूत्र० तदिदानीं तत्तदुपाधिभी रसिकजनहृदयावर्जकम् ऋतुराजं वसन्तमधिकृत्य गायन् सामाजिकानां मनः प्रसादय । संप्रति हि—

**मलयगिरिसानुरूढः कम्पितमन्दारविटपिशाखान्तः ।**
**मन्दानिलसंदेहो वशिनामपि मानसं हरति ॥ २ ॥**

मारिषः— तथा । (गायति)

**किसलयित बालचूतेष्वङ्कुरमाभुज्य परभृता मुदिताः ।**
**गायन्ति कलनिनादं मदयन्ति च पान्थजगसार्थम् ॥ ३ ॥**

सूत्र०— मारिष, सुष्ठु गीतम् । गानसुधारस सरोनिमग्न इवाप्यायितान्तरङ्गः सर्वतोऽपि रङ्गः ।

[ नेपथ्ये ]

भो भो ! सामन्तनरपतयः !! किमिति भवन्तः सर्वेऽप्यत्र संमिलिताः प्रतिपालयथ ? किं ब्रूथ ? शर्यातिमहाराजसंदर्शनार्थमागता वयमिति । तर्हि, मा वृथैव कालं यापयत । महाराजस्त्विदानीमेवान्तःपुरगतो देव्या सह किमपि मन्त्रयमाणस्तिष्ठति । तदद्य गम्यताम् । स्वामिसंदर्शनस्य तु वः श्व एवावसरः ।

मारिषः— भाव, कोऽसौ कलकल इव शब्दः श्रूयते !

सूत्र०— महाराजदर्शनलालसा राजानः कञ्चुकिना तात्कालिकानवसरताप्रकाशनेन तत्तदावासस्थानं प्रति प्रेष्यन्त इति तर्कयामि । भवतु । साधयावस्तावदितः ॥

[ निष्क्रान्तौ ]

—प्रस्तावना—

## ॥ प्रथमं दृश्यम् ॥

[ततः प्रविशतोऽन्तः पुरगतौ राजा देवी च ।]

राजा—प्रिये, नवयौवना अपरिणीता कन्या खलु बन्धुजनस्याधिकं दुःखमावहति, विशेषतश्च मातापित्रोः । अस्मत्कुलनन्दनेयं सुकन्या विवाहयोग्यां कामपि दशामनुभवति । तथा हि—

**उज्जृम्भितस्तनयुगं हरिणेक्षणायाः**
**मूलं हठात् कषति बाहुलताद्वयस्य ।**
**मध्ये च सुन्दरवलित्रय भूषितेऽस्या-**
**स्तन्वी चकास्ति सुरुचा नवलोमराजिः ॥ ४ ॥**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

देवी— यथैवार्यपुत्रो भणति, वत्सलेयं परिणययोग्याद्य संवृत्ता ।

राजा— देवि ! सुताभ्युदयदर्शनसंतुष्टस्याप्यनुदिनं वरचिन्तातन्तुनिष्यूतस्य मे मनसो नास्ति क्षणमपि निर्वृतिः ।

देवी— नाथ ! एवमेतत् । मयाप्यहोरात्रमिममेव व्यतिकरं चिन्तयन्त्या कृच्छ्रेणैव कालकला नीयन्ते । तथापि विपदि धैर्यमवलम्ब्य यथायोग्यं यततामार्यपुत्रः ।

राजा— प्रिये ! धैर्यमेवावलम्ब्यते । किं तु यदा सुविहितोऽपि यत्नः सफलो न भवति तदा अधैर्यं तस्य स्थानमाक्रामति । अतस्त्वमेव कर्तव्यशेषमुपदिश । पतिकार्येषु सुगृहिणी खलु मन्त्रिपदमर्हति !

देवी— मन्त्रिशतपरिवृतस्य नाहमुपदेशसमर्था आर्यपुत्रस्य । इदं तु विज्ञापयामि—विवाहकर्मणि मातापितराविव दैवमपि कारणमिति वदन्ति सन्तः । अतः सुकन्याया दैवपर्यालोचनेन इतिकर्तव्यतानिर्धारणाय कुलगुरुर्वसिष्ठ एव शरणीकरणीय आर्यपुत्रेण ।

राजा—प्रिये ! प्रस्तावोचितमाह भवती । त्वया सहैव कुलगुरुं द्रष्टुमिच्छामि ।

देवी— यदार्यपुत्राय रोचते ।

राजा— (पुरोऽवलोक्य) अये ! नामग्रहण समकालमेव कुलगुरुरित एवाभिवर्तते ! तदस्मा अर्घ्यमानीयताम् ।

देवी— यदाज्ञापयत्यार्यपुत्रः [गत्वार्घ्यमानयति] [ततः प्रविशति वसिष्ठः]

राजा— गुरो ! अभिवादये ।

वसिष्ठः— उत्तरोत्तरं श्रेयोभिवृद्धिरस्तु ।

देवी— सुशीलाहमभिवादये ।

वसिष्ठः— आयुष्मती भव सुशीले

[उभावासन उपवेश्य, पादौ प्रक्षाल्य चार्घ्यमुपाहरतः]

राजा— (सहर्षमञ्जलिं बद्ध्वा) गुरो !

योगानुसाधित समस्त समीहितानां<br>
तत्त्वानुभूतिगलिताखिल संशयानाम् ।<br>
श्रेयस्करं दुरितहं च भवादृशानां<br>
संदर्शनं ननु पुराकृतपुण्यलभ्यम् ॥ ५ ॥

वसिष्ठः— राजन्, गतस्पृहैरप्यस्मादृशैर्वर्णाश्रमरक्षणे बद्धदीक्षाः शिष्यप्रमुखास्त्वादृशा राजर्षयः समये द्रष्टव्या एव । त्वमस्वस्थमना इति प्रणिधानेन ज्ञात्वा तव योगक्षेमावगमाय समागतोऽस्मि ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा— मनाक् पूर्वमेव गुरुसंदर्शनसुयोगमपेक्षितवानहम् । इदानीमतर्कितोपनतेन भवदागमनेन धन्य एवास्मि ।

वसिष्ठः— राजन्, अप्यनामयं सप्ताङ्ग संहितस्य ते ?

राजा— दैवमानुषापत्परिहर्तर्यथर्वनिधौ सदैव जाग्रति सद्गुरौ कुतो वास्माक मनामयेतराविर्भावः ?

वसिष्ठः— तत्किं विमनायमान इव लक्ष्यसे ?

राजा— गुरो ! सर्वस्यापि प्रायेणाकृतार्थता वैमनस्यमुत्पादयति ।

वसिष्ठः— धर्मेण प्रजाः पालयतो विशेषतश्चाङ्गिरसां सत्रे द्वितीयाहः कृत्यमुपदिष्टवतो ब्रह्मवादिनश्च ते निरवकाशा ह्यकृतार्थता ।

राजा— विवाहयोग्यां कन्यामनुरूपाय वराय दत्त्वा पितृऋणान्मुक्तः सुखी संपद्यते गुरुजनः ।

वसिष्ठः— एवमेतत् ।

राजा— मम तु वत्सायाः सुकन्यायाः प्राप्तेऽपि वयसि सदृशवरो न लब्ध इति विषयोऽयं हृदयगतः शङ्कुरिव संतनोति स्वान्ते नितान्तमन्तस्तापम् ।

वसिष्ठः— मिश्रकर्मजन्यं हि मनुष्यशरीरम् । तदभिमानिनस्तु संसारिणः कालकर्मवशात् सुखमिव कदाचिद्दुःखमप्यनुबध्नाति ।

राजा— तदर्थमेव भवरोगवैद्यो गुरुरिष्यते । अतः प्रकृते सुकन्यायाः दैवं पर्यालोच्य कर्तव्योपदेशेनानुगृह्णातु मां कुलगुरुरिति सप्रश्रयमभ्यर्थये ।

वसिष्ठः— (ध्यानं नाटयित्वा) राजन् ! मा भैषीः । अचिरादेव ते सुताया वरलाभयोगोऽस्ति । भाविदाम्पत्यसुखादिश्रेयः परम्परा तु केनापि प्रारब्धकर्मणा प्रतिबद्धापि पतिभक्तिपरायणायाःसुकन्यायाः शुश्रूषाद्भिना परितुष्टाद्भर्तुर्भविष्यति । सांप्रतिकप्रतिकूलदैवशमनाय दैवलिखितदुरक्षरमार्जकानि वाञ्छितार्थसिद्धिसाधनानि पुण्याश्रमतीर्थादीनि पुत्र्या सार्धं पर्यटन् तेषु संनिहितेभ्यः सिद्धमुनि जनेभ्यः शुभा आशिषः प्रतिगृहाण । एवं च सर्वत्रापि शुभपरिणामो भविष्यति ।

राजा— अचिरादेव पुत्र्या वरलाभयोगोऽस्तीत्यनेन समुच्छ्वसितमिव मे चेतसा ।

---

४. ब्राह्मणं कुशलं पृच्छेत् क्षत्रबन्धुमनामयम् ।
वैश्यं क्षेमं समागम्य शूद्रमारोग्यमेव च ॥
—भृगुसंहिता ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आयतौ तु दैवमेव प्रमाणम् । सकलसद्गुणालंकृतेयं सुकन्या भवितव्यं सर्वं सहेतेति दृढो मे विश्वासः ।

वसिष्ठः— सांसारिक सुखदुःखेषु नातिनिमग्नो मे शिष्य इति संतुष्यामि । कल्याण-मस्तु भवताम् । साधयाम्यहम् ।

राजा— (साञ्जलिबन्धं प्रणम्य) सर्वथाप्येवमेव दयनीयोऽहं शिष्यपरमाणुरितीदमेव मुहुः प्रार्थये ।

वसिष्ठः— तथैवास्तु । (निष्क्रान्तः)

राजा— देवि ! गुरुसंदर्शनेन भाविकार्यविगमनाल्लघूकृतभारमिवात्मानं पश्यामि । संप्रति प्रजाकार्यप्रत्यवेक्षणायास्थानगतो भवामि । त्वमपि निश्चिन्ता स्वीयं कर्म समाचर ।

देवी— यथाज्ञापयति नाथः । (निष्क्रान्ता)

राजा— कस्कोऽत्र भोः !

(प्रविश्य)

दौवारिकः—आज्ञापयतु देवः ।

राजा— सुनन्द ! आस्थानमण्डपमार्गमादेशय ।

दौवारिकः— इत इतो देवः ।

(निष्क्रान्तौ)

——

[ततः प्रविशत्यास्थानगतो राजा]

राजा— सुनन्द ! मद्वचनादमात्यमाकारय ।

दौवारिकः— यथाज्ञापयति देवः । (निष्क्रम्यामात्येन सह प्रविश्य) इत इमोऽमात्यः । (राजानं दृष्ट्वा) अमात्य, एष स्वामी प्रतिपालयति भवन्तम् । उपसर्पत्वमात्यः ।

मन्त्री— (उपसृत्य) विजयतां महाराजः ।

राजा— मन्त्रिन् ! इत आस्यताम् ।

मन्त्री— यदादिशति महाराजः । (आसन उपविशति)

राजा— मन्त्रिन् ! कथं दृष्टमद्यतनं प्रजाकार्यं भवता ?

मन्त्री— देव ! प्रजातन्त्रनिष्णातेन देवेन विनीतासु प्रजासु न कश्चिदपि

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

व्यतिक्रमो दृष्टः । सर्वा अपि यथार्हं धर्म्ये पथि संचरन्त्यः सुखमेधन्ते । मया तु तासामुत्कर्षं प्रत्येव यत्नः आस्थितः ।

राजा— राजकार्यधुरन्धरं मन्त्रिप्रवरं भवन्तमासाद्य महान्तमानन्दमनुभवामि ।

मन्त्री— सर्वत्रापि प्रभोः संभावनानुगुण एव निदानम् ।

राजा— अमात्यस्य क्रियाशक्तिरपि । भवतु । गुरोर्वसिष्ठस्य नियोगवशात् पुत्र्या सुकन्यया सह पुण्याश्रमसंदर्शनमिच्छामि । अस्मदागमनं यावत् प्रतिभावान् भवानेव प्रजाः परिपालयतु । श्वः प्रत्यूष एव प्रतिष्ठमानं मां परिमित परिवारः सेनापतिरनुगच्छतु ।

मन्त्री— यत् स्वामिने रोचते । (निष्क्रान्तः)

राजा— सुनन्द ! विश्रमितु मिच्छामि । अतो विश्रान्तिधाममार्गमादेशय ।

दौवारिकः— इत इतो देवः । (निष्क्रान्तौ)

[ततः प्रविशति राजा, देवी, सुकन्या च]

राजा— देवि ! गुरुनियोगो भवत्या ज्ञात एव । "शुभस्य शीघ्र"—मित्यद्यैव सुकन्यया सह पुण्याश्रम संदर्शनार्थं गच्छामि । तदनुमन्यतां मां देवी ।

देवी— आवश्यककार्येषु नाथस्य नैव प्रतिकूलवर्तिनी भवामि । किं तु युष्मद्विरहिताया ममात्र त्रुटिकापि घटिकायेतेति परं विषीदामि ।

राजा— प्रिये ! कातरभावं परित्यज्य धीरा भव । सर्वोऽप्येष परिवारवर्गस्त्वया प्रत्यवेक्षणीयः खलु ।

देवी— आर्यपुत्र ! गत्वा अविलम्बितमेव प्रत्यागच्छत । प्रवसद्भ्यो वः पथि देवाः स्वस्ति क्रियासुः ।

राजा— सुनन्द ! मद्वचनात् सारथिं ब्रूहि-अस्मत्प्रस्थानाय सोपकरणं रथमुपकल्पयेति ।

दौवारिकः— यदाज्ञापयति देवः । (निष्क्रान्तः)

सारथिः— (प्रविश्य) आयुष्मन् ! संनद्धो रथः । सेनापतिरपि परिमितपरिवारो बहिः प्रतिपालयति ।

राजा— क्षणादागत एव । गच्छ, सेनापतिमपि ज्ञापय ।

सारथिः— यथादिशत्यायुष्मान् । (निष्क्रान्तः)

राजा— (सुकन्यां प्रति) वत्से ! जननीमापृच्छ्यानुगच्छमाम् ।

सुकन्या— (मातुरन्तिकमुपेत्य) अम्ब ! चरणयोस्ते नतास्मि । तातमनुव्रजन्तीं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

…मां समुचिताभिराशीर्भिरभिवर्धय ।

देवी— वत्से ! पुण्याश्रमसमुदाचारेष्वप्रमत्ता भव। विनोदपरवशा कदापि बाल चापलं मा कार्षीः । गच्छ, शिवास्ते सन्तु पन्थानः ।

(सर्वे निष्क्रान्ताः)

## ॥ द्वितीयं दृश्यम् ॥

[ततः प्रविशति रथेन राजा, सेनापतिः, सुकन्या, सख्यादिपरिवारश्च ।]

राजा— सेनापते ! नगरान्निर्गतैरस्माभिरेतदन्तं क्रमेणात्रि-भरद्वाज-गौतम-कश्यपादि मुनिवर्याणां पावनान् पुण्याश्रमान् यात्राविषयीकृत्य, महामहिमशालिभ्यस्तेभ्यः शुभा आशिषः प्रतिगृहीताः । संप्रति च्यवनाश्रमपरिसरं प्राप्ताः स्मः । च्यवनस्तु सुदीर्घे समाधौ वर्तत इति प्रतीतिः । श्व उषः काले तमप्यभिवन्द्य राजधानीं प्रति गन्तव्यम् । अद्यत्वत्रैव पान्थनिवासेषु किंचिद्विश्रम्य, ततो वनविहारेणात्मानं विनोदयामः।

सेनापतिः— मृगयाविनोदार्थमपि त्वरते मे मनः ।

राजा— भद्र ! सेनापते ! मृगया हि सत्त्वक्षोभमुत्पादयति । आश्रम संनिकृष्टे च वर्तामिहे । कदाचिदनया महर्षेः समाधिभङ्गः स्यादपि । अतो भवद्वचनं नानुमोदनार्हम् ।

सेनापतिः— यथा स्वामी मन्यते। यावता कालेनाहं पथिकनिवासेषु विश्रान्ति सौकर्यं संपादयामि तावत्कालमत्रैव वृक्षच्छाये निषीदतु भवान् ।

राजा— युज्यते ।

(निष्क्रान्तः सेनापतिः)

[ततः प्रविशति सखीभ्यां चन्द्रलेखा वासन्तीभ्यां सह सुकन्या]

सुकन्या— सख्यौ ! दिष्टचा वर्धामहे । यदद्यतनदिबसस्तातेन विहारार्थमुपकल्पित इति ज्ञायते । वयमपि पुष्पावचयं करवामहे ।

सख्यौ— सखि ! रोचते आवाभ्यामपि प्रमोदकरं तत्कर्म ।

सुकन्या— तदागच्छतम् । तातेनानुमता यास्यामः ।

सख्यौ— साधूक्तं प्रियसख्या ।

(निर्गताः)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वाः— (राज्ञः समीपं गत्वा) तात ! वन्दामहे ।

राजा— कल्याणमस्तु । वत्साः क्व प्रस्थिता यूयम् ?

सर्वाः— (समन्दस्मितम्) (अवचनास्तूष्णीं तिष्ठन्ति)

राजा— किमिति तूष्णीं स्थीयते ? वदत निश्शङ्कम् ।

सर्वाः— तातेन विहारार्थं कल्पिते दिनेऽस्मिन् वयं पुष्पावचयमिच्छामः ।

राजा— इदमेव वा महत् कार्यम् ? यथेष्ठं गम्यताम् । कुसुमान्यविचित्यात्मानं मण्डयत । दृष्ट्वा वयमपि संतुष्यामः ।

सुकन्या— सखि, चन्द्रलेखे ! गच्छाग्रतः । त्वमपि वासन्ति, पश्चादायाहि ।

(सर्वा निष्क्रान्ताः)

[ततः प्रविशन्ति पुष्पावचयं नाटयन्ती सुकन्या, सख्यौ च]

सुकन्या— सखि, चन्द्रलेखे ! पश्य वनश्रियो रमणीयताम् । अरण्यतरवोऽप्येते प्रचुरतरकुसुम संपत्योपहसन्तीवोद्यानपादपान् ।

चन्द्रलेखा—आश्रमसमीपवर्तिनः खल्वेते । स्वायत्तसिद्धीनां मुनीनां प्रभावादेतेष्वीदृशी फलकुसुम समृद्धिरिति तर्कयामि ।

सुकन्या— साधु तर्कितं प्रियसख्या । (पुष्पाण्यवचिन्वती कुसुमितं बालतरुं वीक्ष्य), हला वासन्ति ! पुरो विलोकय । बालतरुगत एष कुसुमप्रकरो हस्तग्राह्यो दृश्यते ।

चन्द्रलेखा— सखि, वासन्ति ! सत्स्वपि कुसुमितेषु वृक्षान्तरेषु सुकन्याया मनो हस्तग्राहमेव लक्षीकरोति !

वासन्ती— अबला खल्वेषा ! हस्तग्राह्याभिवाञ्छायां किमनौचित्यम् ?

सुकन्या— वक्रोक्तिनिपुणे अयि चन्द्रलेखे ! प्रथमं कस्याः पुष्पभाजनं परिपूर्णं भवतीति विलोकयामः ।

चन्द्रलेखा— मनस्यपरिपूर्णा सखी कथमिव पुष्पभाजनं पूरयेदिति महान् मे संशयः ।

सुकन्या— आरब्धं पुनः किमपि । अलं परिहासेन । प्रकृतमनुसरामः । त्वरितं माला अपि विरचनीयाः ।

[तदेव कर्मारभन्ते]

चन्द्रलेखा— (चूततरुप्रसृतां कुसुमितां लतां विलोकयन्ती) सुकन्ये ! इमां वासन्तीं पश्य ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुकन्या— सदा वासन्तीं पश्याम्येव । क इदानीं विशेषस्तस्याम् ?

चन्द्रलेखा— नेयं वासन्ती सखी । किं तु वासन्ती लता ।

सुकन्या— ननु कीदृशी सा ?

चन्द्रलेखा— इहागत्य विलोकय कीदृशीति ।

सुकन्या— (लतासमीपं गत्वा विलोकयन्ती सस्मितम्) न कोऽप्यत्र विशेषो दृश्यते । रमणीय कुसुमस्तबकावनतेयं वासन्तीलता चूतेन संगता ।

चन्द्रलेखा— येन संगता स तु वयसि परिणत इत्यस्ति विशेषः ।

सुकन्या— तथापि जातिश्रेष्ठः स इति कथंचित् समाधातव्यम् ।

चन्द्रलेखा— सखि ! वयसि तावदनयोर्महदन्तरमित्येव शोच्यतास्याः ।

सुकन्या— चन्द्रलेखे ! असदृशघटनाप्रचुरायां विधातृसृष्टावेकगुणहानौ नावज्ञा कार्या मनीषिभिः । यदयं यवीयसापि कारस्करेण शाखोटकेन वा तरुणा संगताभविष्यत् तदैव शोच्याभविष्यत् ।

वासन्ती— सखि ! ईदृशेन गुणदोषविवेचननैपुण्येन त्वमर्थतोऽपि सुकन्या खल्वसि ।

सुकन्या— न हि, न हि । असाधारणेन कन्याभावेनेति भण ।

वासन्ती— (कर्णौ पिधाय) शान्तं पापम् । भाविश्रेयः परिपन्थिनि ! ईदृशं वचनं पुनरपि मा वद । अलमेतावद्भिः कुसुमैः । संप्रति माला विरचयामः ।

चन्द्रलेखा— सुकन्ये ! त्वं तावदिदानीं विशिष्टरचनया स्वयं-वरमालामेकां रचय यावता चावाभ्यां तिसृणामप्यस्माकं कृते मालात्रयं निर्मीयते ।

सुकन्या— (कृतककोपं दर्शयन्ती) हला, जानामि ते श्लिष्टं वचः । सदैव किमपि मनसिकृत्य मां परिहसथः । युवामेव माला रचयतम् । अपर्याप्तानि पुष्पाण्यहमन्यत आनेष्यामि । (इत्युक्त्वा निर्गता)

सख्यौ— कथं गतैव ! सखि, आवयोः परिहासविजल्पिते मा कुप्य । कुसुमानि संगृह्याविलम्बितमेवागच्छ । (मालारचनामारभेते)

सुकन्या— (पुष्पाण्यवचिन्वाना क्रमेण च्यवनाश्रमं प्रविश्य, तत्र लतापरिवेष्टितं किमपि वल्मीकमभि वीक्ष्य च) अये ! लतापरिवेष्टितं वल्मीकमिदम् !! अन्तरतश्च निर्गतं प्रकाशद्वयं खद्योतद्वयमिव भासते । वल्मीके सर्पैः संचितानि रत्नानि सन्तीति किं वदन्ती । अपीदं रत्नयुगलं स्यात् ? कुतूहलोपहृतं मे मनो निश्चयं न गच्छति । भवतु । परीक्षिष्ये । (कुशसूचीमुत्पाट्य चान्तराविध्यसंस्रवद्रुधिरं दृष्ट्वा भीता सती) अहह ! अनर्थः कोऽपि ! निर्वाणे ज्योतिषी, क्षतजं च खलु स्रवति !

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अज्ञानात् किमाचरितं मया ! निपुणं विलोकयन्ती) हा ! रत्नबुद्ध्या समाधिस्थस्य कस्यचिच्छ्रमधनस्य नयने मया कुशसूच्या संविद्धे । अबलाहं किं नु करोमि ! निरुपद्रवं शान्तं च मुनिं हिंसित्वा कृतघोर-पापाया मे क इदानीं शरणं भवेत् ? हा अम्ब ! पुत्रीस्नेहपरवशया पापशङ्किन्या त्वया गदितमासीत्—"पुण्याश्रमसमुदाचारेष्वप्रमत्ता भवे"ति । मन्दभागिन्या मया तदपि विस्मृत्य महदपराद्धम् । तात इम मुदन्तमुपश्रुत्य किं वा प्रतिपत्स्यत इति न जाने । अश्रुपातमात्र प्रतीकारपराभ्यां सखीभ्यां वा किं प्रयोजनम् ? हा ! विधे !! सुकन्यया ते किमपकृतम् ? येनेदृशेऽतिनिन्दिते कर्मणि मां प्रेरितवानसि ? हा ! सर्वथा हतास्मि मन्दभाग्या !! (मूर्च्छति) (मन्दं संज्ञां लब्ध्वा धैर्य-मास्थाय) गतशोचनेन किं प्रयोजनम् ? "आत्मकृतानां हि दोषाणां फलं नियतमात्मनैवानुभवितव्य" मिति किल श्रूयते । यद्भावि तद्-भवतु । निगूढं सर्वमपि सहे । अलमिदानीं पुष्पैः । गच्छामि तावदितः । (सख्योः समीपं गता) सख्यौ ! श्रान्तास्मि अनेन पुष्पावचयकर्मणा । तत् पान्थनिवासमेव गच्छाम । अवशिष्टं मालारचनमपि तत्रैव करवामहे ।

सख्यौ—यथा प्रियसखी मन्यते । (निष्क्रान्ताः)

[ततः प्रविशति राजा सेनापतिश्च]

राजा—आर्य सेनापते ! राजधानीत्यागादद्यावधिकोऽनल्पोऽप्ययं कालविभागः सत्संगमेन, प्रकृतिसौन्दर्यदर्शनवनविहारादिना चास्माकं लघुरिवाप-क्रान्तः । अद्य तु समाधिस्थस्य महर्षे र्भार्गवस्य वन्दनमात्रेण विहित-विधेयैरस्माभिर्नगरं प्रति गन्तव्यम् । अतः प्रस्थानसंनाहं कारयतु भवान् ।

सेनापतिः—यद्देव आज्ञापयति । (निष्क्रान्तः)

[प्रविश्यापटीक्षेपेण]

पुरुषः—प्रभो ! अत्याहितमत्याहितम् !!

राजा—किमिति अत्याहितम् ? त्वरितं कथय ।

पुरुषः—देव ! किं कथयामि ! अस्मत्सैनिका अभूतपूर्वां कष्टां कामपि दशा-मनु भवन्ति !! श्रुत्वा देवः प्रमाणम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—यदि तेषामत्रागमने शक्तिः शीघ्रमाकारय तान् ।

पुरुषः—यदाज्ञापयति देवः। (निष्क्रम्य, सैनिकैः सह प्रविश्य) देव ! त इमे संनिहिताः।

सैनिकाः—प्रभो ! वञ्चिताः स्मः । भृशमुद्विग्नाः स्मः। आचारप्रतिपत्तावप्य-शक्ता- भवामः ।

राजा—तिष्ठतु तावदाचारः। किमुद्वेगकारणम् ? वदत।

सैनिकाः—ह्यः किल वने विहृत्यागता वयमाकस्मिकेन चित्तभ्रमेण पीडिता इदानीं जीवितसंदेहं प्राप्ताः स्मः।

राजा—(स्वगतम्) व्यतिकरोऽयं महान्तं विस्मयं जनयति। विना प्रबलं कारणमस्मत्परिजनस्य न कामपि हानिमुत्पश्यामि। भवतु। विवेचमामि। (प्रकाशम्) भो सैनिकाः ! वनविहारपरवशैर्युष्माभिर्न खलु महर्षेर्भार्गवस्याभद्रमाचेष्टितम् ? यदनेन रूपेण व्यक्तीभवति।

सैनिकाः—नैव प्रभो। अबुद्ध्यापि न स्खलितं तस्मिन् महात्मनि।

राजा—तत्किं प्रशान्तपावनेऽस्मिन् च्यवनाश्रमपरिसरेऽयमीदृश उत्पातः ?

सुकन्या—(भयवेपमाना पितरमासाद्य) तात ! किं वदामि ? वक्तुं जिह्वापि मे न चलति। (सन्नकण्ठम्) विधिवञ्चितया प्रमादात् किंचदकार्यं कृतं मया।

राजा—किं तदकार्यम् ? शीघ्रं वद।

सुकन्या—तात ! सुमनोवचयक्रमेण पूर्वेद्युराश्रमं प्रविष्टया तत्र वल्मीकगते द्वे ज्योतिषी मया अजानत्या कुशसूच्या संविद्धे।

राजा—अहह ! कोऽयं वज्रघातः ! (सदैन्यम्) सुकन्ये ! अक्षन्तव्य एवायमपराधः कृतस्त्वया। समाधिनिष्ठं महाप्रभावं शान्तं च भार्गवमुनिं पीडयन्त्या किं वा न कृतं स्यात् ? मन्ये चोत्सन्नप्राय एवायं मनोर्वंश इति। यतः—

**हिंसा हि प्राणि सामान्ये पापं संजनयिष्यति।**
**महात्मनि प्रयुक्ता तु सान्वयं पातयेन्नरम्॥ ६॥**

किमिदानीं करिष्ये ? (विचिन्त्य) नान्या गतिर्विद्यते। सर्वथा गच्छामि तमेव शरणम्। क्रान्तदर्शी स महर्षिः प्रमाद घटितमिमम-पराधं क्षमेतापि। (निष्क्रम्य पुत्र्या सह च्यवनाश्रमं गतो भयशोक-लज्जाशङ्काकुलमानसो विनयावनतो भूत्वा)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भगवन् भार्गवमुने !

स्थित्या यस्य विधूतपाप्मन इमे लोकाः पवित्रीकृताः
वर्धन्ते च निरामयं सुकृतिनो यस्य प्रसादाच्चिरम् ।
यस्यायं निखिलप्रवृत्तिनिचयो निःस्वार्थमेवोदित-
स्तस्मै ते भृगुनन्दनाय मुनये भक्त्या नमस्कुर्महे ॥ ७ ॥

किं च,

भगवन्नविजानत्या सुतया यत्कृतं त्वयि ।
आगस्तत् प्रथमं मत्वा शरण्यः क्षन्तुमर्हसि ॥ ८ ॥

(सुकन्यां प्रति) वत्से ! अभिवादयस्व भगवन्तम् ।

सुकन्या—कृतापराधापि पश्चात्तापभूयिष्ठा भगवन्तमभिवादये ।

च्यवनः—किं नामधेया तव पुत्री ?

राजा—भयशोकाकुलस्वान्तयानया अभिवादनवाक्ये नामनिर्देशो विस्मृतः । एनां 'सुकन्ये' त्याह्वयन्ति ।

च्यवनः—(साभिलाषमात्मगतम्) अहह ! नामापि कीदृङ्मधुरम् ! (प्रकाशम्) सुकन्ये ! असदृशं भर्तारमाप्नुहि ।

राजा—(सोच्छ्वासम्) मुने ! धर्मप्रवर्तकस्य तातचरणस्य मनोरेकान्तरेयं सकलसद्गुणालंकृता च । तथापि किं वदामि ? सर्वेऽपि वर्णा मध्या कवलीकृताः !

च्यवनः—(प्रेमकषायितमानसः सुकन्याभिमुखो भूत्वा) आकृतिरेव कथयत्यस्याः शीलम् । अपराधोऽप्यनया न बुद्धिपूर्वकं कृत इत्यकिंचित्करः क्षमार्हश्च ।

राजा—भगवन् ! तथापि भवतः समाधिभङ्गेन सह शरीरपीडामजनयत् किलेति सुतरां शोचामि ।

च्यवनः—मानव ! मा शुचः । नयनवेधोऽपि तदानीं निर्विकल्पसमाधिस्थे मयि न तावतीं वेदनां चकार । किं तु···

राजा—मुने ! विवक्षितांशपूरणेनानुगृह्णातु मां भगवान् ।

च्यवनः—उत्तान एवायमंशः । तथापि कथ्यते । सकृद्योगाच्चलितमानसस्य मे संप्रति समाधिर्दुश्शक एव । चरमे वयसि वर्तमानोऽहं निस्सहाय एव कथंकारं यावज्जीवं लोकयात्रां निर्वहेयमिति विचार एव मां पर्याकुलयति ।

राजा—(स्वगतम्) कथं महर्षिरेनां परिणेतुमिच्छति ! अस्याकारेङ्गितादयः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रायेणान्तर्गतं भावमवगमयन्ति । कथं महात्मनेऽपि परिणतवयसे जीवितनिर्विशेषामेकमात्रपुत्रीमिमां प्रतिपाद्य सुखी भवेयम् ? कथं वा क्षान्तापराधं महर्षिमभिमतानाचरणेन पुनरपि कोपयित्वा स्वं कुलं चाधः पातयेयम् ? सर्वथा "उभयतस्पाशा रज्जु" न्याये पर्याकुलोऽस्मि । भवतु । अस्याभिमतं स्पष्टं तावज्ज्ञास्यामि । (प्रकाशम्) भगवन् ! अलं विचारेण । तत्रभवतः स्वास्थ्यमेवास्माकं स्वास्थ्यम् । अतो ब्रवीमि । भवतः शुश्रूषार्थं सोपकरणं भृत्यजनमवस्थाप्य, निरन्तरं युष्मत्सुखजीवनं यथा भवेत् तथा कामपि व्यवस्थां कारयामि ।

च्यवनः—राजन् ! सततं प्रजापालनपरवशेन राज्यसुखमनुभवता भवतारण्यौकसो मम भृतिमात्र तत्परेण भृत्यवर्गेण निरन्तरं यथामनीषितं शुश्रूषा कार्येतेति कथं नाम विश्वसितुं शक्यम् ?

राजा—अन्तः पुरजनं वा प्रेष्य ततः सेवां कारयामि ।

च्यवनः—अत्राप्यौचित्यं न पश्यामि ।

राजा—भगवन् ! किं बहुनोक्तेन ?

राज्यं वित्तं जीवितं च सुतां वापि ततोऽधिकाम् ।
आराधनाय भवतस्त्यजतो नास्ति मे व्यथा ॥९॥

अतो भवन्मुखादेव परिचर्याप्रकारं श्रोतुमिच्छामि ।

च्यवनः—राजन् ! यदृच्छालाभसंतुष्टानामस्माकं राज्यधनाद्यकिंचित्करम् । आवश्यकधर्माचरणे लोकरूढिमनुसृत्य सहायविशेषस्त्वपेक्ष्यत एव ।

राजा—(स्वगतम्) बह्वनुयोगेन किमिति मुनिमायासयामि ? अयं सुकन्यां परिणेतुमिच्छतीति स्पष्टमेव । सामान्यस्यापि जनस्य वैरस्यमुत्पादयतानेन पिष्टपेषणेनालम् । 'त्यजेदेकं[५] कुलस्यार्थे—"इति साधूनां पन्थाः । तमेवानुसरामि । ईश्वरेच्छा हि बलवती । (प्रकाशम्) भगवन् ! तया च सहायविशेषाकाङ्क्षया प्रकृते सुकन्यामेव विषयीकरोति भवानिति तर्कयितुमवकाशोऽस्ति ।

च्यवनः—साधु तर्कितं भवता । इतरथास्यामवस्थायां धार्मिक जीवनमस्माकं दुष्करमेव भवेत् ।

---

टिप्प०—५. त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ —इति सूक्तिः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—(स्वगतम्) का गतिः ? (प्रकाशम्) मुने ! धन्योऽस्मि । इदानीमेव राजधानीं गत्वा, देव्या, बन्धुजनैः, मन्त्रिभिश्च सह समालोच्य भवदभीप्सितं संपादयितुं यतिष्ये । इदानीं साधयामो वयम् ।

च्यवनः—कल्याणमस्तु । गम्यताम् ।

(मुनिं प्रणम्य निष्क्रान्तौ)

## ॥ तृतीयं दृश्यम् ॥

[ ततः प्रविशत्याहिताग्निनामा विप्रः ]

आहिताग्निः—अहो नु भो मुदो मुदः ! (सोद्गारम्) शर्यातिमहाराजतनयायाः सुकन्याया विवाहसमारम्भार्थमागतस्य मे दिनचतुष्टयमगात् । अद्यावधि खाद्य भोज्यपेयादिना परिपूरितस्य म उदरस्य विश्रान्तिरेव नास्ति । संप्रति चलनेऽप्यस्म्यसमर्थः । गृहिण्याः शुक्रवासरव्रताङ्गपूजास्ति मे गृहे । तत्र च कुङ्कुमार्चने ललितासहस्रनामपठनायावश्यं संनिधातव्यमिति गृहात् प्रस्थानसमय एव तया विज्ञापितः । अद्य तु शुक्रवासरः ! अतोऽवश्यं क्लृप्तसमये मया तत्र संनिधातव्यम् । यावच्छक्ति त्वरितं गच्छामि । (दृष्ट्वा) कोऽसावभिमुखमागच्छति ? (निरूप्य) अये ! प्रथममेवैकविप्रदर्शनम् ! मन्येऽद्य मे गृहिणी सहस्रनामार्चनस्य मामेव विषयीकुर्यादिति ।

त्र्यम्बकभट्टाचार्यः—(प्रविश्य दृष्ट्वा च) कोऽपि किमपि मन्त्रयमाण इतोमुख एवागच्छति । आकारेण तावदयं महोदरपीडित इव दृश्यते । भवतु । आभाषयाम्येनम् । (उपसृत्य) नमो नमः ।

आहि०—सन्तु नमसां शतानि ।

त्र्यम्बक०—स्वामिन् ! को भवान् ? कुत्र चागतः ? क्व वा प्रस्थितः ?

आहि०—(सकोपम्) अरे ! गृहगमनव्यग्रचित्तस्य प्रश्नानां धारावृष्टिः ! कथमुत्तरयितुं शक्नुयाम् ?

त्र्यम्बक०—महाशय ! मा कुप्य । परिचयार्थं पृष्टोऽसि ।

आहि०—तथा वा ! शंकरनारायण-राधाकृष्ण-आहिताग्निरिति मे नामधेयम् । जनास्तु माम् "आहिताग्नि"रित्येवाह्वयन्ति । शर्यातिमहाराजकन्याविवाहार्थमागतः संप्रति गृहं प्रति प्रस्थितः । भवतां नामधेयम् ?

त्र्यम्बक—श्री त्र्यम्बक भट्टाचार्य इति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

आहि—त्र्यम्बक इति वा ? त्रियम्बक इति वा ?

त्र्यम्बक—उभयथापि साधु। ऋग्वेदे-'त्रियम्बकं यजामहे' इति श्रूयते। यजुर्वेदे-'त्र्यम्बकं यजामहे' इत्येवास्ति। लोके च 'त्रियम्बकं संयमिनं ददर्श' इति कालिदासेन, 'भवच्छिदस्त्र्यम्बक पादपांसवः' इति भट्टबाणेन चोपवर्णितम्।

आहि—क्व च प्रस्थितोऽसि ?

त्र्यम्बक—च्यवनाश्रमं प्रति।

आहि—अहो ! वधूगृहप्रवेशकार्यार्थमिति भाति।

त्र्यम्बक—आम्।

आहि—अहो ! नियतिः !! अभीष्टदुहं कल्पतरुं विहाय, दुःसहनिम्बपादपानुसरणमिव प्रभूतान्नापानदक्षिणादिसंपन्ने महाराजनिर्व्यूढे विवाह समारम्भेऽप्संनिधाय नीवारपिष्टकन्दमूलफलाशनार्थं च्यवनाश्रमं प्रति ते धावनम् !

त्र्यम्बक—आहिताग्ने ! अगत्या विवाहसमयेऽनागतोऽस्मि। तस्मिन् दिने प्रातिवेशिकस्य कुप्पाभट्टस्य गृहे श्राद्धभोजनाय निमन्त्रित आसम्। श्राद्धनिमन्त्रणमप्रत्याख्येयमिति हि धर्मशास्त्रसिद्धान्तः। गतं न शोचति प्राज्ञः। मदीये राशिभविष्ये च सप्ताहेऽस्मिन् लाभयोग एव नास्ति। तदस्तु। कुतूहलोपहतः पृच्छामि—विवाहदिने महाराजेन दक्षिणादिना ब्राह्मणाः कथं संभाविता इति।

आहि—तदपि कथयामि, शृण। भूरिदक्षिणा सर्वत्र रौप्य मुद्रिका परिमिता। पण्डितेभ्यो वस्त्रयुगलेन सह द्वे द्वे मुद्रे वितीर्णे। श्रोत्रियेभ्यः पुनः प्रत्येकं सार्धत्रयं मुद्राणां, गौरिका च। आहिताग्निभ्यस्तु प्रतिव्यक्ति पीताम्बरेण सह चतस्रो मुद्राः। सोमयाजिभ्यस्तु प्रत्येकं पञ्च मुद्राः राङ्कवयुग्मं च। कविवर्येभ्यश्च रत्नखचिताङ्गुलीयकेन सह षण्मुद्राः। आस्थानविदुषां तु रौप्यपञ्चपात्रेण द्वादशमुद्राः राङ्कवयुग्मं च। आस्थानमहाविदुषां पुना राङ्कवयुगलं सोद्धरणीकं रौप्यपञ्चपात्रं पञ्चदशमुद्राश्च प्रतिपादिताः। सुवासिनीनां च प्रत्येकं सकञ्चुकं क्षौमयुगलं मङ्गलालंकरणानि च। श्रीफल ताम्बुलपुष्पगुच्छादि सर्वत्र समानम्।

त्र्यम्बक—उदारहृदयः खलु राजर्षिः शर्यातिः।

आहि—कः संदेहः ? यद्ययं विवाहमहोत्सवो राजधान्यामभविष्यत्, द्विसहस्र-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

जिह्वोऽपि तद्वैभवं वर्णयितुं प्रभुर्नभविष्यत् ।

त्र्यम्बक—एवमेव । आहिताग्ने ! त्वं तटस्थ इति मत्वा पृच्छामि-लोके सर्वेऽपि वदन्ति-"वधूवरयोर्मिथ आनुरूप्यं नास्ती"ति । अपि सत्यम् ?

आहि—आनुरूप्यस्य गन्धोऽपि नास्ति । तयोर्व्यतिकरोऽर्कनवमालिकयो र्व्यतिकर इव सामरस्यशून्यः । किं च, विवाहवेदिमारूढा राजपुत्री परमकोपनस्य मुनेरस्य वलीपलितं विग्रहं, विकलं दृष्टिपातं चाभिवीक्ष्य नितान्तमुद्विग्नेति महिलालोकोऽशब्दं मन्त्रयते स्म ।

त्र्यम्बक—आहिताग्ने ! ईदृशेन नीरसेन जरन्मुनिना सह हंसतूलिकातल्पशयनार्हैव सुवदना कथं दिनान्यतिवाहयेत् ?

आहि—कथमिति तस्या नियतिरेव प्रष्टव्या ।

त्र्यम्बक—आहिताग्ने ! वाटपरिक्षेप एवाधुना सस्यनाशाय प्रवृत्तः ! अन्यथा धर्मशास्त्र निबन्धुर्मनोः पुत्रः कृतवि इव महाराजः शर्यातिः कथं नाम विषमविवाहेऽस्मिन् मतिं व्यधत्त ?

आहि—आचार्य महाशय ! तक्रानयनार्थं गतस्य महिषीमूल्यज्ञाने प्रवृत्तिरिव भोजनार्थं गतानां स विचारोऽस्माकं न शोभते । महत्सु दोषापादनम् आत्मदोषोद्घाटनमेव भवति ।

त्र्यम्बक—सत्यम् । प्रबलं कारणं विना महतामप्यात्महानिकरमीदृशं कार्यं न संभाव्यमिति पृष्टोऽसि ।

आहि—भवतु । यावज्ज्ञातं कथयामि-वनविहारे पुष्पावचयप्रसङ्गेन च्यवनाश्रमं प्रविष्टया सकन्यया वल्मीकावृतः समाधिस्थितो मुनिरजानत्या नेत्रयोर्विद्धः किल । ततश्च समुत्पन्नेनैश्वरक्षोभेण शर्यातिः परिजनेषु राजधान्यां चोत्पातजानर्थपरम्परा समजनीति तस्य मुनेर्मनः प्रसादनार्थमिदं प्रायश्चित्तमिति राजनिकटवर्ति जनमुखाच्छ्रुतम् ।

त्र्यम्बक—क्वेदानीं महाराजः ?

आहि—राजपुत्र्या विवाहमङ्गलार्थमेव च्यवनाश्रमं निकषा राजशिल्पिभिर्मायालोक इव त्रिचतुरैरेवाहोभिः समुन्नामिता काचिदुपराजधानी । महाराज इदानीं तत्रैवास्ते । श्वोभूतेऽह्नि च्यवनाश्रमे सुताया नूतनवधूगृहप्रवेशकार्यं समाप्य सपरिवारः स्वविषयं प्रतिगच्छति । अलमिदानीं प्रसक्तानुप्रसक्तकथया । साधयाम्यहम् ।

त्र्यम्बक—लोकवार्ताज्ञानकुतूहलेन गमनोपरोधकारिणो मेऽपराधं क्षमस्व ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

माहि—ज्ञातवस्तुकथने का दरिद्रता ? अनिवार्यकार्येणगृहं जिगमिषता मया काल विलम्बः परिहरणीय इति पूर्वं किंचिदुदासितम् । अस्तु पुनर्दर्शनम् । नमस्ते ।

त्र्यम्बक—नमो नमः ।

(निष्क्रान्तौ)

[ततः प्रविशत्याश्रम संमार्जन कार्यव्यापृता सुकन्या]

सुकन्या——(सनिश्वासम्) वयसि परिणते मानवानां भवत्यनवस्थितं मनः । एकत्र क्रोधलोभमात्सर्याणामभिभवः ! अन्यत्राध्यात्मिकादितापत्रय-पराभवः ! सदैव मिथ्यामोहाभिलाषभ्रमितमनोभिरेतैरुदासीना अपि निर्विद्यन्ते । किमुत सन्ततमनुवर्तनशीलाः ! मम प्राणनाथस्यापीयमेव दशा !

आत्मनालंकृतस्य परिशुद्धवंशस्य ख्यातिं परिरक्षततातेन क्षान्तापराध-स्येङ्गितमस्य विज्ञाय महर्षिरिति गौरवात् निज जीवित सर्वस्वमहमेतस्मै प्रतिपादिता । स्त्रीणां पतिरेव परं दैवतमिति ज्ञातवत्या मयापि पतिदेवमनु भक्त्या शुश्रूषमाणया बहूनि दिनान्यतिवाहितानि । इयतापि कालेन प्राणनाथः सकृदपि मयि न प्रसन्नः । मां प्रीतिपूर्वक-मेकमपि वचो न भाषते स्म । परमकोपने वाचंयमेऽस्मिन् लघ्वपि स्खलनमनर्थावहमिति मन्यमाना यथा कालं कर्तव्यमस्य पूरयन्ती च्छायेवानुवर्ते । मुहुर्विप्रकृतापि नाथस्य प्रतीपं न गच्छामि । अथापि मिथ्याकारणमापाद्य सर्वदा मयि कुप्यत्येव ।

एवं निरन्तरं भर्तुः प्रातिकूल्येन तीव्रतरदुःखसंतप्ता अपीमे प्राणाः वज्रकीलिता इवाधन्याया मे हृदयान्न निर्गच्छन्ति ! बलादुद्बन्धना-दिनापि यदि मरिष्यामि ततश्चापि को लाभः ? आत्मघातिनां नरकवास एव गतिरिति वदन्ति शास्त्राणि । सर्वथा दुःखानुभवायैव सुकन्यया जन्म स्वीकृतम् ! (रोदिति)

च्यवनः—(प्रविश्य) सुकन्ये ! रे सुकन्ये !!

सुकन्या—(ससंभ्रममुत्थाय) नाथ ! इयमस्म्याज्ञाकरी ।

च्यवनः—उपवेष्टुमिच्छामि ।

सुकन्या—(हस्ते गृहीत्वा आसन उपवेश्य पादौ संवाहयति)

च्यवनः—रे ! त्वं न पादसंवाहनार्थमाहूता । अद्य सविशेषं पञ्चायतनपूजा निर्वर्तनीया । तत्र च नामार्जनकृते पञ्चसहस्रं पुष्पाणि, सहस्रं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

बिल्वपत्राणि चापेक्षितानि । यावदहं मज्जनविधिं समाप्य प्रतिनिवर्ते तावत्तान्यवचित्य समानय । मा विलम्बं कुरु ।

सुकन्या—नाथ ! अल्पीयसा कालेन— – (इत्यर्धोक्ते)

च्यवनः—(निरुध्य) वाचाले ! किं प्रतिवदसि माम् ? नियच्छ वाचम् । निर्दिष्ट-संख्याकानि कुसुमान्यादाय मुहूर्ता देवागन्तव्यम् । गच्छ ।

सुकन्या—का गतिः ! (गत्वा पुष्पाण्यवचिन्वती) हा ! विधे !! ईदृशमपि कष्ट-मनुभावयसि ! कथमल्पीयसा कालेन तावन्ति पुष्पाण्यवचिनोमि ! न शतम् ! नापि सहस्रम् !! किं तु पञ्च सहस्राणि !!! अपराणि बिल्वपत्राणि च ! कथं नामैकाकिन्या तावती संख्या पूर्येत ! (पुष्प भाजनं विलोक्य) एतावता कालेन कुसुमानां सहस्रमपि न संपन्नम् ! समयस्त्ववसित एव । किमिदानीं करोमि ? कथं वापर्याप्तान्येतानि गृहीत्वा सुलभकोपस्य भर्तुरन्तिकं गमिष्यामि ? हा अम्ब ! हा तात ! हा वनदेवताः !!! (मूर्च्छति) (आकाशे)

साध्वीमणे ! सुकन्ये !! मा शुचः । भुवोऽलंकरणमसि । तद्गृहाणेमानि सबिल्वपत्राणि कुसुमानि यावन्त्यपेक्षितानि ।

(पतद्भिः कुसुमैः पुष्पभाजनं पूर्णं भवति)

सुकन्या—(मन्दं संज्ञां नाटयित्वा) को न खलु मां सुमनोवितरणेनानुगृह्णाति ! (समन्ताद्विलोक्य) न कश्चिदत्र ! किमेष स्वप्नः ! आहोस्विन्मति-भ्रमः !! (पुष्पभाजनं विलोकयन्ती) उभयमपि न संभावनार्हम् । अन्यथा कथं मे पुष्पभाजनं परिपूर्णं भवेत् ? (विचिन्त्य) नूनं वनेऽस्मिन् मम शोचनीयामवस्थां विलोक्य वनदेवताभिरयमनुग्रहः कृतः स्यादिति तर्कयामि । भवतु । कृतकृत्यास्मि । त्वरितमेवैतानि पूजाकुसुमानि भर्त्रे उपहरामि । (निष्क्रम्य च्यवनं प्राप्य) नाथ, गृह्यन्तामिमानि ' (समर्पयति)

च्यवनः—(गृहीत्वा) प्रिये ! संतुष्टोऽस्मि । सुकन्ये ! देवतानिवेदनार्थं वनात् स्वादूनि फलान्याहर ।

सुकन्या—यदाज्ञापयति भर्ता । (निष्क्रान्ता)

च्यवनः—आश्चर्यम् ! यदल्पीयसा कालेन कयाचिदबलया पञ्चसहस्राधिक पुष्पाण्यवचित्यानीतानीति । मानुषीमात्रस्य न सुलभोऽयमर्थः । (विचिन्त्य) नूनं वनगतायाः पतिव्रतायाः अस्याः करुणां दशामालोक्य वनदेवताभिरयमनुग्रहः कृतः स्यात् । भवतु । संप्रति संकल्पितां पूजां

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परिसमाप्यानन्तरकरणीये मनः प्रवर्तयामि । (निष्क्रान्तः)

[ततः प्रविशति कृतदेवतार्चन विधिश्चिन्तयमानावस्थश्च्यवनः]

च्यवनः—

**वाञ्छन् मर्त्यो यदिह दयितां विन्दते देवदत्तां**
**भर्तुर्देनंदिनसमुदये या निदानं समक्षम् ।**
**तस्मादेनां प्रियसहचरीं यत्नतश्चारुशीलां**
**रक्षेन्नित्यं श्रियमिव गृही मानितां प्रीतिदानैः ॥ १० ॥**

अहो ! निर्घृणता मम !! यत् पतिपरायणां सुकन्यां तृणवत् पर्यभावयम् !!! अनवरतं परमया भक्त्या मां सेवमानयापि तया कीदृशं सुखमन्वभावि ? को वानया मनोरथैकदेशोऽप्यासादितः ? पामरादपि सेवानुरूपं फलं लभन्तेऽनुजीविनः । किं पुनर्विवेकिनो बन्धुजनः । राजसद्मनि सुखोपलालितां गृहलक्ष्मीमिमामग्निपरीक्षयानया दुर्विषहदुःख-पारावार पातयता मया महदन्याय्यमाचरितम् ! (विमृश्य) पश्चात्ताप-युतोऽपि सुकन्यां कथं नाम परितुष्टां मानयिष्यामि ! भर्तुः सौन्दर्यमेव हि स्त्रीभिः प्रथममाकाङ्क्ष्यते ! यतः—

**भर्तुः सौभाग्यमिच्छन्ति प्रथमं वामलोचनाः ।**
**आस्था न तावती ह्यासां वसनाभरणादिषु ॥ ११ ॥**

एवं स्थिते गतवयसि वीतरागे च मयि रूपवती नवयुवतिरियं तत्त्वतः कथमनुरज्येत ? (विचिन्त्य) भवतु । अश्विनोः साहाय्येन युवतिजन-मनोहरं वयोरूपमात्मनि संपाद्यास्या मनोरथपूरणे यतिष्ये । तथा च प्रथममश्विनौ स्मरामि । (तथा करोति)

[ततः प्रविशत आश्विनेयौ]

अश्विनौ—महर्षिणा च्यवनेन स्मरणपूर्वकमाकारितौ स्वः । परार्थप्रचुरा हि प्रायशो महात्मनां प्रवृत्तिः । कीदृशं प्रयोजनमपेक्षितं स्यादावाभ्यां भगवता ? अथवा अलं विचारेण । यतः—

**दैवज्ञस्य समर्थस्य भिषजो दृष्टकर्मणः ।**
**सदाऽऽवश्यकतास्तीह दैवपौरुषयोरिव ॥ १२ ॥**

भवतु । त्वरितं गच्छावः । (गच्छन्तौ च्यवनं दूरतो दृष्ट्वा) अये ! महर्षिरत्र प्रतिपालयतीव नौ । य एषः—

**आश्रितेषु समातन्वन् वृद्धिं ज्ञानायुषोः पराम् ।**
**ज्ञानेन वयसा चापि वृद्धोऽयं भाति भार्गवः ॥ १३ ॥**

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(उपगम्य) मुनिवर्य ! अश्विनावावाम् अभिवादयावहे ।

च्यवनः—मनोरथसिद्धिर्भूयात् । इहासन उपविशतम् । (सुकन्यां प्रति) सुकन्ये ! स्ववैंद्याविमौ यथोचितं सभाजय ।

सुकन्या—यदाज्ञापयति भर्ता । (अर्घ्यादिना सत्कृत्य) भगवन्तौ ! अभिवादये ।

अश्विनौ—(हस्तमुद्यम्य) भर्तुरभिमता भव !

च्यवनः—अपि निष्प्रत्यूहा वां वैद्यवृत्तिः ?

अश्विनौ—युष्मत्प्रसादात् निष्प्रत्यूहैव ।

च्यवनः—निरीहस्यापि मे युवयोर्विज्ञाप्यं किंचिदस्ति ।

अश्विनौ—आज्ञापयतु भगवान् । स्वयं निरीहस्यापि परानुजिघृक्षा महती खलु ।

च्यवनः—किमन्यत् !

**ग्रहं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः ।**
**क्रियतां मे वयोरूपं प्रमदानां यदीप्सितम् ॥ १४ ॥**

अश्विनौ—परार्थप्रचुरोऽयमनुग्रहः !

च्यवनः—कीदृशोऽयमनुग्रहः ? येन निर्जरसां वैद्यैः सजरसोऽपि मर्त्यधर्माणश्चिकित्सितव्या इति ।

अश्विनौ—भगवन् ! मा मैवम् । अकामहताः श्रोत्रिया निर्जरेभ्योऽपि महत्तरा इति किल श्रूयते ।

च्यवनः—सत्यम् । किं त्वात्मनि वयोरूपं कामयमानस्य कथमकामहतत्वं युज्यते ?

अश्विनौ—सा च कामना न स्वार्थे, अपि तु सुकन्यार्थं इति नैष दोषः ।

च्यवनः—जाया समीहिताचरणमप्यात्मनः कामाय खलु ।

अश्विनौ—प्रकृतिसिद्धोऽयमर्थः संसारिणाम् । ज्ञानिनस्तु संसारे वर्तमाना अपि लोकसंग्रहार्थमेव कर्म कुर्वन्तः फलाभिसन्धिवर्जितेन तेनाम्भःस्थपद्मपलाशवन्नोपलिप्यन्ते ।

च्यवनः—अलमिदानीमप्रकृतेन । प्रकृतमनुसरामः ।

अश्विनौ—तेन हि लेह्यमिदं प्राश्य, पुरो दृश्यमाने सिद्धरसपूर्णे ह्रदे निमज्जतु भवान् ।

च्यवनः—तथैवास्तु । नयतं मां तत्रभवन्तौ ।

अश्विनौ—एवमस्तु [illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

[गत्वा त्रयोऽपि ह्रदे निमग्नाः क्षणादिव दिव्यसुन्दरविग्रहाः साश्चर्यं पश्यन्त्याः सुकन्यायाः पुरतः प्रादुर्भवन्ति]

सुकन्या—(स्वागतम्) अहो ! तुल्यवयोरूपरमणीयमेषां दर्शनम् !

पुरुषेष्वन्यतमः—भद्रे ! रूपवतीषु ललनामणिषु त्वं कनिष्ठिकामधितिष्ठसि ! प्रथिताश्च हृदयहारिणस्ते गुणाः !! चकितहरिण लोलविलोकनया भवत्या यदृच्छयापि यस्मिन् कटाक्षः पात्यते स एव लोके धन्यतमः !!! यद्यात्मनः प्रियहितविवेचन समर्थासि 'परिगृहाणास्मासु ते सहचरम् ।

सुकन्या—(निर्वर्ण्य, स्वगतम्) अये ! त्रयोऽप्येते समानवयोरूपभूषणाः सूर्यवर्चसश्च !! निपुणं विलोकमानापि नैषामण्वपि वैलक्षण्यं पश्यामि !!! केन पुनरुपायेन मे भर्तारं प्रत्यभिजानीयाम् !

त्रयोऽपि—सुन्दरि ! अक्षन्तव्य इदानीं कालातिपातः । वृण्वस्मासु त्रिषु ते भर्तारम् ।

सुकन्या—कष्टम् ! स्वर संयोगोऽप्येषां समान एव । हा ! वञ्चितास्मि खलु नासत्याभ्याम् । किमिदानीं कर्तुमुचितम् ? पतिबुद्धया यदान्यो व्रियेत तदा न केवलं मे सतीत्वहानिः, किं तु प्रथितकुलद्वयेऽपि कलङ्क आहितो भवेत् । यदि तूष्णीं स्थीयेत, तदापि पत्युरनभिज्ञताप्रयुक्तमयशो मां बाधेत । किमत्र प्रतिविधेयम् ! (अनुस्मृत्य) शरणागतवत्सला देवता जातिरिति श्रूयते । अत एतावश्विनावेव शरणं व्रजामि । (उपसृत्य) देवकुमारौ ! शरणागतास्मि । यदि मे सतीत्वशुद्धौ वां दृढतरो विश्वासः तदा सारूप्यवञ्चितायै मे पतिभिक्षां दत्तम् । एष एव मे परमो विभवः ।

अश्विनौ—(सकरुणम्) सुकन्ये ! साध्वीमणिरसि । कल्याणि ! मा शुचः । दिव्यं ते चक्षुर्वितरावः । पश्य । प्रतिगृहाण संप्रति ते प्राणवल्लभम् ।

सुकन्या—(प्रत्यभिज्ञाय) अहह ! कीदृशमिदं मे नयनकौतुकम् !! सुचिराभीप्सित भागधेयाभ्युपगमेऽपि स्त्रीजनसुलभेयं लज्जा मां बाधते खलु ।

अश्विनौ—मुने ! पश्य, सुकन्येयं लज्जयानतमुखी तिष्ठति । अतो भवानेव संभावयत्वेनाम् । साधयावस्तावत् ।

च्यवनः—ईश्वरौ ! अनेन वां महोपकारेण सुकृतलभ्यं जन्मान्तरं प्राप्त इव नितरां संतुष्टोऽस्मि । कृतज्ञश्चास्मि । युवयोः प्रतिश्रुत यज्ञभागंचिरादेव साधयितुं यतिष्ये ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अश्विनौ—अनुगृहीतौ स्वः। (मुनिं प्रणम्य निष्क्रान्तौ)

च्यवनः—(सुकन्यां हस्ते गृहीत्वा) प्रिये ! अनितरसाधारण्या त्वदीय सेवया संतुष्टेन मया तव कृते नूतनं यौवनमासादितम्। वदेदानीं कीदृशं प्रियाया मनोरथं संपाद्य कृती भवेयम् ?

सुकन्या—नाथ ! नास्त्यपरो मे मनोरथः। यावज्जीवमिह, जन्मान्तरे च श्रेयस्करं भवदीयपादसेवनमेकमेव याचे।

च्यवनः—न दुर्लभमिदं पतिदेवतायास्तव।

सुकन्या—धन्यास्मि। किं त्वेतावन्तं कालं मयि विरस इवासीन्नाथ इति परं शोचामि।

च्यवनः—प्रिये !

सुतनु ! मनसो गाढासक्तां शुचं त्यज सुव्रते
किमपि समभूत् कर्मारब्धं तदा तव शोकदम्।
जगति यदिदं जीवन्मुक्तोऽप्यलं न त्वेद्बला-
दनुभवपथाद् दूरीकर्तुं किमत्र बहूक्तिभिः॥ १५॥

सुकन्या—भवतु। विलम्बेनापि प्राणनाथो मयि सुप्रसन्न इति कृतज्ञास्मि।

च्यवनः—निर्वृतो भवामि।

सुकण्या—नाथ ! अनेनाकस्मिकेन कुशलोदन्तेन ते श्वशुरावपि श्रुतविषयी कर्तव्यौ।

च्यवनः—पुण्याश्रम रक्षणे जागरूकस्य ते पितुरचिरादेव सर्वं विदितं भवेत्। संप्रति पर्णशालामेव गच्छावः।

सुकन्या—यद्रोचते प्रियाय।

(निष्क्रान्तौ)

## ॥ चतुर्थं दृश्यम् ॥

[ततः प्रविशति शर्यातिः।]

राजा—अपत्यं नाम जायापत्योः प्रेमसर्वस्वमानन्दग्रन्थिरित्याख्यायते सद्भिः। गुणवति वंशालंकरणे चास्मिन् स्त्रीपुमानिति नैषास्था सर्वस्य। निरन्तरापतितसंसारकार्यशतपारिप्लवस्य मनसः संस्थापनक्षमं सदपत्यादृते किमन्यत् ? विवाहानन्तरमद्यावधि प्रियपुत्रीं सुकन्यामनवलोक्य पर्याकुलं मे चेतः। कुशलिनीनामपि योषितां मातृकुलगमनाशा

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महती खलु । किं पुनर्दुःखितायाः सुकन्यायाः ! सुतादर्शनलालसया देव्या नैकवारं प्रतिबोधितोऽपि राजकार्यबाहुल्यान्नैव सुकन्यामानेतुं प्राभवम् । पुत्र्या दुर्दशां विचिन्तयन्ती प्रथममेव शोकपरीतमानसा देवी दीर्घकालं तस्या दर्शनमनवाप्य दिने दिने कार्श्यमुपैति ! इतः परमपि कालयापनं महतेऽनर्थाय कल्पेत । अतोऽद्यैव च्यवनाश्रमं गत्वा पुत्रीं जामातरं चानेष्यामि । कस्कोऽत्र भोः !

दौवारिकः—(प्रविश्य) आज्ञापयतु देवः !

राजा—मद्वचनात् सारथिं ब्रूहि—च्यवनाश्रमप्रस्थानाय रथं संनह्येति ।

दौवारिकः—यथाज्ञापयति देवः । (निष्क्रम्य, पुनः प्रविश्य) संनद्धरथः सारथिः द्वारि प्रतिपालयति । श्रुत्वा देवः प्रमाणम् ।

राजा—एष आगत एव । (निष्क्रान्तः)

[ततः प्रविशति फलपुष्पपूर्णभाजनहस्ता सुकन्या]

सुकन्या—(सवैमनस्यम्) कथं चिरयति जीवितेश्वरः ! सहैव वनविहारार्थमभ्यर्थितेनोक्तास्मि—'प्रिये, नर्मदां गत्वा तत्राह्निकविधिं समाप्य त्वरितमागच्छामी' ति । नेत्रानन्दकरममुमनवेक्षमाणाया म आत्मापि भारायते । भवतु । क्षणमेकमपि प्रतिपालयामि । (आश्रमस्य नातिदूरस्थे शिलातल उपविशति ।)

[ततः प्रविशति कृताह्निककृत्यश्च्यवनः । पश्चादागत्य सुकन्याया नेत्रे पिदधाति ।]

सुकन्या—(हस्ताभ्यां परामृशन्ती) नयनयोः पिहितयोरपि पिधायको ज्ञायत एव मया ।

च्यवनः—कस्मात् ?

सुकन्या—स्पर्शात्, इदानीं तु स्वरादपि ।

च्यवनः—क इति ज्ञायते श्रीमत्या ?

सुकन्या—कश्चिन्महांश्चोर इति ।

च्यवनः—केन हेतुना चोर इति प्रतीतः ?

सुकन्या—सुकन्याया हृदयापहरणेन ।

च्यवनः—चोरश्चेद्दण्ड्यो भवति ।

सुकन्या—एवमेव । राजधर्मः खल्वेष यच्चोरदण्डनम् !

च्यवनः—हृदयापहर्तुः कीदृशो दण्डो विधीयते महाराज्ञ्या ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुकन्या—कण्ठे पाशेनोद्बन्धनरूपः ।

च्यवनः—क्षमां याचे । प्रथमापराध इति कृत्वा मुच्यतामयं जनः ।

सुकन्या—दण्ड्यस्य सर्वथा विमोचनं न धर्मः । किं तु क्षमामवलम्ब्य परुषपाश स्थाने कोमलभुजलतापाश आसज्यते ।

च्यवनः—अत्युदारप्रकृतेरेतावदपि सौकर्यं बहुमन्तव्यमेव ।

सुकन्या—पाशोद्बन्धनात् पूर्वमपराधिनामभीष्टं पूरयितव्यमित्यस्ति सदाचारः तदुच्यतां भवदभीप्सितम् ।

च्यवनः—वन्योपजीविना किमन्यदाकाङ्क्ष्यते ? दीयतां हृद्यं फलं किमपि ।

सुकन्या—हस्ते करोतु भवान् । सर्वमप्यस्मिन् भाजने संनद्धमस्ति । (फलभाजनं पुरः प्रसारयति । च्यवनस्तत् परिगृह्य सुकन्यां स्वपार्श्वे शिलातलैकदेश उपवेशयति ।)

[ततः प्रविशति रथेन शर्यातिः सारथिश्च]

राजा—सारथे ! सुतादर्शनोत्कण्ठितमानसोऽहं समुल्लङ्घितमपि दीर्घमध्वानं नाज्ञासिषम् । संप्रति जामातुराश्रमसमीपं प्राप्तौ स्वः । अत्रैव रथं स्थापय । यावदवतरामि ।

सारथिः—यदाज्ञापयत्यायुष्मान् । (रथं स्थापयति) आयुष्मन् । अवस्थापितो रथः। अवतरत्वायुष्मान् ।

राजा—(अवतीर्य) सूत ! यावदाश्रमं गत्वोपावर्ते तावद्विश्रामय तुरङ्गमान् ।

सारथिः—तथा ।

राजा—प्रथमाश्रमाभिमुखः पन्थाः । यावद्गच्छामि । (गच्छन्नाश्रमस्य नातिदूरे शिलातलोपविष्टां सुकन्यां, तस्याः पार्श्वे उपविश्य संलपन्तं सुन्दरं तरुणं चाभिवीक्ष्य) अये ! किमिदं पश्यामि ।। मदीये अपि नयने न विश्वसिमि ।।: सुकन्येयं रहसि केनचित् सुन्दरेण यूना स्वपार्श्वोपविष्टेन सहालपन्ती दृश्यते ।।।। भवतु । सहसा किमपि न निर्धारणार्हम् । अत्रैव वृक्षान्तरितो भूत्वा स्पष्टं ज्ञास्यामि तावदनयोश्चेष्टितम् । (विलोकयन् स्थितः ।)

च्यवनः—प्रिये ! स्वतो मधुराण्यपि फलानीमानि मयि प्रेमपरवशया त्वया स्निग्धत्वकम्प्रकरपल्लवोपनीतान्यमृतमपि प्रत्यादिशन्ति । 'एकः स्वादु न भुञ्जीत' इति हि नीतिवचनम् ! अतस्त्वमपि गृहाण ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुकन्या—प्रियतमकरकमलस्पर्शमवाप्य मधुरतमानि का वा न बहुमन्यते ? अत आर्यपुत्रेण स्वयं दीयमानेभ्य एव स्पृहयति मे मनः ।

च्यवनः—प्रिये । गृह्यन्तामिमानि । (फलानि ददाति, कुसुममालिकया अलंकरोति च ।)

राजा—(सवितर्कम्) नूनमियं वराकी जारेणानेन प्रतार्य वाममार्गमाकृष्टा । इयमेव वा यौवनमदेन निजभर्तुरतृप्यन्ती सुन्दरे यून्यस्मिन्ननुरक्ता । उभयथापि लग्नः कुलद्वयेऽप्यप्रमार्ज्यः कलङ्कः ।

सुकन्या—नाथ । त्वरितमागच्छामीति गतेन भवता किमिति विलम्बितम् ?

च्यवनः—प्रिये ! न खलु विलम्बितम् । आह्निकाचरणमात्रपर्याप्तं मुहूर्तद्वयमेव तत्र स्थितोऽस्मि ।

सुकन्या—मम तु मन्दभाग्यायास्तदेव युगद्वयमिव परिणतम् ।

च्यवनः—सुन्दरि ! तव नूतनभर्तुः प्रभावोऽयम् ।

राजा—(सासूयम्) असंशयमयं धूर्तो नूतनभर्तैवास्याः । (सक्रोधम्) रे नराधम । त्यक्तमर्याद ।। निर्लज्ज ।।। सत्कुलप्रसूतां मुनेरपि परिग्रहमेनामेवं कदर्थयसि ? दुरात्मन् । एवं विधदुष्कृतकारिणस्ते देहान्तदण्ड एव निष्कृतिः । तदनेन खड्गेन पापिनस्ते मस्तकं छित्त्वा भूतगणेभ्यो बलिमुपहरामि । क्रोधमुपसंहरन्) अथवा, किमेतौ दूषयामि ? कामो नाम वामः धीरमपि पुरुषं यौवनदशायामयं विकारयत्येव । किमुत सामान्यजनम् । रूपयौवनशालिनीमिमां वनवासनिरताय जरन्मुनये ददतादीर्घदर्शिना मयैव प्रथममाकारितोऽयमनर्थः । तदत्र साहसं न युक्तम् , ईदानीमेवैनां सामाद्युपायैरकार्यादस्मान्निवार्य सदुपदेशवचनैः सत्पथं नयामि । तथा च प्रथममात्मानं प्रकाशयामि । (प्रविशति)

च्यवनः—(दूरतो विलोक्य) प्रिये । दिष्ट्या वर्धसे । एष ते तात उपस्थितः ।। गच्छ । प्रत्युद्गम्योटजं प्रति समानयैनम् । अहमपि गत्वा सत्कार साधनानि संगृह्णामि (निष्क्रान्तः)

सुकन्या—(पितरमुपगम्य) तात । सुकन्याहमभिवादये ।

राजा—(प्रत्याशिषोऽदत्त्वावचनः पराङ्मुखस्तिष्ठति ।)

सुकन्या—(दुःखं नाटयन्ती समीपं गता) सुतावत्सल । न युक्तं ते चिरं वन-विरहदुःखितां मामुपेक्षितुम् ।

राजा—(सरोषम्) दुष्टे । दूरमपसर । नाहं स्प्रष्टव्यस्त्वया पापाचारया।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुकन्या—तात। वृथैव मा कुप्य। मनसापि तादृशं कर्म मया न चिन्तितम्।

राजा—भ्रष्टे। इतोऽप्यपरं किमस्ति ते चिकीर्षितम्? यत् सकललोक संमानितं भर्तारं मुनिप्रवरं परित्यज्य अध्वगं सुन्दरं भजसे। सूर्यवंशप्रसूतायाः कृतविद्यायाश्च ते मतिरीदृशे गर्हिते कर्मणि प्रवृत्तेति चित्रमेतत्।

सुकन्या—(अश्रूणि मुञ्चन्ती) तात। कदा वा मया भर्ता परित्यक्तः? अन्यो वा सेवितः यन्निष्कारणेनैवासत्कल्पनया मामित्थमाक्षिपसि?

राजा—तर्हि सत्यं वद—कुत्र गतस्ते भर्ता?

सुकन्या—इदानीमेवाश्रमं प्रति गतः।

राजा—तव नूतनो भर्ता किलाश्रमं प्रति गतः। प्रत्नस्तु भर्ता द्वाभ्यामपि युवाभ्यां संप्रेषितः कैवल्याश्रमम्?

सुकन्या (कर्णौ पिधाय) शान्तं पापम्! तात! अभद्रं मा वद। कुलस्त्रियाः सर्वदाप्येक एव पतिः, न द्वितीयः।

राजा—वञ्चनाभिज्ञे। वाचाले॥ किं मे प्रज्ञापि नास्ति? एक शिलातलोपविष्टेन केनचित् तरुणेन सह ते कार्यचेष्टा किं मया न प्रत्यक्षीकृतेति विभावयसि? पापिनि। एवं परित्यक्तकुलस्त्री जनमर्यादया निर्लज्जया त्वयोभयमपि कुलमधः पातितम्। धिक् ते कुलपांसनाया जन्म।

सुकन्या—(स्वगतम्) अहो। नाथस्य यौवनप्राप्तिस्तातेनाविज्ञातपूर्वेति तर्कयामि। यतश्चास्मिन्नन्यभ्रान्त्या पुत्रीवात्सल्यमपि न गणयति धर्मात्मा नृपतिरयम्। (समन्दहासं प्रकाशम्) जनक। भ्रान्त्या प्रतारितोऽसि यत एवमाह भवान्। स एष ते जामाता भृगुनन्दनः, नापरः।

राजा—किमुच्यते—एष जामाता भृगुनन्दन इति? किमहं जामातरमपि न प्रत्यभिजानामि? अहो? अहो। प्रत्यक्षदृष्टमप्यपलपति मायाविनीयम्॥

सुकन्या—सावधानं शृणोतु तातः। मया चिरकालविरचितया शुश्रूषया परितुष्टेन ते जामात्रा यज्ञे हविर्भागदान प्रतिज्ञाप्रीतयोरश्विनोरनुग्रहादिदमीदृशं युवतिजनमनोहरं तातस्य भ्रान्तिनिदानं वयोरूपमासादितम्।

राजा—(साश्चर्यम्) वत्से। अपि सत्यमेतत्।

सुकन्या—सत्यमेव ब्रवीमि। कदा वा तातपादेष्वसत्यमुक्तं मया?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजा—दिष्ट्या प्रत्युज्जीवितोऽस्मि । अचिन्त्यः खलु महात्मनां प्रभावः । तथाहि

कर्तुं ह्यकर्तुं लोकेऽस्मिन्नन्यथाकर्तुमेव च ।
अत्यूर्जितप्रभावाणां शक्तिरस्ति महात्मनाम् ।। १६ ।।

वत्से । सौशील्यसंपन्ना त्वं वर्षशतं जीव । उभयमपि कुलं पावय ।

सुकन्या—अनुगृहीतास्मि । तात । अध्वक्रमणाच्छ्रान्तोऽसि । एहि, उटजमेव गच्छावः ।

राजा—तथा । (निष्क्रान्तौ)

च्यवनः—(अभिवीक्ष्य) श्वशुर । स्वागतं ते । आसनमिदमलंक्रियताम् ।। (आसन उपवेश्य, सुकन्यां प्रति) प्रिये । अभ्यागतं ते पितरमर्घ्यादिना पूजय । (सुकन्योपचरति) अप्यनामयं प्रजासहितस्य ते ?

राजा—सकल योगक्षेमविधानदक्षे तपोनिधौ जामातरि सत्यनामयमेव नः ।

च्यवनः—यद्यपि श्वशुरस्य जामातृकुलागमने प्रयोजन प्रश्नस्य नावकाशस्तथापि प्रजातन्त्रस्य मूर्धाभिषिक्तस्य झटित्यागमनेन, तदवकाशोस्त्येव ।

राजा—चिराय सुतां जामातरं चानवलोक्य भृशमुद्विग्नं नो मनः । देवी तु पुत्रीविरहकातरा कष्टां कामपि दशामनुभवति । किं बहुना ! सर्वा अपि प्रजा युष्मद्दर्शने समुत्सुका वर्तन्ते । अतश्च सुकन्यासहितेन भवता राजधानीमागत्य सर्वेऽपि समाश्वासयितव्या इत्यावेदयितुमागतोऽस्मि ।

च्यवनः—अवश्यकर्तव्ये कस्य वा विसंमतिर्भवेत् ? परं तु…

राजा—विवक्षितं निःशङ्कमभिधीयताम् । उपेयज्ञानानन्तरं खलूपायचिन्तनम् !

च्यवनः—भवता कुशलप्रश्नोत्तरप्रस्तावे "सकलयोगक्षेमविधानदक्ष" इति विशेषितोऽस्मि । श्वशुरस्य हृदयस्थितं शोकशल्यमपि जानामि । प्रथममेव कष्टायां दशायामनन्यगतिकाय गुणरूपसंपन्नां प्रियपुत्रीं सुकन्यां मह्यं दत्वा कृतं महोपकारमपि जानाम्येव । ततश्च सोमेन भवन्तं याजयित्वा, तत्रैवाध्वरेऽश्विनोरपि पूर्वप्रतिज्ञातं यज्ञभागं वितीर्य चानृणो भवितुमिच्छामि ।

राजा—(स्वगतम्) चिराय मयि स्थितो मनोरथ एवानेनापि कथ्यते । (प्रकाशम्) अयोध्यां प्रत्यागमने सर्वमपि सुकरं भवेदिति मन्ये ।

च्यवनः—धन्यो भवामि ।

राजा—तदनेन बहिः संनद्धेन रथेन मया सहैव प्रतिष्ठेथाम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

च्यवनः—अनुगृहीतोऽस्मि । (सुकन्यां प्रति) प्रिये ! एहि । मया सह पितरमनुव्रज ।

सुकन्या—नियुक्तैवास्मि नाथेन ।

(निष्क्रान्ताः सर्वे)

## ॥ पञ्चमं दृश्यम् ॥

[ततः प्रविशति सोमदत्तनामा ब्राह्मणः ।]

सोमदत्तः—(स निर्वेदम्) अहो ! धिग् विधिविलसितम् !! प्रत्यहं दारिद्र्यपिशाचिकापरवशस्य मे सुखलेशोऽपि दुर्लभ एव । मन्ये निर्धनता निधनं च समे एवेति । अकिंचनस्यापि मेऽपत्यविषये दारिद्र्यं नास्ति । दरिद्रस्य भार्यया बह्वपत्यतायोग इति यदुच्यते तत्सत्यमेव । यद्यपि हस्ते काकिण्येकापि नास्ति तथापि शर्यातिमहाराजपालितायामयोध्यायां निवसता मया कुटुम्बभरणे शिलोञ्छवृत्तिर्न स्वीकृता । धर्ममार्गप्रवृत्ता बहवो जनास्तत्र तत्र यागादिकर्मकलापं समाचरन्तः प्रभूतमन्नादिदानं कुर्वन्ति । तेनैवास्माकं कालयापनं भवति । अद्य तु महाराजेन शर्यातिना जामातुश्च्यवनस्याध्वर्युत्वे सोमयाग आरब्ध इति श्रूयते । दरिद्रः केन गण्यते ? भवतु । 'अनाहूतोऽध्वरं गच्छे'दिति श्रुतम् । अतस्तत्र गत्वा यागीय भोजन दक्षिणादेरग्रपात्रं भवामि । (निष्क्रान्तः ।)

[ततः प्रविशन्ति यज्ञकर्मणि प्रवृत्ताः च्यवनपुरोगा ऋत्विजः, सभासदः, यजमानः सभार्यः शर्यातिश्च ।]

च्यवनः—(उत्थाय) नमः सदसे, सदसस्पतये ! नमः सखिभ्यः ! अयि भो ऋत्विग्वरेण्याः ! सभासदश्च !! इदानीं यागस्यास्य सोमाभिषवकालः संनिहितः । एतस्मिन्नेवावसरे असोमपोरश्विनोरपि सोमग्रहग्रहणे युष्मदनुमतिरपेक्ष्यते ।

सभासत्स्वन्यतमः—अयि सभास्तारः ! अशेषविशेषविदां भवतां पुर्यल्पज्ञानां मादृशानां मौनमेव शोभते । तथापि जिज्ञासया किंचित् प्रस्तूयते-भिषग्वृत्तितया महेन्द्रादिभिः सोमाहुतेर्बहिष्कृतयोरनर्हयोरश्विनोर्यज्ञेऽस्मिन् सोमग्रहग्रहणं न [illegible] साधारणैरस्माभिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शिष्टाचारविरुद्धेऽस्मिन् कार्ये कथंकारमनुमतिर्दीयेत ? कथंचित् दत्तायामप्यनुमतौ स्वाभिमानिनो महेन्द्रप्रमुखा देवा दुःसहममुं पराभवं प्राप्य तूष्णीं भवेयुरिति कथं नाम विश्वसितुं शक्नुमः ? अतः पूर्वापरं सम्यक् समालोच्यैव कार्यनिर्धारणं युक्तमिति मां प्रतिभाति ।

सर्वे— अस्माकमप्ययमेवाशयः ।

च्यवनः—भो सदाचारनिपुणाः सभ्याः ! अनर्हता नाम न सर्वस्य सर्वदाप्यस्ति । न कश्चिदामरणं सदाप्यर्होऽनर्हो वा भवति । कालकर्मावस्थानुसारादर्होऽनर्हतामनर्हो वार्हतां प्रतिपद्यते । किं च देशकालावनुसृत्य धर्मोऽप्यंशतः परिवर्तनमर्हति । एकस्मिन् देशे काले वा विहितोऽप्यर्थः देशान्तरे कालान्तरे चावद्यो भवति । यथा कलौ पलपैतृकगवालम्भनादिरूपः । इममेवार्थं विपश्चितो युगधर्मत्वादिना व्यवहरन्ति । ततश्च वस्तुस्थितिमवलम्ब्य प्रत्यय संवादेन विद्वत्परिषदि साधुतया निर्णीतस्यार्थस्याचरणं नासमञ्जसं भवितुमर्हति । प्रचुरैश्वर्याधिकारमदमत्तानां मत्सरिणां चेन्द्रादीनां विरोधस्तु रागद्वेषमूल इत्यकिंचित्करो गणनानर्हश्च ।

अपरः—भार्गवमुने ! इदानीमपि गर्हितां तामेव वैद्यवृत्तिममुञ्चतोरश्विनोरपात्रता केन कारणेनापोदितेति ज्ञातुमिच्छामः ।

च्यवनः—शृणुत सावधानाः ! अपात्रता च जात्या वृत्त्या वा भवितुमर्हति । सूर्यभगवतः पुत्रयोरनयोर्जातिप्रयुक्तापात्रता नास्ति । तत्त्वज्ञानपरिपूतयोरेतयोर्वृत्तिप्रयुक्ता सा कथं नाम वक्तुं शक्यते ? किं च रागादिरोगार्तबहुजनप्राणरक्षणोपयोगितया पङ्क्तिपावनै रात्रेयादिमहर्षिभिरूपकल्पितेयं वैद्यवृत्तिः कथं नाम हेयवृत्तिषु परिगणनमर्हति ? अतो दस्रयोः सत्पात्रतायां न काप्यनुपपत्तिः ।

अन्यः—महर्षे ! तथापि देवैर्बहिष्कृतौ खल्विमौ !

च्यवनः—स्यादेतत् । अत एव मर्त्यानप्युपचरन्तौ देववदनानि मष्या लिम्पतः । किं च पूर्वमेवोक्तं खलु मया बहिष्करणमिदं रागद्वेषप्रयुक्तत्वादन्याय्यमिति ।

अपरः—भार्गव मुने ! अति सूक्ष्मतरं भवति धर्मरहस्यम् । सर्वज्ञेन भवता सह वादो नः पुरोभागितामेव प्रकाशयेत् ।

च्यवनः—न ह्येकः सर्वमपि जानाति । जयेच्छया वादो दोषावहः । तत्त्व बुभुत्सया वादे तु गुण एव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इतरः—युक्ति युक्तं वचः सर्वतोऽपि ग्राह्यमेव । तथापि वृत्रस्य हन्तु कोपजं प्रतीकारमाशङ्कमाना वयं विषयेऽस्मिन् मौनमेवावलम्बामहे ।

च्यवनः—अस्तु । भवतामसंमतिः नास्ति खलु ! मौनं संमतिलक्षणमिति मत्वा-श्विनोः पूर्वप्रतिश्रुतं सोमग्रहं गृह्णामि (तदेव कर्मारभते)

[ततः प्रविशति स्वर्लोकात् प्रस्थितो महेन्द्रः ।]

महेन्द्रः—आश्चर्यम् ! देवर्षिणा नारदेनाभिहितोऽस्मि यत् मर्त्यलोके जरा जीर्णेन च्यवनमहर्षिणा स्वयुवभार्यायाः सुकन्यायाः मनः प्रसादनाय यज्ञे सोमाहुतिवितरणप्रतिज्ञाप्रोत्साहिताभ्यामश्विनीकुमाराभ्यां सद्यः परिणामकारिण्या कयाचित् कायकल्पचिकित्सया युवतिजनचित्ता-कर्षकं वयोरूपमासाद्य श्वशुरस्य शर्यातिमहाराजस्य यजमानत्वे सोम-याग आरब्ध इति । तत्र च सभासदां संमतिं प्रौढवादेनादाय स्वप्रति-ज्ञानुरूपमश्विभ्यामपि सोमाहुतिर्वितीर्यत इति च । अहो मुनेः साहसम् ! यत् क्रतुभोरजिभिस्माभिर्देव संघाद्बहिष्कृतयोरप्यनयोः सोमग्रहो गृह्यत इति । तदनेन व्यतिकरेण जघन्यैर्मर्त्यैर्दिविषन्निष्ठगौरवस्य महत्त्वं प्रति प्रश्नः कृतो भवतीति मन्ये । तदत्र न युक्तं तूष्णीमवस्थातुम् । अतस्त्वरितमेवायोध्यां गत्वा तत्र प्रचाल्यमानस्य यागस्य विघ्नमुत्पाद-यिष्यामि । (निष्क्रान्तः)

(नेपथ्ये)

भो अन्याय्यमिदम् ! न धर्म्यमिदम् !! अनार्यजुष्टं चेदं यदपात्रे यज्ञ भाग वितरणं व्यवसितम् !!!

सर्वे—अये ! कुत इदं परिकुपित भैरवरवानुकारि वचः श्रूयते ! (विलोक्य) अहो ! स एव महेन्द्रः !! क्रोध भीषणघटितकुटिलभ्रू कुटिविकटारुणा-भ्यामीक्षणाभ्यां दहन्निवं संमुखापतितान् इतोमुख एवाभिवर्तते । तदनयोश्च्यवनयोर्व्यतिकरेण सर्वनाश उपस्थितः । (सर्वे तत इतो धावितुं प्रवृत्ताः) ।

च्यवनः—भो सभ्याः ! न किमपि वः संप्रति नश्यति । भीरुभावं परित्यज्य सर्वे यथास्थानमुपविशत ।

महेन्द्रः—(प्रविश्य) भो सभासदः ! न सांप्रतमिदं धर्ममर्मज्ञानां सदाचारनिष्ठानां च भवतां यत् पङ्क्तिबहिष्कृतयोरश्विनोः क्रतुभोजिभिर्देवैः सह सोम-ग्रहग्रहणे संमतिदानम् । प्राकृतजनसंमतेन वो मूर्खताविलसितेनानेन परस्परं भावयतामेव परं श्रेय इति विस्मृतमिव भाति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

च्यवनवर्जं सर्वे—त्रिलोकप्रभो ! नास्माभिः कदाप्यनुमोदितमेतत् ।

महेन्द्रः—तर्हि कस्येयं स्वेच्छाप्रवृत्तिः ?

(सर्वे तूष्णीं तिष्ठन्ति ।)

महेन्द्रः—किमिति मूकतामवलम्बध्वे ? झटिति प्रतिवचनं दत्त ।

च्यवनः—महेन्द्र ! केवलमस्माभिरेव कर्तव्येऽस्मिन् प्रवृत्तम् ।

महेन्द्रः—वृथाभिमानिन्, भार्गव ! अपात्रे सोमांशदानप्रवृत्तेन भवता शतमखप्रभृतयः सर्वेऽपि दिवौकसो वयमपमानिताः । चिराय सतां क्षुण्णः पन्था विनाशितश्च । बुद्धिपूर्वकमेव कृतस्यास्य महापराधस्य फलमचिरादेवानुभविष्यसीति ते विदितमस्तु ।

च्यवनः—दुश्च्यवन ! न मयात्रापराधः कृतः । किं तु प्रभूतैश्वर्यमदमत्तस्य ते विवेकवैधुर्यप्रयुक्ता स्वार्थपरतैवापराध्यति ।

महेन्द्रः—अनार्य ! वयसि परिणतेऽपि रागान्धतया यवीयसीं राजकन्यां कपटेन परिणीय, तस्याः प्रीतिसंपादनाय नट इव गृहीतभूमिकान्तरः स्ववैद्ययोः ऋणापकरणाय सोमविक्रयप्रवृत्तो भवानेव स्वार्थपरः ।

च्यवनः—रे वाचाल ! दुर्विदग्ध !! विश्वस्तायास्तव मातृष्वसुर्दितेर्गर्भं छलेन घातितवतः, वेषपरिवर्तनेन च परमसाध्वीं गौतमधर्मपत्नीमहल्यां कदर्थीकृतवतः सहस्रनयनस्य ते पैशाचकृत्यं वर्णयितुं केन वा शक्यते ?

महेन्द्रः—असंबद्धप्रलापिन् भार्गव ! पूर्वमक्षिगतं ते मान्द्यमिकानीं बुद्धाववतीर्णमिति भाति येनोच्चपदाधिष्ठितं वज्रबाहुमपि मां तृणाय मन्यमानो दोषकलुषितवाग्भिरित्थं क्षिणोषि ।

च्यवनः—मूढ ! उच्चैः स्थितिः पतन हेतुरिति न जानासि ! एवं साधूनधिक्षिपता त्वया परिणामश्चिन्तनीयः । स्मर प्रथमं त्रिशङ्कुप्रकरणम् ।

महेन्द्रः—स्मर्यत एव तत्प्रकरणं यत्र मया कालदण्डभीषणेन वज्रायुधेनानेन त्रिशङ्कुर्मूर्ध्न्यभिहत्याधः पातितो निर्गतिकः संजातः ।

च्यवनः—वैनेय ! विश्वामित्रजः पराजयस्तु त्वया विस्मृत इति भाति ।

महेन्द्रः—अरे रे तपोगर्वित ! दुष्टमुने !! तिष्ठ । दुर्दान्तगर्वभञ्जकेनानेन वज्रायुधेन ते मस्तकं शतधा भङ्क्ष्यामि । (वज्रायुधमुद्यच्छति)

(सर्वे साश्चर्यानुकम्पासाध्वसं पश्यन्ति)

च्यवनः—अविमृश्यकारिन् ! नृशंस !! स्तम्भीभवतु ते सवज्रोहस्तः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

महेन्द्रः—(मतिमास्थाय स्वगतम्) आश्चर्यमाश्चर्यम् ! भार्गवतेजसा स्तम्भीभूतहस्तोऽहं समुद्यतं वज्रायुधमिदं प्रतिसंहर्तुमपि न प्रभवामि ! हन्त ! वृत्रघ्नो ममापीयं दुरवस्था !

निष्ठुरोऽसि विधे येन त्वया निष्करुणात्मना ।
त्रिलोकाधीश्वरः कश्चित् परीभावाग्निसात्कृतः ॥ १७ ॥

अथवा, किमिति विधिं दूषयामि ? महाप्रभावं भार्गवमुनिमपि तृणाय मन्यमानस्य ममैवैषदोषः । किमिदानीं करिष्ये ? (विचिन्त्य) वज्रादपि कठिनं कुसुमादपि मृदुलं च भवति महात्मनां हृदयम् । पश्चात्तापपरिपूतं मां कदाचित् शमधनोऽयं क्षमेतापि । अतः एनमेव शरणं याचे । (उपसृत्य) (प्रकाशम्) भगवन् ! शरणागतवत्सल !! भार्गवमुने !!!

भूम्ना पदाहृतिशतैरवमानितापि
सर्वंसहा ननु सदाश्रयदा जनस्य ।
संदूषितोऽपि परुषैर्वचनैर्भवांश्च
नम्रस्य मेऽद्य शरणं भवतु क्षमावान् ॥ १८ ॥

क्रोधपरवशेन तव प्रभावमजानता मया मनोवाक्कायकृतंत्रिविधमप्यागः क्षम्यताम् । (पादयोः पतति)

च्यवनः—(ससंभ्रममालम्ब्य) महेन्द्र ! उत्तिष्ठ । क्रोधो नाम सर्वानर्थमूलम् ! निःशेषं बाह्यशत्रूपमर्देनापि भवनान्तःशत्रुरयं न निर्जित इति चित्रमेतत् । भवतु । विधात्रा लोकत्रयरक्षायां नियुक्तो भवान् । इदानीं पश्चात्तापपरिपूत इति च क्षम्यत एव । विबुधपतौ त्वयि मयापि यदुक्तं तदपि विस्मर । प्रकृतिमापद्यस्व ।

महेन्द्रः—(हस्तं यथास्थानं नीत्वा सहर्षम्) भगवन् ! दयालुना सर्वथानुगृहीतोऽस्मि भवता । तद्भास्ताम् । अश्विनोर्यज्ञांशदानविषये मयि चिरसंलग्नं मोहकलिलमप्यपनुद्य पुनरपि मामनुगृहाण ।

च्यवनः—महेन्द्र ! तत्राप्युच्यते । शृणु । वैद्यवृत्तिर्धनसंचयलोभप्रवर्तिता वृजिनमुत्पादयति । परोपकार बुद्ध्या निष्कामप्रवर्तितया तया न कोऽपि दोषः । अपि तु महान् गुण एव । ज्ञाननिष्ठापवित्रीकृतयोः सूर्यतनययोरश्विनोरपात्रतारोपणं न समञ्जसमिति चिरादपेक्षमाणयोरेतयोः सोमांशदाने प्रवृत्तमस्माभिः । किं च, धर्मस्य पालन एव युष्माकमधिकारः । निर्णये तु तस्य वेदविद एव प्रमाणम् । परिस्थितिबलाद्देश-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कालावनुसृत्य तथैवुच्यते तदेवेतरेषामाचरणीयं भवति । अतश्च न केवलमस्मिन् यागे करिष्यमाणेषु यागान्तरेषु चाश्विनोर्विषयेऽस्माभिरूपकल्पितं यज्ञांशभाक्त्वं सर्वैरपि युष्माभिरभ्युपगन्तव्यमित्याशंसामहे ।

महेन्द्रः—महर्षिपुङ्गवेन भवता शास्त्रन्यायाभ्यां दृष्टेऽस्मिन् सदर्थे सर्वथा वयमनुमन्यामहे ।

च्यवनः—सभासदः ! कथं कृवन्तो मन्यन्ते ?

सभासदः—(सर्वेऽप्येककण्ठम्) पुरुहूतेनैव साक्षादनुमते के वा विप्रतिपद्येरन् ? तद्वयमप्यङ्गीकुर्मः ।

च्यवनः—कृतार्था वयमिदानीम् ।

राजा—(उपगम्य) वृत्रहन् ! त्रिलोकयोः क्षेमविधायिनं त्वां शर्यातिः प्रणमति

महेन्द्रः—राजन् ! यावदधिकारमप्रतिहताज्ञः सन् धर्मेण सदा वसुधां पालय ॥

राजा—आखण्डल ! मर्त्यजनदुर्लभेनामुना भवदागमनेन संसारेऽस्मिन् प्रथमं बहुमानपात्रमस्मि ।

महेन्द्रः—मानव ! धन्यतरोऽसि येन त्वया ब्रह्मवादिनामग्रणीर्योगिप्रवरश्चासादितो जामाता भार्गवः ! किं च,

वैवस्वतं कुलमनन्यतमः प्रतापो
विद्यापि यस्य तव तत्त्वविचारपूर्णा ।
निष्कण्टकं महदिदं च धराधिपत्यं
धीमन् किमस्ति भवता यदिहानवाप्तम् ॥ १९ ॥

राजा—सर्वत्रापि देवताप्रसाद एव परं निदानम् !

च्यवनः—मघवन् ! चिरायात्मनः श्रेयःपरम्परामिच्छतः श्वशुरस्य मनोरथं विज्ञातवता मया कारितोऽयं यागविशेषोऽवभृथेन सह समाप्तिमेष्यति । यथाविभवं संतर्पिता देवा भूमिदेवाश्च । अस्मद्भागधेयवशाद्भवानपि सत्समय एवोपस्थितः । अतो भवन्मुखादेव शुभाशंसनमाशास्वहे ।

महेन्द्रः—भगवन् ! भार्गव !! महाराज शर्याते !!! सर्वोऽपि श्रौतस्मार्तकर्मकलाप एकान्तभक्त्या विधिवदाचरितो नियमेनाभीष्टफलं ददाति । तथापि भवत्प्रार्थनामनुसृत्य किंचिदिदमुच्यते—

स्वयं प्रभावार्जितसर्वसिद्धयो-
राशासनीयं किमिवापरं स्यात् !
पुत्रांल्लभेतां सदृशान् भवन्ता-
वनुग्रहाद्यज्ञ फलप्रदातुः ॥ २० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सभासदः—यज्ञभावितेन महेन्द्रेणाशंसितं सर्वं वयमप्यनुमोदामहे ।

महेन्द्रः—च्यवनमहर्षे ! किं वां भूयः प्रियमुपहरामि ?

च्यवनः—इतः परमपि प्रियमस्ति ? तथापीदमस्तु भरतवाक्यम्—

मेघो वर्षतु सर्वसंभृतजलः कालेऽतिवृष्टिं विना
सस्यश्यामलतां दधातु पृथिवी कृष्टोप्तबीजा मुहुः ।
भक्त्या शान्तिकपौष्टिकानि कुरुतात् कर्माणि लोकोऽन्वहं
धर्मेणावतु च प्रजा नृपवरो नन्दन्तु सर्वे जनाः ॥ २१ ॥

महेन्द्रः—तथास्तु ।

(इति निष्क्रान्ताः सर्वे)

॥ सम्पूर्णम् ॥

॥ श्रीकृष्णार्पणमस्तु ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

॥ ॐ ॥

# श्री इन्दिराशतकम्

—गोपीकृष्णव्यासः

(श्री) मोती-लालसुतस्य पुत्रि जयताद्भूपालमौलीश्वरि
श्री-माते कमला-सुनिर्मल-कुलोत्पन्नापिते वापिते ।
नीर-क्षीर-विवेक-पाटवचणा हंसीव ते चातुरी,
न्याया-न्याय-विचारण-प्रभु-सुधाधीषु प्रभासन्मतिः ॥१॥

सुमत इन्दिरे इन्दिरालये विमतितापतापोपशान्तिदे ।
कुमतमूर्त्तिमूर्त्तेभमर्द्दनप्रसरसारवत्सिंह-वाहने ॥२॥

अधनमानवोद्धारतत्परे धरणिभृत्पतिप्रोन्नतोऽनते ।
विकचवारि-जाक्षीविचक्षणे, अनिलजिज्जवातिक्रमप्रधीः ॥३॥

त्वमसि शारदेन्दीवरेन्दिरानयन इन्दिरेवेन्दु चन्द्रिके ।
द्विरदयुग्मशुण्डोद्धृताब्जभाभवनमस्तकोद्भासिकेशिके ॥४॥

सफलता करे ते प्रवर्त्तते चरणचुम्बिनी सिद्धिरास्थिता ।
तव सुजानुनोरिन्दिरेम्बुधेर्भवति सर्वदोजः शुभायनम् ॥५॥

कटितटे तव ब्रह्ममेखला, विलसति प्रकामं सुकुञ्जिका ।
भरत-राष्ट्रिया तत्र इन्दिरे सकल-सिद्धिदा शेषशायिवत् ॥६॥

उदरमण्डले स त्रिपल्लवत्रिवलिवेलिषु त्रिप्रवृत्तयः ।
तव महेन्दिरे सम्प्रतिष्ठिता ध्वज इव त्रयी सच्चिदात्मिका ॥७॥

जगदुदारता चन्द्रिकासिता सकलसत्प्रियत्वारुणोज्ज्वला ।
हरितिमाप्रभा प्राणदायिनीत्वियमतिप्रसिद्धान्नधारिणी ॥८॥

उरसिसाधनादिव्यदर्शिनी कलहशोषिणी सौख्यवर्षिणी ।
अखिलविश्वशान्तिप्रदायिनी वहति ते सदा ब्रह्मनन्दिनी ॥९॥

जगति सत्प्रतिष्ठां प्रकुर्वती भुविसमत्वबन्धुत्वकारिणी ।
कमलभूरिव प्रेमसृष्टिकृद्रविरिव प्रजाः प्रेरयत्यहो ॥१०॥

शशसुलक्ष्मवत्सम्प्रसादिनी सुरसरिद्वदेनःप्रणाशिनी ।
जलधिजेव दारिद्र्य हारिणी महिषमर्द्दिनीवद्द्रुहां हरा ॥११॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अ्रसितरत्नभाकालिकेव या शयित-राष्ट्र-विष्णु-प्रबोधिनी ।
श्रुतिसरस्वतीवाऽसुरारिभिर्मधुरसंस्तवेन प्रशंसिता ॥१२॥

अ्रमरविद्विषोः शुम्भशक्तिमद्भुजनिशुम्भयोर्नाशिनीव या ।
वचनदुर्गुणौ (अ्रप्रियासती) अपि निहन्ति या वागधिष्ठिता ॥१३॥

भवति, भारतं बोधयत्यहो सुतमिवाशुमन्दालसेव या ।
नयति सत्पथं भो हुताशवत्सकलमानवान्विश्वसम्भवान् ॥१४॥

शुभमतिः सदा सद्गुणार्णवा भवति, सम्भवत्यग्रगामिनी ।
निखिल-धर्म-कर्मप्रवृत्तये मतिमतः सदा योजयत्यपि ॥१५॥

प्रणववर्णिनीव प्रजायसे त्वमरविन्दकुड्माद्विरिञ्चिवत् ।
सकलराष्ट्रसङ्घप्रणायिके निखिल देहिनामार्त्तिनाशिनि ॥१६॥

निजसुनासिकोन्नत्यपाकृतद्विरदवाहिनी श्रीपतिप्रिय—
प्रणवमन्त्र कोटिप्रजापजप्रबलपुण्यदुष्क्लेशनाशिनी ॥१७॥

नयनयोस्तव श्रेष्ठ-दर्शने विलसति प्रजोन्नतिरतिप्रिया ।
विविध-साधनोत्तुङ्गयोजनाद्विदशसूत्रिकाशुप्रमोददा ॥१८॥

प्रखरधीश्वरिध्यानिनां वरे विभववर्धनेऽनन्तसत्क्रिये ।
तव भवोद्भवे भावुकोदये भवविभूति-सम्भावनाऽर्पिता ॥१९॥

प्रवहति प्रकामं सरिद्वराशुभविचारनीराऽऽशुशान्तिदा ।
तव सुमस्तके धूर्जटेरिव, विबुधनिर्झरी राष्ट्रनायिके ॥२०॥

महिषमर्द्दिनीवद्रिपुन्दरी रतिपुरन्दरस्त्रीव सुन्दरी ।
त्वमसि निर्धनानां शिवङ्करी वहसि राष्ट्रशक्ति सुशान्तये ॥२१॥

तव सुवाक्सुधां सर्पिमानवा अभिलषन्ति पातुं घनतुंकम् ।
जलदवारि-वच्चातका यथा निशिचकोर-वच्चन्द्रिकामिव ॥२२॥

भुवनमण्डले यत्रकुत्रचिद्भवति सन्मते याति सत्कृता ।
अवनिमानवास्तत्र तत्र ते नयन-चामरान्दोलयन्ति हि ॥२३॥

परमयाऽऽदरश्रद्धया पथि प्रपथि नेत्रवस्त्रं दृगम्बुमत् ।
जय-जयेतिघोषोन्मुखाम्बुजाः प्रतिपदं भुविच्छादयन्ति ते ॥२४॥

वदनपद्ममक्ष्यम्बुधौ नृणां विकसति प्रगे नैव केवलम् ।
रविमुदीक्ष्य किन्तु स्वयम्पुनः सततमेव तत्फुल्लमीक्ष्यते ॥२५॥

भगवतो विभूतिः समागता त्वमसि भावना शक्तिरूपिणी ।
जगति नैव [illegible] ॥२६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तव करेस्थितो दण्ड एषको ह्यवसरे भृशं सम्प्रवर्त्तते ।
जनसुरक्षणे शक्तिभृन्महान्रचयति द्रुतं चित्रमद्भुतम् ॥२७॥

वहुजना यदा पाकवङ्गके यवनसैनिकैर्मृत्यवेऽर्पिताः ।
भगवति त्वया मुक्ति-दायिनी समुपयोजिता शक्ति-वाहिनी ॥२८॥

सपदि तद्वलं तानरक्षयत् क्षणदमाशु पाकं विघट्टयत् ।
मधुरिपुर्यथाराहुमाच्छिनद्व्यकुरुत द्विधा पाककुं तथा ॥ २९ ॥

जगति ते यशः श्वेतमास्तृतं सर्वतो जले तैलबिन्दुवत् ।
त्वमसि चण्डिकेत्याप्तवक्तृभिः सततमीडिता तत्प्रभावतः ॥३०॥

तव भवस्य कोपि प्रभावित.समुपयाति मार्गं दृशो नरः ।
लघुरथो गुरुर्व्वन्यते हि सः मुखमरुत्प्रपूर्णः पटोलकः (वत्)॥३१॥

अपि पटच्चरः सम्भवेत्क्वचित्परमसौ भवेत्त्वत्सुसङ्गतेः ।
शुभमतिर्महान्दानतत्परोऽप्रतिम-सुप्रभो भूतिभूषितः ॥३२॥

चलति ते यदा चक्रमुत्तमं भ्रमति सर्वमेतज्जगत्तदा ।
परमिदं विनावश्यक-क्रियां किमपि नोच्चलेत्पद्धतेर्गतेः ॥३३॥

गणपतिर्यथा पार्वतीसुतस्तव सुतोऽपि राजीव-लोचनः ।
कमल नेत्रवन्मान्यते जनैर्जलजवत्स राजीव ईक्ष्यते ॥३४॥

शिवजषण्मुखो देवसैन्यपः सुतनयस्तवापीन्दिरेऽरिहन् ।
अचल-निश्चयो राष्ट्र-नायकः प्रभवतीन्दुवत्सत्कृतां वरः ॥३५॥

गिरिसुता यथा पुत्रयोर्द्वयोरभिहिता जनन्युत्तमोत्तमा ।
त्वमपि वर्त्तसे साऽपि जानकी त्रयमिदं सदा पूज्यते स्त्रियाम् ॥३६॥

असुरवत्पुरस्ते समुत्थिता भवति कापि बाधा बुधार्चिते ।
त्वमपि जायसे सिंह-वाहिनी हरसि शम्भुवत्कामसुत्कटाम् ॥३७॥

अभवदेकदा पाकराष्ट्रिया हनुमतः पथः सिंहिका यथा ।
जटिलदुःखदा सा समस्यका पवन-पुत्रवत्तां त्वमाक्षिपः ॥३८॥

मुसलमानपाकस्थलीयका निरपराधिनो मानवान्यदा ।
दुरितवृत्तयः पीडितुं मुहुर्महुरथोद्धता दानवा इव ॥३९॥

सपदि शैलजावन्महेन्दिरे त्वमपि कालिकारूपमादधाः ।
मधुरिपुर्यथा चैद्यमाच्छिनत्त्वमपि पाककोबङ्गमाच्छिनत् ॥४०॥

तव सुनिश्चयं देवि सद्व्रते विधिरपीह नो शक्तिमान्भवेत् ।
विपरिवर्त्तितुं यत्त्वमास्थिता परमवैष्णवीं शाम्भवीं कलाम् ॥४१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सुकवि-कालिदासस्य पद्मजो विकृतभूमिकां न क्षमः स्वयम् ।
रचितुमन्यथा पादपे यथा विषफले सुधां कर्त्तुमक्षमः ॥४२॥

परमसित्वमीशा महेन्दिरे बलवतीं समस्यां समुत्थिताम् ।
समपहर्त्तुमेनां क्षणान्मुदा मम कवित्व-सन्नायिका यतः ॥४३॥

जगति नाटके दिव्य-नायिका भगवतः श्रियः श्रेष्ठ-पुत्रिका ।
यमु चिकीर्षसि स्वीय-साधनं तमकरोः स्वकं सिंहवाहनम् ॥४४॥

अपि विरोधिनां प्रोद्धतं बलं स्ववशमानयस्त्वं क्षणार्धतः ।
विघटनं रिपूणां सुभेदतः सुविकलय्य राज्यं समग्रहीः ॥४५॥

इदमपीहते क्रीडनं लघुप्रखरधीरपिज्ञातुमक्षमः ।
किमु पुनः सुसाधारणैर्जनैस्तत्र रहस्यमेतत्प्रबुध्यताम् ॥४६॥

विधिरसौ न जाने कया मृदा व्यरचयद्यतस्त्वां न कोऽपि ना ।
तव रहश्च जानाति तत्त्वतः कृतिमत्रेक्ष्यते तर्कयन्ति हि ॥ ४७ ॥

तव पितृष्वसा श्रीमती हठीकृतसुपूर्विका सिंह-नाम-भाक् ।
वयसि शैशवे त्वामजीगदत्प्रियतमेन्दु-नाम्ना यदा कदा ॥ ४८ ॥

तदपि नाम ते चन्द्रबिम्बवद्विलसति स्वयं सर्वथोन्नतम् ।
किमपि सूचितं भव्यमुन्नतं स्वभिधया तया इन्दुरित्यहो ॥ ४९ ॥

त्वमसि इन्दिरा इन्दुरित्यहो लिखितमेतदस्मिन्सुपुस्तके ।
विनतमस्तकं जायते जगद्रविरुदेति पूर्वाचलं यदा ॥ ५० ॥

सवितृमण्डलं तेजसा यथा जगति वन्द्यते त्वञ्च चेतसः ।
द्रुत-चमत्कृतेरोजसा तथा भुवि सुरासुरैर्वन्द्यसे नरैः ॥ ५१ ॥

तव विरोधिनोऽपि क्वचित्क्वचिच्चकितया दृशा त्वां विलोक्य ते ।
प्रणतमस्तकाः सम्भवन्ति ते च सुमतिं स्तुवन्ति स्वया गिरा ॥ ५२ ॥

इदमवैमि ते बुद्धिकौशलं नमयतीह यत्पादपङ्कजम् ।
तव महेन्दिरे सर्वमानवान्सुजनयन्महाकौतुकं हृदि ॥ ५२ ॥

तव मतौ महा-जादु जातु तच्चकितमीक्ष्यते सर्व-देहिभिः ।
फलति सर्वदा चापि तत्क्षणं सुरतरुर्यथा स्वाश्रिते जने ॥ ५४ ॥

कुपथगामिनः स्वल्पसिक्खकास्तव महत्वमेवंविधं न हि ।
अनुबभूवुरेते स्वराष्ट्रिया अत इदं महन्निन्द्य-कर्मतैः ॥ ५५ ॥

अरिकुपूरितप्राणकम्बुवद् बहुकुजल्पितं तत्तथा कृतम् ।
भृशमतीव हास्यास्पदा इमे समभवन्महामूर्खसिंहवद् ॥ ५६ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विपिनये कदा कोऽपि सिंहकः शशकचातुरी भ्रामितो भवन् ।
न्यपतदुत्कटे कूपके यथा प्रपतितास्तथैतेऽपि सिक्खकाः ॥ ५७ ॥

बहुतरां त्वया बोधिता अपि ह्यतितरां हतज्ञानदृष्टयः ।
विधिवशादभ्रमिभ्रष्टभिन्नमृद्घट इवाऽऽहवाऽस्वाप तन्मुधा ॥ ५८ ॥

तव भर्टयेंशो नूतनः पटः सुरचितस्ततः शाटिका कृता ।
दिगवलाभिराभिः सुधारिता जगति शोभते कुर्वती सितम् ॥ ५९ ॥

अमर-भारती मे मुखादियं प्रकटिता दिशो याचते मुहु. ।
तव यशः-पटं दंशरक्षणं ददति ता न चेद्वीयतां त्वया ॥ ६० ॥

खलदलं तु केनाऽपि हेतुना कुपविना विना द्वेष्टि सज्जनान् ।
दधति सज्जनाः किन्तु सत्क्षमां कवचवच्छुभे तावकाहिते ॥ ६१ ॥

भगवतीव सर्वत्र पश्यति प्रभवती समंभूतलं समम् ।
अपि तु यो भवेद्भावुकः पुनः प्रियतरो भवत्याः सवत्सवत् ॥ ६२ ॥

भवति देवि कोपोऽपि सद्गुणो महिषमर्द्दिनीवत्तवेन्दिरे ।
असुरनाशतो ह्येव रक्षणं भवति सज्जनानां विधेर्विधिः ॥६३॥

विलयमाशु गच्छत्यसौ जनो य इह ते यदि द्रुह्यति क्वचित् ।
भवति सोन्नतो यो निरीक्षितस्तव शुभानने सौम्यचक्षुषा ॥६४॥

अमृत नाहटो द्रोहमृद्धटो विलयमागतो देवि ते पुरः ।
विगत शोक गेहलोतमाल्यभृच्छुभनिरीक्षणान्मन्त्रितां श्रितः ॥६५॥

न सहसा क्रिया कापि जायते तव महेन्दिरे धैर्यधारिणि ।
गतविवेकबुद्धिर्विनाशयेत्सपदि सम्पदो हस्तगा अपि ॥६६॥

तव विवेकशालिन्यनुत्तमा सुमतिरिष्टदा सम्पदां शतम् ।
जनयति द्रुतं लोभिता गुणैर्हि मतिरेव तान्सम्प्रकर्षति ॥६७॥

भवति सर्वदा त्वत्पुरः शिवं यत इदं सदा तेऽक्षिणि स्थितम् ।
यदपि चक्षुषा त्वं प्रपश्यसि प्रभवति द्रुतं तच्छिवं शुभे ॥६७॥

त्वयि महापदं सत्प्रतिष्ठितं स्थिरसुखं दधत्यामहर्निशम् ।
अतिविशालराष्ट्रं सुभारतं प्रकुरुते न कामुन्नतिं वद ॥६८॥

सुनखसूत्रिकां योजनां शुभां सकलराष्ट्रदारिद्र्यनाशिनीम् ।
निखिलसम्पदां सूपपादिनीं धनविहीनपुंसां ! हितङ्करीम् ॥६९॥

दलितमानवैः स्वागतप्रियंवदसुवाचकैः स्वीकृतां सदा ।
नयसुकोविदैः सत्कृतां महापुरुष सद्ध्रुहृत्सौख्यवर्धिनीम् ॥७०॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विमलरत्नमालामिव श्रिया उरसि धारितां मानदायिनीम् ।
जलधिशायिना कौस्तुभान्वितां विनयवद्धृतां वक्षसि स्वके ॥७२॥

श्रुतिमुखाम्बुजस्फाटिकामिव गिरिशसूत्रवद्वर्णमालिकाम् ।
निखिलवाङ्मयाधारनन्दिनीं सुरपयस्विनीतुल्यसिद्धिदाम् ॥७३॥

अमरवृक्षसन्मञ्जरीमिवाऽनवरतश्रियोनिर्झरीमिव ।
अजनयच्छ्रियं वारिधिर्यथा त्वमपि देव्यदादिव्यदर्शिनीम् ॥७३॥

प्रथमसूत्रमस्या गुणस्रजः सवितृबिम्बवत्तेजसां निधिः ।
अधिकमन्नमुत्पाद्यतां यथा प्रबलसत्त्वसामर्थ्यमाप्यताम् ॥७५॥

मिलतु शुष्कभूमिः प्रवृद्धये सुतकनीकरीत्याऽधिकं जलम् ।
सकलभोज्य-वस्तून्नतेरियं भरतभूर्भवत्वात्मनिर्भरा ॥७६॥

द्विदलधान्यवृद्ध्यर्थयत्नकृत्समुपपादनं शाकवर्धनम् ।
विविधतैलवीजादिसर्षपाँस्तिलरयीन्बहूँश्चाभिवर्धय ॥७७॥

इदमवैतु सूत्रं द्वितीयकं प्रथमवन्महासिद्धिदायकम् ।
भवतु भारते स्नेहसाधनं तदुभभावयोरर्पणं यथा ॥७८॥

अधिकशक्तिमुद्वर्धयाऽऽवृतिं निखिलशिल्पसिद्ध्यै प्रयत्यताम् ।
सघनराष्ट्रियोद्योगवर्द्धने कुटिर-जातमुद्योजयेः कृतौ ॥७९॥

तव तृतीय-सूत्रं सुरत्नवत्, अनुपमेन्दिरे राष्ट्रभूषणम् ।
सुलभतामितो देश उत्तमं धनमनन्त कोट्यर्बुदाधिकम् ॥८०॥

कृषिमती क्षितिर्मुच्यतां कर-ग्रहणबन्धनाद्दीयताम्मुदा ।
सकलविघ्नबाधानिवृत्तये भुवनशासनं यत्नमाचरेत् ॥८०॥

इदमलभ्य-सम्पत्प्रदायकं तव तुरीय-सूत्रं महेन्दिरे ।
प्रमुख राष्ट्रसङ्घस्य नायिके मतिमतामपि स्वान्तहारकम् ॥८२॥

कृषिपरिश्रमं संस्कुरु द्रुतं समधिकप्रभावोपपादकम् ।
इदमनन्तसाफल्यदायकं भवति पञ्चमं सूत्रमुत्तमम् ॥८३॥

पुनरुपस्कुरु स्वस्थकर्मणे सुपरिवद्धमेनम्परिश्रमम् ।
इदमपि श्रियः प्रापकं महत्, मतिमतीन्दिरे षष्ट-सूत्रकम् ॥८४॥

समुपयुज्यतां प्रक्रमो महान्, श्रयतु तेन चोपेक्षितो जनः ।
समधिकाधिकं लाभमुत्तमं सुखमुपैधतामन्त्यजोऽप्यतः ॥८५॥

तव दयामिदं सप्तमं वचः प्रकटयत्यहोऽभूतपूर्विकाम् ।
धवलमुज्ज्वलं ते यशःश्रियो वसनमुत्तमं सुष्ठु दीव्यति ॥८६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मधुरमम्बुपेयं सुधोपमं सकलराष्ट्रियैर्लभ्यतां सुखम् ।
नगरवासिनो ग्रामवासिनो वसुमितेन सूत्रेण तर्पिताः ॥८७॥

वितरणं निवासाय सद्मनां गृहविहीननृभ्योऽल्पमूल्यतः ।
वसतिर्निर्मितिर्नूतना भवेदथ सहायतामाचरार्थिनाम् ॥८८॥

नवम-सूत्रमेतत्सुशोभनं धनविहीननॄणां सुतुष्टिदम् ।
दशमसूत्रमस्यैव पुष्टिदं सुकृतिरेति यत्स्वास्थ्यवर्द्धिनी ॥८९॥

अनिलभूम्यपां पार्श्वभाविनां विगतरोगतार्थं प्रयत्यताम् ।
अवनिमूल्यवृद्धिर्निरुध्यतां यदघना अपि स्युः समर्थिताः ॥८९॥

समुपचीयतां विद्युतो नलं भरतभूर्यतो दीव्यतान्मुदा ।
लघुतमोटजा अप्युरुप्रभा वितमसो भवन्तूषसेव भूः ॥९१॥

रवि-रिवेदमेकादशं स्थितं विगुण-चापधृद्द्रवदद्रुतम् ।
द्युमणि-संख्यकं सूत्रमास्पदं सकल-सम्पदां सँस्करोत्यमून् ॥९२॥

जनसमाजकल्याणकारिणः क्रमिव-कर्म्मणाम्प्रक्रमान्क्षणात् ।
महत ओजसः स्रोत आननं भवतु तेन सम्पादयेन्धनम् ॥९३॥

अनुकरोतु तं संयमं मुदा युवक-वर्ग आर्षं सुयत्नतः ।
भवतु राष्ट्रमेतेन सद्बलं सुमतिसन्ततिर्वीरतायुता ॥९४॥

इदमवेहि ते सूत्रमुत्तमं ह्यनुपमं समेषां त्रयोदशम् ।
उपगमिष्यति ह्येतदुत्तमां सफलतां सुराष्ट्रं समुन्नतिम् ॥९५॥

प्रति करोतु रोगस्य दुःसृतिं ह्युपकरोतु नैरुज्य-साधनम् ।
सुतनु नेत्रयोः कुष्ठमन्धतां क्षयरुजं महासर्पसम्मिताम् ॥९६॥

प्रतिनिरुध्य सम्यक्प्रभावतः कुरुत राष्ट्रमेतत्समुन्नतम् ।
इति चतुर्दशं सूत्रमीरितं सुदययेन्दिरे मन्त्रवत्त्वया ॥९७॥

कुरुत लाभदं कार्यसत्क्रमं वनगिरिस्त्रियामादिवासिनाम् ।
प्रथमतः शिशूनां तथा पयः प्रपिबतां स्तनासक्तवक्त्रतः ।

अपि च गर्भिणीनां हितङ्करं शिशुसुमातरो याः पयोभृतः ।
उपकृतिञ्च तासां विशेषतो वसतिरस्ति यासामुपेक्षिता ॥९९॥

त्रिगुणितेष संख्यात्मकं त्विदं सकल-सूत्रमूलाभिषेककृत् ।
अमुपमां मतिं सूचयत्यहो विबुधपूजिते इन्दिरे तव ॥१००॥

कुरुत सुप्रसारं प्रधानतः प्रथमशिक्षणस्यासमन्ततः ।
सकलविश्वमान्यस्य मूलतो भवतु राष्ट्रमेतत्सुशिक्षितम् ॥१०१॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विगतपञ्चमात्षष्ठ आयुषः प्रविशति स्वके वर्ष उत्तमे ।
सकल-बालिकाबालकेषु च ह्यति-विशेषतो धेहि शिक्षणम् ॥१०२॥

निरपसार्यतामबोधहीनताऽधिकवयस्क-पुंसां निवासिनाम् ।
लघुतरेषु सुग्रामकेष्वपि समुपयोज्यतां छात्रसंहृतिः ॥१०३॥

तिमिरनाशकं षोडशं महत्सुखमनामयं राति सूत्रकम् ।
सुदृढता भवेद्भारते यतः सुजनतन्त्रतायाः सुपद्धतेः ॥१०४॥

परिविवर्धय स्वल्पमूल्यकाः विपणिकाः शुभाः सार्वदेशिकाः ।
मुबिलतैलविक्रय्यकारिका अतिसुदूरभूक्षेत्रवर्तिनीः ॥१०६॥

अभिनवस्य यन्त्रस्य निर्मितिर्भवति यत्र तत्कर्म-चारिणाम् ।
लघुपरिश्रमार्थं गुरुक्रियासमुपपादनार्थं प्रयत्यताम् ॥१०७॥

विरचयन्तु सच्छात्रहेतवे भवनवाश्रमान्पुस्तकानि च ।
ददतु लेखनाऽभ्यासपुस्तिका अनतिमूल्यकास्तेभ्य आदरात् ।

अभिसमेधयोर्जस्विरक्षणं न हि भवेद्यथाऽपव्ययो महान् ।
सुलभसाधनैः स्वल्पसंख्यकैर्घनमपारमुत्पाद्यतान्धनम् ॥१०८॥

ऋषिनिशेशसंख्यं सुसूत्रकं गगनचुम्बिनीमुन्नतिं क्षणात् ।
सकलराष्ट्रसंव्यापिनीं हितामुपकरोति सन्तोषमात्मनि ॥१०९॥

व्यय-सुपद्धतिं व्यापिनीं तथा सुहितयान्त्रिकोद्योगनीतिसत्- ।
करण-संहितां मोददायिनीं कुरुत येन विश्वास उद्भवेत् ॥११०॥

सुविधया करोद्योगजीविनः स्वकुटि-तन्तुसन्तानकारिणः ।
सपदि लब्धसत्साधना जनाश्च सुभवन्तु ते स्वस्थजीविकाः ॥१११॥

विपुलमात्रया ग्रामवासिनः सुकरहस्तकोद्योगसेवया ।
समुपयुञ्जतां राज्ययोगतः स्वधिकलाभ आगृह्यताञ्च तैः ॥११२॥

ललितमेतदष्टादशं महद्भरतसूत्रवच्चार्षमन्त्रवत् ।
भरतदेशवासिभ्य उत्तमं सुमन इन्दिरे स्वर्पितं त्वया ॥११३॥

स्मगलरान्नराँश्चौरविक्रयान्करहरान्धृतद्रव्यकोष्ठकान् ।
प्रतिनिरुध्य कारागृहेषु तान् कठिनदण्डदानेन ताडय ॥११४॥

असितकक्षगं कृष्णदुर्धनं समपवार्य शुक्लं कुरु द्रुतम् ।
नवदशं सुसूत्रं प्रभावितं जनसमाजसौख्यं प्रवर्धयेत् ॥११५॥

अभिविवर्धयाशु प्रजाहितं सुखदकर्मसामर्थ्ययोग्यताम् ।
जननश[illegible] ॥११६॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चरमसंख्यकं विंशतेः क्रमाच्चणकगोत्रियार्थप्रकाशवत् ।
चरकसूत्रवद्रोग नाशकं सकल सूत्र जालं तवेन्दिरे ॥११७॥

शतकमिन्दिराया इदं महत् सुकवि गोपि कृष्णेन निर्मितम् ।
पठतु राष्ट्रसन्मानवोमहान् मनसि मोदतां तुष्यताद्धरिः ॥११८॥

हृदयसिंहपीठे विराजसे त्वमरिमित्रभावो सुविभ्रताम् ।
सुहृदपेक्षयाशत्रवोऽधिकं तव सुमूर्त्तिमन्तः सु बिभ्रति ॥११९॥

यदुपति यथा कंस उद्धतः क्षणमपि स्वचित्तान्न चाकरोत् ।
नहिरिमे तथा ते विरोधिनो सतत मेव ते त्वां भजन्ति हि ॥१२०॥

त्वमनयेन्दिरे सुप्रसिद्धया सुरनृणां सुरीत्या विरोधिनाम् ।
हृदयचित्पटेचित्रिता तथा, नहि ततः कदाचिद्विलुप्यसे ॥१२१॥

अरि सुहृद्गणास्त्वां महेन्दिरे अपि च ये ह्यु दासीन वृत्तयः ।
अभिनमन्ति सन्मान पूर्वकं ह्यतिविशेषतः किन्तु शत्रवः ॥१२२॥

गुण गणो हि ते चुम्बति स्वयं हृदय पङ्कजं भानुवक्त्रवत् ।
अथ कथन्न ते मानसाम्बुजं प्रविकसेद्धिसत्कारणे स्थिते ॥१२३॥

भवति ते गुणः कुत्रचिद्रविः शशधरोऽपि सञ्जायते क्वचित् ।
अनल वत्क्वचिद्वर्त्तते तथाऽप्यनिलवत्क्वचिज्जायते पुनः ॥१२४॥

तिमिरमर्कमुद्वीक्ष्य लीयते हसति सूर्यमालोक्य पङ्कजम् ।
विरहिणीनिशेशेन दाह्यते जलधिरेनमालोक्य वर्धते ॥१२५॥

अरिगणस्तवालक्ष्य सद्गुणं दहति तूलवद्भास्करेन्दिरे ।
गुणि सु सज्जना व्रघ्न सन्मुखाः जलधिका च वत्सञ्चकासति ॥१२६॥

अनुपमस्तवार्यें गुणोदधिः फलति यत्र नीतिः सुयोजिता ।
जलजजन्तु वद्वर्धतेऽनिशं ह्यु डुपशत्रु रत्रप्रमज्जति ॥१२७॥

नक्षत्रैः शतकं ह्येतदिन्दिरा-काव्यमुत्तमम् ।
राष्ट्रभक्ताः सुतुष्यन्तु पठित्वेदं सुसज्जनाः ॥१२८॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# त्रिधातुः त्रैधातवीयञ्च

नावल्पाक्कं श्री. देवनाथाचार्यः

कृष्णयजुर्वेदतैत्तिरीयसंहितायां, द्वितीयकाण्डे, तृतीयप्रश्ने, षष्ठे अनुवाके, 'त्रिधातु" संज्ञको यागो विहितः। "यंकामयेतान्नादस्स्यादिति तस्मा एतं त्रिधातुं निर्वपेत्" (तै. सं. २-३-६) इत्यस्य यागस्योत्पत्तिवाक्यम्। अनन्तरं "इन्द्राय राज्ञे पुरोडाशमेकादशकपालं-इन्द्रायाधिराजाय इन्द्राय स्वराज्ञे" इति श्रूयमाणेषु क्रियापदसाकांक्षेषु वाक्येषु, "निर्वपेत्" इति पदस्यानुषंगेण त्रयाणां यागानां प्रत्येकमुत्पन्नानां, प्रथमोपदर्शितं वाक्यं समुदायानुवादः इत्यपि निर्वाहस्साधीयान्। पौर्णमास्यधिकरणन्यायेनास्य समुदायानुवादस्यापि प्रयोजनं सुनिरूपमेव।

एतेषां त्रयाणामपि यागानां "त्रिधातुः" इति संज्ञा, प्रथमोपदर्शिते वेदवाक्ये विस्पष्टमुद्घुष्यते। एकादशकपालपुरोडाशरूपस्य द्रव्यस्य, एतेषु त्रिष्वपि यागेषु समानत्वेऽपि परस्परं भिन्नत्वात्—देवतानांच भिन्नत्वात् भिन्ना एवैते त्रयो यागाः। देवता च द्रव्यंचेति यागस्य द्वे रूपे। तयोरन्यतरस्य भेदेऽपि यागो भिद्येतैव। द्रव्यस्य भिन्नत्वे, देवतैक्येऽपि यागो भिद्यते। यथा दर्शेष्टौ दधियागः पयोयागश्च। अत्र इन्द्र एक एवानयोर्यागयोर्देवता। तथापि न यागैक्यम्। द्रव्यभेदात्। सम्प्रतिपन्नदेवताकत्वात्तु अनुष्ठानकाले अनयोर्यागयोः यौगपद्येनैवानुष्ठानम्। न पृथक्पृथक् इत्ययमन्यो विषयः।

"सप्तदशप्राजापत्यान्पशूनालभेत" इत्यस्मिन्वाक्ये, द्रव्यस्य देवतायाश्च ऐक्येपि न यागैक्यम्। अपि तु परस्परं भिन्नाः सप्तदश यागा एव विधीयन्ते। "प्रजापतिर्देवता अस्य इति प्राजापत्यः" इति प्रथमतरं प्राजापत्यशब्दं निष्पाद्य, अनन्तरं "प्राजापत्यश्चप्राजापत्यश्च" इति (सप्तदशकृत्वः) द्वन्द्वसमासमाश्रित्य "प्राजापत्याः" इति सरूपैकशेषः क्रियते। अथ 'तान्'"इति द्वितीयाबहुवचनमेलनेन "प्राजापत्यान्" इति शब्दो निष्पाद्यते। अत्र एकैकस्यापि पशोः प्रजापतिदेवतासम्बन्धः प्रथमतरं संपद्यते। अनन्तरमेव द्वन्द्वसमासः सरूपैकशेषश्च भवतः। अतः द्रव्यदेवतासंबन्धस्य सप्तदशकृत्वः अभ्यस्तत्वात् सप्तदशयागा एवैते। तेषामपि संप्रतिपन्नदेवताकत्वात्, "वैश्वदेवीं कृत्वा प्राजापत्यैश्चरन्ति,' इति कालविधानाच्च युगपदेवानुष्ठानम्, न पार्थक्येन। ऐन्द्रदधिपयोयागवत्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"त्रिधातु" नामकस्य प्रकृतयागसमुदायस्य प्रथमे यागे "इन्द्रो राजा" देवता। द्वितीये "इन्द्रोऽधिराजः"। तृतीये "इन्द्रः स्वराट्" त्रयाणामपि यागानामेतेषाम् इन्द्ररूपदेवतैक्यं यद्यपि आपाततः प्रतीयते, तथापि भिन्नभिन्नानि त्रीणि विशेषणानि इन्द्रस्य यतो त्रिविधवाक्येषु श्रुतानि तस्माद्देवताभेद एवात्र। इन्द्रं राजानमपेक्ष्य इन्द्रोऽधिराजोऽन्यः। आभ्यामुभाभ्यामपि इन्द्रस्स्वराट् भिन्न एव। अग्निश्शुचिः— अग्निः पावकः— अग्निः पवमानः— इत्यादीनि असंख्येयानि उदाहरणानि अत्र न दुर्लभानि। "विधिशब्दस्य मन्त्रत्वे भावस्स्यात्तेन चोदना" इति दाशमिकाधिकरणे अयं विषयस्सुनिरूपितो वरीवर्ति।

इमं त्रिधातुयागं निर्दिशन्तो व्याख्यातारः "त्रिपुरोडाशा इयमिष्टिः इति लिखन्ति। तिसृभ्यो देवताभ्यः भिन्नभिन्नाः त्रयः पुरोडाशा अस्या इष्टेर्द्रव्याणि। "त्रयः" पुरोडाशा भवन्ति" (तै. सं. २-३-६) इवि वेद एवैवं कथयति। परन्तु एकैकस्यापि पुरोडाशस्य एकादशकपालत्वं अत्र प्रत्यक्षतः श्रुतम्। इदं मनसि धर्तव्यम्। एतदनुसारी विशेषः अत्रैव पश्चान्निरूपयिष्यते।

एवमेव त्रिपुरोडाशा अन्यापि काचिदिष्टिरस्ति। सैव एतद्व्यास शीर्षके "त्रैधातवीयम्' इति निर्दिष्टा। इष्टिः—यागः— कर्म—इत्येवं विशेष्यतया उद्दिष्टानां प्रदानां त्रिष्वपि लिंगेषु विद्यमानत्वात् तदनुसारेण व्याख्यातॄणां यथोचितं व्यवहारो न दुष्यति। वेदवाक्ये तु "तस्मा एतं त्रिधातुं निर्वपेत्" इति पुंल्लिंग एव त्रिधातुशब्दः प्रयुक्तः "सर्वो वा एष यज्ञो यत् त्रैधातवीयम्" इति नपुंसकलिंग एव चत्रैधातवीयशब्दः प्रयुक्तः। तमेव न्यायं वयमनुसरामः। त्रैधातवीयनामकमिदं कर्म, तैत्तिरीयसंहितायामेव द्वितीयकाण्ड एव—चतुर्थप्रश्ने एकादशे द्वादशे चानुवाके विहितम्।

इयं त्रैधातवीयेष्टिः पूर्वोक्तायास्त्रिधात्विष्टेर्भिन्नैव। अस्या अपीष्टेः परस्परं भिन्नाः त्रयः पुरोडाशाः द्रव्यम्। इन्द्राविष्णू देवता। यागस्वरूपस्य द्रव्यदेवतस्यात्यन्त भिन्नत्वात्, त्रिधात्विष्टेरत्यन्तभिन्नैवेयं त्रैधातवीयेष्टिः। वेदे परस्परं भिन्ना असंख्याता यागास्तत्रतत्र विधीयन्त एव। एवं सति अनयोरुभयोः परं विशिष्य परस्परं भिन्नत्वप्रतिपादनं न तथा आवश्यकम्। शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तररूपैः कर्मभेदप्रमाणैः सुज्ञान एवायं विषयः प्रामाणिकानाम्। तथापि अनयोरिष्ट्योः- ऐक्यबुद्धिहेतूनां केषां चित् सत्त्वात् एवं निरूपणं क्रियते।

अनयोरुभयोरभेदबुद्धिजनकाविषयाः—:

(१) "त्रिधातुः" इति संज्ञा प्रथमयागस्य वेदेनैव दत्ता। "त्रैधातवीयं" इति द्वितीययागस्य संज्ञा च। एवं संज्ञाभेदादनयो र्भेदावगमस्य स्पष्टत्वेऽपि त्रैधातवीयेष्टिप्रस्तावे "यत् त्रिः प्रायच्छत त्रिः प्रत्यगृह्णात् तत् त्रिधातोस्त्रिधातुत्वम्" (तै. सं.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२-४-१२) इति त्रिधातुशब्देनैवास्या अपीष्टे निर्देशात्, उभयोरपीष्ट्योः "त्रिधातुः" इत्यभिन्नसंज्ञाकत्वस्य आपाततः प्रतीयमानत्वम्।

(२) त्रयः पुरोडाशा भवन्ति इतीदं वाक्यं द्वितीयकाण्डे तृतीयप्रश्ने षष्ठे अनुवाके त्रिधात्विष्टिप्रस्तावे यथैव पठ्यते तथैव द्वितीयकाण्डे चतुर्थप्रश्ने एकादशानुवाके त्रैधातवीयेष्टिप्रस्तावेऽपि पठ्यते।

(३) न केवलमेतावदेव। तेषां पुरोडाशानां ऊर्ध्वाधोभावेन स्थापनं (प्रथमम् एकः पुरोडाशः स्थाप्यते, तस्योपरि द्वितीयः, तस्याप्युपरि तृतीयः, इत्येवं रूपेण) उभयोरपि यागयोरेकरूपम्।

(४) तथा त्रिष्वपि पुरोडाशेषु अधस्तनस्य अल्पपरिमाणत्वं तदुपरितनस्य (मध्यमस्य) ततो ज्यायस्त्वं, तदुपरि स्थाप्यमानस्य तृतीयस्य पुरोडाशस्य ततोऽपि ज्यायस्त्वम्।

(५) होमार्थं कर्तव्ये हविरवदानेऽपि समानप्रकारत्वमनयो र्योगयोः। सच्छिद्रण वेणुदण्डादिसाधनेन, पुरोडाशत्रयोपरिभागात् अधो भागपर्यन्तं प्रवेशितेन, त्रिभ्योऽपि पुरोडाशेभ्यः सामस्त्येन कश्चिद्भागः उद्धर्तव्यः। अथ तस्य होमः कर्तव्यः। अन्येषु पुरोडाशहविष्केषु यागेषु तु, अध्वर्युः स्वहस्तेनैवावदानं कृत्वा जुहुयात्। अनयोर्यागयोस्तु न तथा।

प्रथमयागसंज्ञाभूतस्य "त्रिधातु" शब्दस्य द्वितीययागप्रस्तावेऽपि प्रयोगमभिलक्ष्य संज्ञैक्याशंका तु नैव समुन्मिषति। प्रथमयागस्य त्रिधातुः इति संज्ञा उत्पत्तिवाक्ये वर्तते। यं कामयेतान्नादस्यादिति तस्मा एतं त्रिधातुं निर्वपेत् इति तद्वाक्यम्।

द्वितीययागस्य तु "त्रैधातवीयेन यजेत" इति वाक्यादुत्पत्तिः। न चात संज्ञयोरैक्यं पश्यामः। "यत् त्रिः प्रायच्छत् त्रिः प्रत्यगृह्णात् तत्त्रिधातोस्त्रिधातुत्वं" इति तु त्रैधातवीययागार्थवादः। तदवलम्बनेन उत्पत्तिवाक्यावगता संज्ञा नान्यथयितुं शक्यते।

किंच प्रथमयागवाचकस्य त्रिधातुशब्दस्यार्थोऽन्यः। पृथिवी अन्तरिक्षं—द्यौः—इतीमे त्रयो लोकाः त्रिधातुशब्देन प्रत्याय्यन्ते तत्र। "यदिमान् लोकानभ्यतिरिच्यते" "तदिमान् लोकानभ्यत्यरिच्यत" इत्यादिवाक्यानि तत्र वर्तन्ते।

(१) त्रैधातवीयेष्टिप्रस्तावे विद्यमानस्य आर्थवादिकस्य त्रिधातुशब्दस्य तु नायमर्थः।

वृत्रेण त्रिवारं स्वस्य वीर्यं दत्तम्। विष्णुना च प्रतिगृहीतम्। तस्य वीर्यस्य धातुशब्देन तत्र निर्देशः क्रियते। "अस्ति वा इदं मयि वीर्यं तत्ते प्रदास्यामि" इति तद्विष्णुः प्रत्यगृह्णात्' इति विष्णोः वृत्तदत्तवीर्यप्रतिग्रहप्रतिपादकं वृत्रस्य वचनम्। "तद्विष्णुः प्रत्यगृह्णात्" इति

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

वाक्यम् । इदमुभयं त्रैधातवीयेष्टिप्रतिपादकानुवाके वर्तते । तदवलंबनेन यत् त्रिः प्रायच्छत् त्रिः प्रत्यगृह्णात् तत् त्रिधातोस्त्रिधातुत्वम्" इति त्रिधातुशब्दनिर्वचनं तत्र क्रियते । तद्धितान्तत्रैधातवीयपदान्तर्भूतत्रिधातुशब्दविवरणमेतत् । न हि तावता तावन्मात्रस्य यागनामत्वं शक्यशंकम् । त्रैधातवीयं, इत्येव त तद्यागस्य नामधेय उत्पत्तिवाक्यावगतम् । अतस्संज्ञया कर्मभेदोऽत्र सुप्रतिष्ठितो भवति ।

(२) रूपभेदाच्च नानयोर्यागयोरभेदो युज्यते । द्रव्यं च देवता च यागस्य द्वे रूपे । तत्र द्रव्यमुभयोरपि यागयोः पुरोडाशत्रयात्मकमेव । "त्रयः पुरोडाशा भवन्ति" इति वचनस्य उभयत्रापि समानत्वात् । तथापि तत्र विस्पष्टं भेदो वरीवर्ति ।

द्वितीययागे, त्रिषु पुरोडाशेषु मध्यमस्य यवमयत्वम् नियम्यते आद्यस्य अन्त्यस्य च व्रीहिमयत्वमनुमन्यते । "यवमयो मध्य एतद्वा अन्तरिक्षस्य रूपं समृद्ध्यै" इति वाक्यादयमर्थोऽवगम्यते । प्रथमयागे तु नायं नियमः ।

तथा प्रथमयागे विद्यमानास्त्रयोऽपि पुरोडाशा एकादशकपालाः । 'इन्द्राय राज्ञे पुरोडाशमेकादशकपालम्, इन्द्रायाधिराजाय इन्द्राय स्वराज्ञे" इति वाक्येषु, द्वितीयतृतीययोः द्रव्यनिर्देशाभावेन साकांक्षयोः, प्रथमवाक्यस्थस्य "एकादशकपालम्" इति पदस्यानुषंगेण नैराकांक्ष्यं सम्पादनीयम् । तस्मात् त्रयाणामपि पुरोडाशानां एकादशकपालत्वं स्वरससिद्धमत्र ।

द्वितीययागे तु नैवम् । तत्रत्यास्त्रयोऽपि पुरोडाशाश्चतुष्कपालाः । "द्वादशकपालः पुरोडाशो भवति ते त्रयश्चतुष्कपालास्त्रिषमृद्धत्वाय" इति तत्र पठ्यमानाद्वाक्यात् इदमवगम्यते । "वैश्वानरं द्वादशकपालं निर्वपेत्" इत्यादावपि द्वादशकपालः पुरोडाशो वर्तत एव । परन्तु एक एवासौ द्वादशस्वपि कपालेष्वधिश्रीयते । अत्र तु द्वादशकपालपुरोडाशस्य एकत्वं नास्ति । त्रित्वमेवास्ति । द्वादशकपालानि त्रैधा विभज्येरन् । एकैकस्य विभागस्य चत्वारिचत्वारि कपालानि भवन्ति । तदुपरि त्रयाणां पुरोडाशानामधिश्रयणमत्र क्रियते । अयमेव विशेषः पूर्वप्रदर्शितवाक्यादवगम्यते । एवं प्रथमयागापेक्ष्या द्वितीययागस्य द्रव्यभेदो दर्शितः । देवताभेदोऽप्यनयोर्यागयोः स्पष्टतरः । प्रथमस्य यागस्य (१) इन्द्रो राजा, (२) इन्द्रोऽधिराजः, (३) इन्द्रस्स्वराट्, इति तिस्रो देवता. । अतो यागत्रयात्मिकेयं त्रिधात्विष्टिः । तिसृणामपि देवतानां परस्परनिरपेक्षाणां तत्तद्यागांगत्वात् । द्वितीययागस्तु न तथा । इन्द्राविष्णु अस्य देवता । तयोरुभयोर्व्यासिज्यवृत्तिदेवतात्वमेकम् । अग्नीषोमौमित्रावरुणौ-इन्द्रा बृहस्पती-इत्यादिवत् । अत एकएवायं यागः । "तस्मादैन्द्रवैष्णवं हविर्भवति" इति तत्रत्यं वाक्यं इममर्थं विशदयति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं तत्तद्यागप्रयोगेपि भूयांसो विशेषा वर्तन्ते । याज्या पुरोऽनुवाक्यारूप-प्रधानयागीयमन्त्राणामपि अत्यन्तवैलक्षण्यमनयोर्यागयोर्वरीवर्ति । "पुरोऽनुवाक्यामनूच्ययाज्यया जुहोति" (तै० सं० ३-४-१०) इत्ययं कृत्स्नयागसाधारणो विधिः। तत्तद्यागीयदेवताप्रतिपादकमन्त्रयोरेव ईषद्भेदेन पुरोऽनुवाक्यात्वं च संपद्यते । "पुरस्ताल्लक्ष्मा पुरोऽनुवाक्या भवति-उपरिष्टाल्लक्ष्मा याज्या" (तै० सं० २-६-२) इति वेदेनैव तयोः स्वरूपं निरूपितम् । अत्र "लक्ष्म" शब्दः "चिह्न" वाची सन्, उद्दिष्टदेवताया नामधेयं बोधयति । तस्यैव ऋगन्तरापेक्षया झटिति व्यावृत्ति गमकत्वात् । वेदसंप्रदाये च "आग्नेयी" "ऐन्द्री" "वारुणी" "सावित्री" इत्यादि-प्रकारेण देवतानामावलंबनेनैव मन्त्राणां परिचयः अनुभूयते । यस्यामृचि उद्दिष्ट-देवतानामधेयं पुरस्तादेव (आरंभे-प्रथवा-पूर्वार्त्रे) विद्यते, सा "पुरस्ताल्लक्ष्मा" "पुरोऽनुवाक्या" इति व्यपदिश्यते । यागानुष्ठानाव्यवहितपूर्वकाले अस्या अनुवचनं होत्रा कर्तव्यम् । एवं यस्यामृचि उद्दिष्टदेवतावाचकं पदमुपरिष्टात् (उत्तरार्धस्यादौ मध्ये अन्ते वा) विद्यते सा "याज्या" इति व्यवह्रियते । इयं च यागकाले होत्रा पठितव्या । तदन्ते च अध्वर्युणा अग्नौ हविषः प्रक्षेपः कर्तव्यः । तत्समकालमेव च यजमानेन, "इदं न मम" इत्येवं त्यागरूपो यागः कर्तव्यः । "मन्त्रान्तेन कर्मादि-स्सन्निपात्यः" इति नियमात् । इत्थं याज्या पुरोनुवाक्ययोः उपरिष्टाल्लक्ष्मत्वं पुरस्ताल्लक्ष्मत्वं, तत्तद्यागीयदेवताप्रतिपादकत्वं, तत्तद्यागकाले प्रधानमन्त्रत्वेन अवश्यपठनीयत्वं च नियतम् । "काम्येष्टियाज्यानुवाक्याकाण्डम्" इति समाख्याते वेदभागे एते मन्त्राः' क्रमशः पठिता वर्तन्ते । तत्र प्रकृतयागद्वये, प्रथमस्य "त्रिधातु" यागस्य याज्याः पुरोनुवाक्याश्च द्वितीयकाण्डे चतुर्थप्रश्ने अन्तिमानुवाके पठ्यन्ते । (अत्र वक्तव्यो विशेषोऽस्ति । तं पश्चाद्वक्ष्यामः)

त्रैधातवीयसंज्ञस्य द्वितीययागस्य याज्यापुरोनुवाक्याश्च, तृतीयकाण्डेद्वितीय-प्रश्ने-अन्तिमानुवाके पठ्यन्ते । अतः प्रधानमन्त्रेऽपि अनयोर्यागयोरत्यन्तवैलक्षण्यं स्पष्टतरम् ।

एवमुपर्यधोभावेन स्थापितस्य पुरोडाशत्रयरूपस्य हविषः अवदाने-होमे-यजमानकर्तव्ये हविस्त्यागे च अत्यन्तवैलक्षण्यमनयोर्यागयोः शास्त्रतः याज्ञिकानामनुष्ठानतश्च प्रसिद्धम् ।

त्रिधातुनामकस्य प्रथमयागस्य त्रयः पुरोडाशाः एकादशकपालाः इत्यवोचाम । अत्रायं विशेषः । एकैकस्यापि पुरोडाशस्य प्रत्येकं एकादश-कपालानि इति समुदितकपालसंख्यया त्रयस्त्रिंशता भाव्यम् । न चैवमत्र भवति । एकादशैवकपालानि स्थाप्यन्ते । तदुपरि एकस्य पुरोडाशस्याधिश्रयणं क्रियते । तस्योपरि द्वितीयस्य

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरोडाशस्य-तस्याप्युपरि तृतीयस्य पुरोडाशस्य अधिश्रयणं क्रियते । एवं सकृदुपहितेषु एकादशसु कपालेष्वेव त्रयाणामपि पुरोडाशानामुपर्यधोभावेन अधिश्रयणे क्रियमाणे सति, अधस्तनस्यैव पुरोडाशस्य एकादशभिः कपालैस्सह साक्षात् संबन्धो भवति । उपरितनयोस्तु पुरोडाशयोः एकादशकपालसंबन्धिसंबन्ध एव भवति । तथापि त्रयोऽप्येते पुरोडाशाः एकादशकपालाः इत्येव वेदे व्यपदिश्यन्ते । एवमूर्ध्वाधोभावमापादितानां त्रयाणामपि पुरोडाशानां तथाभूतानामेव वेद्यामासादनं तथाविधेभ्य एव तेभ्यो नलकादिप्रवेशेन अवदानं होमश्च क्रियते अस्मिन्यागे ।

अत्र सूत्रकारवचनमित्थम्—

"अथैतं त्रिधातुं एकादशसु उत्तानेषु कपालेषु अधिश्रयति, प्रथमं पुरोडाशमधिश्रित्य परितपनान्तं कृत्वा, तस्मिन्नुपरि ज्यायांसमधिश्रित्य तावदन्तमेव कृत्वा तस्मिन्नुत्तरं ज्यायांसमधिश्रयति । प्रचरणकाले दक्षिणार्धात्प्रथमां देवतां यजेत् मध्यात् द्वितीयां उत्तरार्धात् तृतीयां, सर्वेषामभिगमयन्नवद्यति" इति ।

त्रैधातवीयसंज्ञके द्वितीययागे एवं नास्ति । "द्वादशकपालः पुरोडाशो भवति" इति प्रथममभिधाय, समनन्तरमेव ते त्रयश्चतुष्कपालाः इति विवरणं क्रियते । पूर्वमेवेदमुपापादयाम । कपालानां द्वादशत्वं चतुष्कपालत्रयरूपतया सम्पन्नम् । एकैकस्मिन् कपालचतुष्टये एकैकस्य पुरोडाशस्याधिश्रयणम् । एवं प्रत्येकं कपालचतुष्टये अधिश्रितानां पुरोडाशानां वेद्यामासादनकाल एव ऊर्ध्वाधोभावेन स्थापनं क्रियते ।

नलकप्रवेशनेन हविरवदीयते । ऐन्द्रावैष्णवपुरोनुवाक्यानुवचनं, तद्दैवत्ययाज्यापठनं, तत्समकालं अग्नौ सकृदेव हविःप्रक्षेपः, यजमानेन च तत्समकालं सकृदेव "इन्द्राविष्णुभ्यामिदं न मम" इति हविस्त्यागरूपयागस्यानुष्ठानंचात्र क्रियते । यागोप्येक एव । त्रिधात्विष्टौ तु त्रयो यागाः ।

एषां त्रयाणां यागानां याज्यापुरोऽनुवाक्ययोर्विशेषः कश्चन वर्तते । पूर्वमेव प्रतिज्ञातमेतं विषयमद्य निरूपयामः ।

"पुरोनुवाक्यामनूच्य याज्यया जुहोति" इति सर्वयागसाधारणवचनानुसारेण एतेषां त्रयाणां यागानां षट्मन्त्राः अवश्यापेक्षिताः । तिस्रः पुरोनुवाक्याः—तिस्रो याज्याश्च । ते व मन्त्राः तत्तद्यागीयदेवतानामाङ्किताःस्युः ।

काम्येष्टियाज्यानुवाक्याकाण्डेतुत्रय एव मन्त्राः एतद्याग क्रमे पठ्यन्ते । एकैकस्य यागस्य एकैको मन्त्र इति यावत् । तद्यथा—

प्रथमो मन्त्रः इन्द्रं राजानं प्रतिपादयति । अयं पुरोऽनुवाक्यात्मकः । ऋचः पूर्वार्धं एव देवतानाम्नो निविष्टत्वात् । याज्यारूपो मन्त्रः अस्य यागस्य नास्त्येव ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवमेव द्वितीययागस्यापि। एक एव मन्त्रः "इन्द्रमधिराजं" प्रतिपादयन्वर्तते। सोऽपि पुरोऽनुवाक्याम्पः, पूर्वार्धे एव देवतानामांकितत्वात्।

तथा तृतीययागस्यापि एक एवमन्त्रो वर्तते। स तु याज्यारूपः उत्तरार्धे देवतानामांकितत्त्वात्।

एवं षण्णां मन्त्राणामवश्यापेक्षितत्वे सति, त्रय एव मन्त्राः अध्ययनसम्प्रदाये समुपलभ्यन्ते। इमां न्यूनतां एतद्यागप्रतिपादको ब्राह्मणरूपो वेद एव निरूपयति। कथंचित् एकैकस्य यागस्य मन्त्रद्वयलाभोपायं स्वयमेव सूचयति। "व्यत्यासमन्वाहानिर्दाहाय" इति व्यत्यासेनानुवचनं विधत्ते। एवं कृते न्यूनता परिहृता भवति। एकैकस्यापि यागस्य याज्या पुरोनुवाक्या रूपौ द्वौ द्वौ मन्त्रौ लभ्येते।

कथमिदं घटते ? व्यत्यासानुवचनप्रकारं विशिष्यनिरूपयन् श्रौतसूत्रकारः इदं स्पष्टीकरोति। तच्च सूत्रमित्थम्—:

"प्राच्यां दिशि त्वमिन्द्रेति तिस्र ऋचो व्यत्यासमन्वाह—प्रथमामनूच्य मध्यमयायजेत्—मध्यमा—मनूच्योत्तमया यजेत्—उत्तमामनूच्य प्रथमया यजेत्, एवं सर्वाः याज्याश्च पुरोऽनुवाक्याश्च भवन्ति"

इति। मन्त्रद्वयसाध्यस्य यागस्य एकमन्त्रलोपे देवतायै हूयमानः पुरोडाशो निर्दग्धो भवेत्। सूत्रकारोपदिष्टप्रकारेण व्यत्यासानुवचने कृते एकैकस्य यागस्य मन्त्रद्वयं सम्पद्यते। पुरोडाशानां निर्दाहो न प्रसज्यते। प्रकृतसूत्रे "अनूच्य" इत्यस्य "पुरोऽनुवाक्यात्वेन पठित्वा" इत्यर्थः। "यजेत्" इत्यस्य "याज्यात्वेन पठेत्" इत्यर्थः।

तदनुष्ठानप्रकारश्चेत्थम्—:

विद्यमानेषु त्रिषु मन्त्रेषु आद्यौ द्वौ मन्त्रौ प्रथमयागस्य पुरोऽनुवाक्या च याज्या च भवतः। तथा द्वितीयतृतीयमन्त्रौ द्वितीययागस्य पुरोऽनुवाक्यात्वं याज्यात्वं च भजतः। एवं तृतीयप्रथमौ मन्त्रौ तृतीययागस्य पुरोऽनुवाक्यात्मना याज्यात्मना च पठितव्यौ। अनेन प्रकारेण एकैकस्य मन्त्रस्य द्विर्द्विः आवृत्या मन्त्राणां षट्त्वं सम्पन्नं भवति।

इदमत्रावधेयम्—:

नदीप्रवाहेण बलादाकृष्यमाणः यथाकथंचित् स्वात्मसंरक्षणाय तत्र तत्र सन्निहितं कुशकाशादिकं यथा हस्तेन दृढतरं गृह्णाति, तत्तुल्यमेवेदम्।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अनेन व्यत्यासानुवचनेन प्रतिज्ञामात्रशरणं (तत्तल्लक्षणाभावेन) मन्त्राणां याज्यात्वं पुरोनुवाक्यात्वं च भवति। तथा यागीयदेवताप्रकाशनासमर्थस्य (अन्यदेवताप्रकाशकस्य) मन्त्रस्य हठात्कारेण तत्तद्यागेषु निर्बन्धवशात्क्रियते । ऐन्द्र्या गार्हपत्योपस्थान इव अत्रापि मन्त्राणामुपयोगो भवति। "अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावस्स्यात्" (पूर्वमीमांसादर्शनम् ६-१-१२) इत्ययमपि मीमांसकसम्प्रदायोऽनादृतो भवति। यदि स्वेच्छया वयमेवं प्रवर्तामहे, तदा "महानयमतिक्रमः" इति आक्रोशस्समुन्मिषेत्। वेद एव साक्षात् इत्थं कर्तव्यमिति विधत्ते प्रकृतयागविषये सूत्रकारोऽपि तत् विविच्य निरूपयति। अतः "वचनात्प्रवृत्तिः" इत्याश्वासयितव्य आत्मा।

एवमेव सर्वपृष्ठेष्ट्यामपि व्यत्यासेनानुवचनं विहितमस्ति। (तै०सं०२-३-७) तत्र हि देवताः षट्। क्रमसमाम्नातामन्त्राः पंचैव। एको मन्त्रः प्रदेशान्तरादानीयते। तेन मन्त्राणां षट्त्वं संपद्यते। तावतापि न विवक्षितपूर्तिः। षण्णां देवतानां द्वादशमन्त्रा अपेक्षिता इह। प्रकृतत्रिधात्विष्टाविव तस्यामपि सर्वपृष्ठेष्टौ षण्णामेव मन्त्राणां व्यत्यासानुवचनेन—याज्या पुरोऽनुवाक्यालक्षणानादरेण च द्वादशत्वं संपाद्यते। ऐन्द्रीयागस्तावत् जागर्त्येव एवंविधं संकटं प्रति समाधातुम्।

इदमेतावति विसृज्य, अस्यामेव त्रिधात्विष्टौ अवश्यवक्तव्यं कंचन विशेषं विवृणुमः। यागत्रयात्मिकाया अस्या इष्टेः तिस्रो देवता इति पूर्वमेवावोचाम। यागानुष्ठानसमये प्रधानदेवतानामंगदेवतानाच तत्तन्नाम्ना संकीर्तनं कर्तव्यं भवति। प्रथमाविभक्त्यन्तत्वेन —द्वितीयाविभक्त्यन्तत्वेन-चतुर्थीविभक्त्यन्तत्वेन-षष्ठीविभक्त्यन्तत्वेन च देवतानामधेयस्य तदातदा निर्देशः क्रियते। आग्नेययागे इमं निर्देशं प्रदर्शयामः—

(१) अस्या इष्टेः अग्निः प्रधानदेवता (प्रथमान्तं)

(होतुर्वाक्यमिदम्)

(२) अग्निं यज। (होतारं प्रति अध्वर्योः प्रैषः द्वितीया)

(३) अग्नये अनुब्रूहि (इदमपि पूर्ववदेव—चतुर्थी)

(४) अग्नेरहं देवयज्यया (यजमानवाक्यं, षष्ठी)

अयमग्निशब्दः इकारान्तः पुल्लिंगः। हरिशब्दवत्। सर्वास्वपि विभक्तिषु अस्य शब्दस्य रूपभेदाः व्याकरणशास्त्रानुसारेण सुप्रसिद्धा विराजन्ते। तासु चतसृणां विभक्तीनां एकवचनान्तं रूपं परं यागप्रयोगकाले समुच्चार्यते। एवमेव सूर्यादिदेवतानामपि तत्तद्यागे चतसृषु विभक्तिषु निर्देशो भवति।" "आग्नेयोऽष्टाकपालः" "सौर्यं चरुम्" इत्येवं तद्धितान्तानामपि पदानां तदन्तर्गतदेवतावाचकशब्दस्वरूपं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

पुरस्ताद्वा—पश्चाद्वा—वेद एव निर्दिश्यते। "अग्निमेव स्वेन भागधेयेनोपधावति" "अग्नये वो जुष्टं प्रोक्षामि" "अग्नेरहं देवयज्यया" "अग्निर्वा अकामयत" इत्यादिकं द्रष्टव्यम्।

एवमस्यामपि त्रिधात्विष्टौ तिसृणामपि देवतानां पूर्वोपदर्शितविभक्ति-चतुष्टये निर्देशः कर्त्तव्यो भवति। प्रथमयागे इन्द्रोऽराजा देवता। एतद्विषये न कोऽपि क्लेशलेशो विद्यते। इन्द्रो राजा—इन्द्रं राजानम्—इन्द्राय राज्ञे—इन्द्रस्य राज्ञः—इत्यादिनिर्देशः स्वारसिको वरीवर्ति। एवमेवद्वितीययागस्यापि "इन्द्रोऽधिराजः—, इन्द्रमधि राजम्—इन्द्रायाधिराजाय—इन्द्रस्याधिराजस्य" इति।

तृतीययागीयदेवतायाः उक्तविभक्तिचतुष्टयेऽपि निर्देशकरणे सुमहान् क्लेशो भवति। इन्द्रस्स्वराट्—अथवा—इन्द्रस्स्वराजा अस्य तृतीययागस्य देवता इति निर्णेतुं न शक्यते। वेदे तु उभयथापि निर्देशो दृश्यते। कं उपाददमहे, कं परित्यजाम इत्येवात्रविचारः।

एतद्यागीयक्रमसमाम्नाते मन्त्रे "स्वराट्" इति देवतानिर्देशो दृश्यते। तद्यथा "अस्ये देव प्ररिरिचे महित्वं दिवः पृथिव्याः पर्यन्तरिक्षात् स्वराडिन्द्रो दम आविश्व-गूर्तस्स्वरिरमत्रो ववक्षे रणाय"॥ (तै. सं. २-४-१४) इत्यस्य यागस्य पाठक्रमप्राप्तो मन्त्रः। "याज्या" लक्षणविशिष्टे अस्मिन् मन्त्रे उत्तरार्धोपक्रमे "स्वराट्" इति देवतावाचकं पदं स्पष्टतरं दृश्यते। एतदनुसारेण देवतानिर्देशः "स्वराट्—स्वराजम्—स्वराजे— स्वराजः—इति सिद्ध्यति।

एतद्यागविधायके ब्राह्मणरूपे वेदभागे तु नैकरूपो देवता निर्देशः प्रदृश्यते—

(१) इन्द्रं स्वराजानम् (द्वितीया विभक्तिः)

(२) इन्द्राय स्वराज्ञे (चतुर्थी विभक्तिः)

(३) असाविन्द्रस्स्वराट् (प्रथमा विभक्तिः) (ते. सं. २-३-६)

इति विभक्तित्रये निर्देशो दृश्यते। षष्ठ्यन्तनिर्देशः परं न दृश्यते। "इन्द्रस्य स्वराज्ञः" इति सोऽप्यभ्यूहितुं शक्यत एव। परन्तु "असाविन्द्रस्स्वराट्" इति प्रथमा-निर्देशोऽत्र परिपन्थी भवति। "विराट्" "सम्राट्" इत्यादिवत् "स्वराट्" इत्यस्यापि जकारान्तत्वमेव न तु नकारान्तत्वम्। एवं सति "स्वराट्" इत्युपक्रम्य "स्वराजम्" स्वराज्ञे-स्वराज्ञः-इत्यादिरूपसंयोजनं नैवोपपद्यते। तुल्यन्यायतया—विराजानं-विराज्ञा-विराज्ञे-इत्यादीनां रूपाणामप्यापत्तेः। एवमेव अधिराजानं-अधिराज्ञे-इत्यादीनामप्या-पत्तेः। वेदे न हि तथा दृश्यते। 'अधिराजं-अधिराजाय" इत्येव हि दृश्यते। अतः त्रिधात्विष्टौ तृतीयस्य यागस्य देवतानिर्देशे भ्रमोऽस्त्येव। मन्त्रस्थस्य "स्वराट्"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति प्रथमैकवचनान्तस्य पदस्य तथैव ब्राह्मणेनानूदितस्य च परिग्रहेण जकारान्तत्व-समाश्रयणेन "स्वराट्-स्वराजम्-स्वराजे-स्वराजः इति देवतानिर्देशः चतसृषु विभक्तिषु क्रियतां वा ? आहोस्वित्—

"इन्द्रं स्वराजानं-इन्द्राय स्वराज्ञे" इति ब्राह्मणवाकयस्थनिर्देशानुसारेण, समासान्तस्यापि राजन् शब्दस्य छान्दसं टच्प्रत्ययान्तत्वाभावमभ्युपगम्य, "स्वराजा-स्वराजानं-स्वराज्ञे-स्वराज्ञः- इत्येव देवतानिर्देशः चतसृषु विभक्तिषु क्रियतां वा ? इति संशयोऽत्र जायते । कतरस्य ग्रहणं ? कतरस्य उपेक्षा ? किं मन्त्रब्राह्मण विरोधे मन्त्रस्य प्राबल्यम् ? उत ब्राह्मणस्य ? इति संशयः पर्यवस्यति ।

केचन वदन्ति मन्त्रस्यैव-प्राबल्यमिति । कुतः ? विधायकं वाक्यं ब्राह्मणम् । तस्य यज्ञप्रयोगसमये नास्ति व्यापारः । प्रयोगाद् बहिरेव स्वार्थं विधाय चरितार्थं तत् । यागीयदेवतानिर्देशस्तु यागप्रयोगकाले कर्तव्यः । तदानीं अन्तरंगतया मन्त्राः समुपतिष्ठन्ते । अनुष्ठेयार्थप्रकाशकत्वं हि मन्त्राणां सिद्धान्तितम् । तस्मान्मन्त्रोक्त-रीत्यैव देवतानिर्देशः कार्यः । अत एव पंचमाध्याये क्रमनिरूपणपरे ब्राह्मणपाठापेक्षया मन्त्रपाठस्य बलीयस्त्वं भगवता जैमिनिमहर्षिणा स्थापितम् ।

"मन्त्रतस्तु विरोधे स्यात् प्रयोगरूपसामर्थ्यात् तस्मादुत्पत्तिदेशस्सः" (पू० मी० द० ५-१-६) इति सूत्रेण । न चायं क्रमनिरूपण मात्रोपयोगी न्याय इति मन्तव्यम् । प्रयोगकाले अन्तरंगतया उपस्थितत्वरूप युक्तेस्तुल्यत्वेन देवतानिर्देश-विषयेऽपि स्वरसतया प्रवृत्तेः । अत एव यत्र मन्त्रपाठ एव नास्ति तत्रैवागत्याबहिरंग-स्यापि ब्राह्मणपाठस्य उपयोगो वर्णितः । तस्मात् प्रकृतत्रिधात्विष्टितृतीययागे, मन्त्रपाठानुसारेण "स्वराट्-स्वराजं-स्वराजे-स्वराजः इत्येव चतसृषु विभक्तिषु देवतानिर्देशः कार्य इति ।

अन्ये तु इदं नांगीकुर्वन्ति । सर्वेष्वपि यागेषु देवताप्रापकं विधायकं ब्राह्मण वाक्यमेव । तद्विहितदेवतावैशिष्ट्येन प्रथमतरं यागस्वरूपमवधृतं भवति । पश्चात् यागप्रयोगकाले उपस्थितानां मन्त्राणां पूर्वतरावधृत यागीयदेवतास्वरूपविपरिवर्तन क्षमता नैवास्ति । प्रत्युत मीमांसक मते शब्दस्वरूपातिरिक्तदेवताभावात्, विधिघटक देवतावाचकशब्दस्य येन केनापि कारणेन अन्यथाकरणंनैव कर्तुं शक्यम् । "यदाग्ने-योऽष्टा कपालः, सौर्यं चरुं निर्वपेत्" वायव्यं श्वेतमालभेत" इत्यादिस्थलेषु यागस्य उत्पत्तिवाक्यभूतेषु उदाहृतविधिवाक्येष्वेव देवतास्वरूपनिर्धारणं सुसम्पन्नम् । तस्यान्यथाकरणं नैव शक्यम् ।

"विधिशब्दस्य मन्त्रत्वे भावस्स्यात् तेन चोदना" (पू०मी०द० १०-४-१३)
"तथोत्तरस्यां ततौ तत्प्रकृतित्वात्" (१०-४-१४)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति दाशमिकाधिकरणयोः अयमेवार्थः सुष्ठु प्रतिष्ठापितः ।

"अतश्च लाघवात् हविस्त्यागकालीनविहितशब्दोच्चारणकर्मत्वमेव देवतात्वम्"

"प्रकृतापूर्वसंबन्धिनीं देवतां विधिगतशब्देन प्रकाशयेत्"

इत्यादिभाट्टदीपिकाग्रन्थ पंक्तयोऽत्र भाव्याः ।

प्रकृतत्रिधात्विष्टितृतीययागस्य उत्पत्तिवाक्यं "इन्द्राय स्वराज्ञे" (पुरोडाशमेकादशकपालं निर्वपेत्) इत्येवं रूपम् । यागविधायके अस्मिन्वाक्ये नकारान्तस्यैव "स्वराजन्" शब्दस्य देवतात्वं विहितम् । तस्यान्यथाकरणं सर्वथा नोपपद्यते । तस्मात्—

इन्द्रः स्वराजा —इन्द्रं स्वराजानं-इन्द्राय स्वराज्ञे —इन्द्रस्य स्वराज्ञः— इत्येव चतसृषु विभक्तिषु देवतानिर्देशः कार्यः । "स्वराडिन्द्रः" इति एतद्यागीयमन्त्रघटकस्वराट्छन्दस्य तु, ऐन्द्रीन्यायेन विधिवाक्य चोदितनकारान्तेन्द्रस्स्वराजन् शब्दरूपदेवताप्रकाशकत्वं कथंञ्चित् कल्पयितव्यम् । तस्य मन्त्रस्य पाठक्रमेण एतद्यागांगत्वस्य प्राप्तेः अनुष्ठेयार्थप्रकाशनद्वारैव च (संभवताम्) मन्त्राणां तत्तद्यागांगत्वस्योपपादनीयत्वाच्च । अस्यामेव त्रिधात्विष्टौ, यावदपेक्षं मन्त्राणामभावेन विद्यमानानां त्रयाणामेव मन्त्राणां वेदविहितप्रकारेण व्यत्यासेनानुवचनं क्रियते । तत्र तत्तद्यागीयदेवताप्रतिपादनासमर्था एव मन्त्राः विधिबलादुच्चार्यन्ते । तत्तुल्यमिदमपि भविष्यति । अतो विधिवाक्यस्थमेव पदं देवतात्वेनोपादेयं नमन्त्रगतम्-इति साभिनिवेशं साधयन्ति ।

अपरे तु—"किमर्थमेतावान् विचारः ? प्रकृतविषये विधिमन्त्रयोर्विरोध एव नास्ति । वैदिकानां पदानां स्वरूपमन्यादृशम् । लोकदृष्ट्या तत्स्वरूपनिर्धारणं सुतरामसंगतम् । अतः यथादृष्टमेव देवतावाचिशब्दप्रयोगः कार्यः । इन्द्रः स्वराट् इत्येव प्रथमैकवचने, इन्द्रं स्वराजानं इति च द्वितीयैकवचने-इन्द्राय स्वराज्ञे-इत्येव चतुर्थ्येकवचने, इन्द्रस्य स्वराजः इति वा-इन्द्रस्य स्वराज्ञः इति वा यथेच्छं वैकल्पिकत्वेन षष्ठ्येकवचने च देवता निर्देशः क्रियताम् । एवं सति देवतानिर्देशे ऐकरूप्यं नास्ति इत्ययं दोषः उद्‌भाव्येत । नत्वेतदपपत्तिमत् । वैकल्पिकरूपद्वयवत्सु शब्देषु जरा शब्दवत् अन्यतर रूपस्य सर्वसम्प्रतिपन्नतया उपयोगदर्शनात् । तद्वत् प्रकृते, स्वराट् स्वराजा, स्वराजौ-स्वराजानौ-स्वराजः स्वराजानः-इत्येवं रीत्या सप्तमीविभक्तिपर्यन्तं रूपद्वयविशिष्टतयैव अस्य शब्दस्य वेदपुरुषसम्मतः पाठ इति अंगीकर्तव्यम् । उभयथापि वेदपाठदर्शनमेवात्र मूलम् । एवंच जकारान्तत्व-नकारान्तत्वयोः एतच्छब्दविषये वैकल्पिकत्वेन यथेच्छं एकैकत्र एकैकशब्दस्वरूपोपयोगो न वैरूप्य-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

हेतुर्भवति । "मत्यै" इति शब्दस्य यावानेवार्थः तावानेव "मतये" इति शब्दस्यापि । एतादृशस्थले यथेच्छप्रयोगो न दोषाय । अतोऽत्र मन्त्रस्य ब्राह्मणस्य च देवता स्वरूपविषये वैमत्यमेव नास्ति । कृतंविचारेण । इत्यभिप्रयन्ति ।

इतरे मन्यन्ते, व्यर्थोऽयं विचारः । अस्मिन् काले वेदस्याध्ययनमेव न क्रियते सर्वैः । तदर्थज्ञानन्तु दूरापेतमेव । एतदभावे वेदोक्तयज्ञानुष्ठानस्य न क्वापि प्रसक्तिरस्ति । "मनुष्याणां सहस्रेषु" इति गीताचार्यप्रदर्शितरीत्या यदि कश्चित् इमानि सर्वाणि सोपानान्युत्तीर्य यज्ञानुष्ठाने प्रवर्तते, सोऽपि नित्यनैमित्तिकयज्ञानुष्ठान एव विश्रान्तो भवति । न कदाचित् काम्येष्टिषु प्रवर्तेत । यज्ञानुष्ठानं हि बह्वाया-ससाध्यम् । "संकटाह्याहिताग्नीनां प्रत्यवायैर्गृहस्यता" इति हि महाकवेर्भवभूतेरनु-भवः । अकरणे प्रत्यवायजनकानां नित्यनैमित्तिककर्मणामनुष्ठानमवर्जनीयम् । काम्यानान्तु कर्मणामकरणे प्रत्यवायो नास्ति । तस्मात् केनापीमाः काम्येष्टयो न कदाचिदनुष्ठास्यन्ते । काम्येष्टिष्वन्यतमा चेयंत्रिधात्विष्टिः । अतो "मेषस्याण्डमियत्-पलम्" इत्यादितुल्योऽयं विचारः सर्वथा निष्फल इति । प्रधानतमवेदार्थविषयत्वादस्य विचारस्य न तथा उपेक्षा युज्यते । अत्र अस्मदभिमतः अभिप्रायः कश्चिदस्त्येव । तं पश्चाद्वक्ष्यामः । एवमेव आर्षसंस्कृतिशालिनां सर्वेषामेव प्रामाणिकानां अन्तर्वाणि-जनानां स्वस्वाभिमतरूपेण निर्णयाविष्करणं अवश्यप्राप्तमेव । केनचिदुक्तं अन्येन तथैवांगीकर्तव्यमिति नियमो नास्त्येव ।

अत्रान्तरे "अस्मिन्विषये प्रसिद्धतरविद्वद्वरेण्यानां प्रमादो जातः । स च तै लिखितेभ्यः ग्रन्थेभ्यः विस्पष्टं विज्ञायते । इमं विषयं संग्रहेण निरूपयामः ।

"प्रदानवदेव तदुक्तम्" इतीदं सूत्रं भगवता वेदव्यासेन अनुगृहीतेषु ब्रह्मसूत्रेष्वन्यतमम् । (ब्र. सू. ३.३.४२) अस्मिन् सूत्रे भगवान् बादरायणः उपासना विषयकविचारे स्वपक्षानुग्राहकतया संकर्षकाण्डोक्तं पूर्वमीमांसा न्यायं "तदुक्तम्" इति निर्दिशति । त्रिधात्विष्टिविषयक एवायं संकर्षकाण्डप्रतिपादितो न्यायः । तमेव व्यासार्या उपजीवन्ति ।

(१) (पूर्व) मीमांसाकोशः "प्राज्ञपाठशालामण्डलग्रन्थमाला" प्रकाशितः श्रीयुतकेवलानन्दसरस्वतीस्वामिभिः संपादितः ।

तत्र चतुर्थे भागे—१६७७-तमे पुटे—

"त्रैधातवीयायां पुरोडाशभेदेऽपि सहैवावदानम्" (संकर्ष. २-२-१४) इति पंक्तयो मुद्रिता वर्तन्ते ।

पुरोडाशभेदेऽपि सहैवावदानम् इत्ययमंशः त्रिधात्विष्टौ त्रैधातवीयेष्टौ च समानः । 'त्रयः पुरोडाशा भवन्ति" "उत्तरउत्तरोज्यायान्भवति" "सर्वेषामभि-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गमयन्नवद्यति" इति वेदवाक्यानाम् उभयोरपि इष्ट्योः प्रकरणे पठ्यमानत्वात् ।

अत्र संकर्षकाण्डद्वितीयाध्यायद्वितीयपादचतुर्दशाधिकरणोदाहरणं तु असंबद्धम् । अनेनैवोदाहरणेन अनयोरिष्ट्योः अभेदभ्रमः सम्पादकमहाशयानां मनसि प्ररूढो विलसतीति स्पष्टं ज्ञायते ।

तदेतत् विवृणुमः —

संकर्षकाण्डे द्वितीयाध्याये द्वितीय पादः "अवदानपादः" इति व्यपदिश्यते । हविरवदानविषयको विचारोऽत्र कृतोऽस्ति । तत्र त्रिधात्विष्टिहविरवदाने प्रदाने च संजातं अन्यथाग्रहणं पूर्वपक्षे उपन्यस्य यथावस्थितानुष्ठानप्रकारं सिद्धान्तयति भगवान् सूत्रकारः । तत्र त्रिधात्विष्टौ अवदानमधिकृत्य एकमधिकरणं—प्रदानमधिकृत्य एकमधिकरणं चेति द्वे अधिकरणे विरचिते स्तः । पूर्वाधिकरणे द्वे सूत्रे—अनन्तराधिकरणेत्रीणि च सूत्राणि । अयं संकर्षकाण्डः देवस्वामिविरचितभाष्यसहितः मद्रनगरविश्वविद्यालयेन मुद्रयित्वा १९६५ संवत्सरे प्रकाशितः । अस्य सम्पादकः मीमांसकपरिबृढः एस. सुब्रह्मण्यशास्त्रिमहोदयः । तत्र ८६, ८७ पुटयोरयं विषयो वर्तते ।

**(१) अधिकरणं-१५ (न तु मीमांसककोशरीत्या-१४) :—**

**सूत्रम्-तेषां पृथक्कृतानां निरवदानं यथान्येषां हविः पृथक्त्वात् । (२-२-३३)**
**(इति पूर्वपक्षः)**

**सूत्रं-वचनात्सर्वेषां सहावदीयेत न हि वचनं किंचित् बुभूषति । (२-२-३४)**
**(इति सिद्धान्तः)**

**अधिकरणम्-१६ :—**

**(२) सूत्रं—तेषां सहप्रदानमवदानैकत्वात् । (२-२-३५)**

इति पूर्वपक्षः

सूत्रं—नाना वा देवता पृथक्त्वात् । (२-२-३६)

(इति सिद्धान्तः)

सूत्रं—अन्यार्थदर्शनाच्च । (२-३-३७)

अनयोरुभयोरधिकरणयोः देवस्वामिविरचिते भाष्ये त्रिधात्विष्टिविषयकं वाक्यमेवोदाहृतम् । न तु त्रैधातवीयेष्टिविषयकम् । सिद्धान्तयुक्तिश्च तत्रैव संगच्छते । त्रिधात्विष्टावेव देवतापृथक्त्वं वर्तते न तु त्रैधातवीयेष्टौ । तत्र तु देवतैक्यमेव । अतो "देवतापृथक्त्वात्" इति हेतुः तत्र न संगच्छते । त्रैधातवीयेष्टेः इन्द्राविष्णू देवता । अनयोरुभयोः व्यासज्यवृत्तिदेवतात्वमेकमेव । अतः एकदेवताक एवायं यागः ।" "एकदेवताकत्वं च देवतात्वाश्रयप्रतिपाद्यैकार्थकत्वम्" इति भाट्टदीपिकायां खण्डदेव

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मिश्राणां निर्णयः । त्रैधातवीयेष्टावस्यां हविषोऽवदानं-प्रदानंच सकृदेव । पृथक्त्व-शंकैवात्र नोदेति । देवतैक्यात् ।

त्रिधात्विष्टौ तु तिस्रो देवताः । तासां देवतात्वं प्रत्येकविश्रान्तम् । न व्यासज्यवृत्ति । अतः परस्परं भिन्नाः त्रय इमे यागाः । तत्र अवदानैक्यमवलम्ब्य प्रदानेऽपि यौगपद्यमाशंकितम् । देवतापृथक्त्वमवलम्ब्य प्रदाननानात्वं स्थाप्यते । गुणसूत्रं च इममेवार्थं द्रढयति । वस्तुतत्वे एवं भूते मीमांसाकोशसम्पादकमहोदयानां अत्र त्रैधावीयेष्टेर्विषयत्वलेखनं कथमुपपद्येत ?

अतिप्रौढमीमांसापण्डितानामेषां एवं विधं स्खालित्यं कथमिव जातम् ? अस्त्येवात्र कारणम् । "स्खलनं संभवत्येव गजस्यापि हि गच्छतः" इति न्यायेन एतेभ्यः पूर्वंतनाः प्रौढमीमांसकाः अत्र अन्यथा लिखितवन्तस्स्युः । एवं च तद्विषयक-प्रतिपत्तिभूम्ना सम्यगविचार्य तत् तथैवानुसृतवन्तः एते । इत्येवं अभ्यूहितुं प्रसक्ति-रस्ति । कथम् ?

(२) ब्रह्मसूत्रशंकरभगवत्पादभाष्यव्याख्यानेषु परिमलं इति कल्पतरुव्याख्या श्रीमदप्पय्यदीक्षितेन्द्रविरचिता जगत्प्रसिद्धा विराजते ।

"प्रदानवदेव तदुक्तम्" इति पूर्वोपदर्शितब्रह्मसूत्रव्याख्यानावसरे इदं स्खालित्य तत्र लब्धप्रसरं दृश्यते । तत्रत्याः पंक्तयः —

"अस्याः त्रिपुरोडाशायाः त्रैधातवीयाख्याया इष्टेः इति मुम्बई महानगरे सुप्रसिद्धे निर्णयसागरमुद्रणालये १९३८. ए.डि. संवत्सरे इदं पुस्तकं मुद्रापितम् । तत्र ८३८ तमे पुटे पूर्वंप्रदर्शितो ग्रन्थभागो वरीवर्ति । अस्य सम्पादकाश्च सुगृहीतनाम-धेयाः ब्रह्मश्री अनन्तकृष्णशास्त्रि महोदयाः । सूत्रभाष्ये-भामत्यां-कल्पतरौ च त्रिधात्विष्टिश्च अत्र (विना नामनिर्देशम्) उदाहृता । परिमलेऽपि तदनुसारेण त्रिधात्विष्टेरेव विषयः सविस्तरं निरूपितः । परं नामनिर्देशे अन्यथाभावः संजातः । तत्र कारणम्, सूत्रभाष्ये "अस्यां त्रिपुरोडाशिन्यामिष्टौ" इति पंक्तिरस्ति । त्रिधात्वि-ष्टिरिव त्रैधातवीयेष्टिरपि त्रिपुरोडाशैव । अतोऽयं व्यत्यासः पदमकुरुत । सकलशास्त्र-पारंगतानां दीक्षितानां एवंविधं स्खालित्यं सर्वथाप्यसंभावितमेव । "त्रिधात्विष्टौ इत्येव तैः स्वग्रन्थे लेखनं कृतं स्यात् । शिष्यप्रशिष्यपरंपरायां अर्वाचीनेन केनचित् अयं व्यत्यासः कृतस्स्यात् । तथापि तेषामेव नाम्नाग्रन्थस्य व्यपदेशेन इदानींतनानां विदुषां सहसा तदनुसरणं सम्भावितमेव । यद्येवमस्मदभ्यूहः साधीयान् तर्हि सर्वं समंजसम् । परम् एका शंका अनुपशान्ता अनुवर्तते । ज्ञानवार्धयः, महामहोपाध्याय-बिरुदालंकृताः दीक्षितेन्द्रेभ्यः कलयाप्यन्यूनाः ब्रह्मश्री अनन्तकृष्णशास्त्रिमहोदयाः अस्य मुद्रणस्य सम्पादकाः कथमिमं व्यत्यासम् अशोधयित्वैव मुद्रापयामासुः ?

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्वाचीनानामन्यथाज्ञानस्य इदमप्यपरं कारणम् । इत्थं इष्टिनाम्नि व्यत्यासेन निर्देशः एतावति नैव विश्राम्यति ।सुदूरमनुवर्तते । तद्यथा—

(३) नयमयूखमालिका इति विशिष्टाद्वैतमतानुसारी ग्रन्थः श्रीमदप्पय दीक्षितेन्द्रैः विरचितो विराजते। १९१५ तम क्रिस्ताब्दे-कुम्भघोणे अयं मुद्रापितः। सुप्रसिद्धमहाविद्वांसः-श्रोप्पिलियप्पन् सन्निधि व.न. कृष्णमाचार्याः अस्य सम्पादकाः तत्र ३०० तमे पुटे प्रदानाधिकरणं सन्निविष्टम् । तत्रत्याः इमाः पंक्तयः—

"यथा इन्द्राय राज्ञे पुरोडाशमेकादशकपालं निर्वपेत्-इन्द्रायाधिराजाय-इन्द्राय स्वराज्ञे-इति अत्र इन्द्रस्यैकस्य यष्टव्यत्वेऽपि तस्यैव राजादिगुणविशिष्टत्वेऽपि तत्तद्गुणसंबन्ध्याकारभेदात् प्रदानावृत्तिः क्रियते । तदुक्तं-संकर्षे-नाना वा देवता पृथक्त्वात् इति । तन्नानाप्रदानाधिकरणमित्थमस्ति—

"त्रैधातवीयेष्टिः । सा इन्द्राय राज्ञ इति वचनविहित त्रिपुरोडाशा ।" इति ।

परिमलग्रन्थस्य अद्वैतमतानुयायित्वं-नयमयूखमालिकाग्रन्थस्य च विशिष्टाद्वैतमतानुयायित्वं सुविदितमेव समेषाम् । अथापि दीक्षितेन्द्रा एव उभयोः प्रणेतारः । त्रैधातवीयेष्टेः त्रिधात्विष्टेश्च भेदापरिज्ञानं तन्मूलकमन्यथालेखनं च उभयत्र समानमेव । प्रबन्धुरैक्यमेव खलु तन्निदानम् । जगद्विख्यातयशसां केनापि कारणेन इत्थं प्रवृत्तमन्यथालेखनं "संक्रामन्ति नरान्नरम्" इति न्यायेन ग्रन्थान्तरेष्वपि प्रसृतमस्ति । तद्यथा—

(४) दशानामप्युपनिष्दां विशिष्टाद्वैतमतानुसारेण हृदयंगमं भाष्यं लिखितवन्तो "रंगरामानुजमुनयः" प्रसिद्धतराः । "अपरभाष्यकार" पदेनापि एतेषां व्यवहार वर्वर्ति । अनेकप्रबन्धनिर्मातार एते । तेष्वेका "शारीरकशास्त्रार्थदीपिका" अन्या च "भावप्रकाशिका" । आद्या स्वतन्त्रग्रन्थात्मिका । अपरा तु श्रुतप्रकाशिकाव्याख्यारूपा । अनयोरुभयोरपि ग्रन्थयोः प्रकृतविषये अन्यथालेखनमबाधितं अद्यावधि विराजते । तद्यथा—

श्रीशारीरकशास्त्रार्थदीपिका-श्रीमद्रंगरामानुजमुनिभिरनुगृहीता-कुंभघोणे गोपालविलासमुद्राक्षशालायां व० न० कृष्णमाचार्यैः मुद्राप्य प्रकाशिता । तत्र २६८ तमेपुटे—

"प्रदानवदेवतदुक्तम्"

त्रैधातवीयेष्टिः इन्द्राय राज्ञे पुरोडाशमेकादशकपालं इन्द्रायाधिराजाय इन्द्राय स्वराज्ञे "इति त्रिपुरोडाशा ।" इति पंक्तयो विद्यन्ते त्रिधात्विष्टिसंबन्धीनि वाक्यान्युदाहृतानि इष्टि नामधेयन्तु त्रैधातवीयेष्टिः इत्येव निर्दिश्यते अत्र कारणम् पूर्वोक्त-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मेव । तथा श्रुतप्रकाशिकाव्याख्यारूपायां भावप्रकाशिकायामपि इदमधिकरणं स्व-स्थाने समुपतिष्ठते । तत्रत्या इमाः पंक्तयः—

"नाना वा देवता पृथक्त्वादिति । तत् नानाप्रदानाधिकरणमित्थम्-अस्ति त्रैधातवीयेष्टिः इन्द्राय राज्ञे इत्यादिवचनविहिता । सा त्रिपुरोडाशा । तेषां पुरोडाशानां उपर्युपर्यधिश्रयणं, सर्वेषां युगपदवदानं च विहितम् । तेषां पूर्वार्धादवदानं प्रकृतिवत् कर्तुं शक्यम् । तथापि मध्यादवदानं कर्तुमशक्यम् । पुरोडाशानां मध्ये नलकप्रवेशाद्युपायेन मध्यादपियुगपदवदानं ग्राह्यम् । एवं स्थिते प्रदानमपि युगपत् कर्तव्यम् क्रमेण वा इति संशये—

"तेषामपृथक् प्रदानमवदानैकत्वात्" इति सूत्रेण अवदानवत् प्रदानमपि युगपदेव कार्यमिति पूर्वपक्षः । तत्रेदं सिद्धान्तसूत्रम्—

"नाना वा देवता पृथक्त्वात्'

इति । त्रयाणां यागद्रव्याणां भेदात्-विशिष्टरूपाणां देवतानां च भेदात् त्रिभिर्द्रव्यदेवतासंबन्धैः कल्प्यानां च यागानां तत्तद्देवतोद्देशेन क्रमिकाणि प्रदानानि कर्तव्यानि इति सूत्रार्थः ।

परेत्वित्यादि । यथा इन्द्राय राज्ञे इति त्रिपुरोडाशायां त्रैधातवीयेष्टौ......

इति । शारीरकशास्त्रार्थदीपिकायामिव भावप्रकाशिकायामपि इष्टिनाम्नि व्यत्यासानुवृत्तिः स्पष्टतरा । व्यत्यासमन्वाह इति वेदवाक्येन त्रिधाष्विष्टौ याज्यानुवाक्यमन्त्राणां व्यत्यासानुवचनं विहितमस्ति । व्याख्यातॄणां मते तदेव व्यत्यासानुवचनं इष्टिनाम्नि संक्रान्तम् । अयं "भावप्रकाशिकाग्रन्थः तिरुमलै—तिरुपति देवस्थानद्रव्यसहायेन १९५९ ए. डि. संवत्सरे चतुश्शास्त्रपारंगतैः सुगृहीतनामधेयैः उत्तमूर वीरराघवाचार्यमहोदयैः सम्पादितः । देवनागरीलिपिः । तत्र ८३४ तमे पुटे पूर्वोपदर्शिताः पंक्तयो विलसन्ति । अतिप्रौढमीमांसकवरेण्या एते सम्पादक महाशयाः इमं नामव्यत्यासं कुतोऽन्वमंसत ? कुतो वा तत्र शोधनं न कृतम् ? कारणं स्पष्टमेव । अयमेव व्यत्यासः एतेषामपि हृदये प्ररूढः । अत एव स्वरसतः इत्थं मुद्रापितं तैः कथं ज्ञायते ? इत्थम्—

(५) "भाष्यार्थदर्पण" नामकेन स्वकृतेन व्याख्यानेनसह श्रीभगवद्रामानुजमुनिभिरनुगृहीतं श्री भाष्यं एतैरेव विद्वद्वरेण्यैः १९६४ ए. डि. संवत्सरे मुद्रापितं विराजते । तत्र प्रदानाधिकरणे-७३३ तमे पुटे

"धर्मानुसंधानावृत्तौ दृष्टान्तं सूचित विवृणोति यथेति । अस्ति त्रैधातवीयेष्टिः इन्द्राय राज्ञे...... इत्युक्तत्रिपुरोडाशा । एकप्रयोगविषयः ।......

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

(पुटे ७३४ तमे) अथाप्यत्र त्रैधातवीयेष्टौ······देवतोद्देशस्य यथाविधिवाक्य कर्तव्यतया राजस्वाधिराजत्वादेः युगपत् विशेषणत्वस्वीकारे विधिदर्शितोद्देश्याकार भंगप्रसंगात् पृथक् पृथगेव त्यागः कार्यः ।"

इतीमाः पंक्तयो लिखिता एतैः—मुद्रणं च प्रापिता विलसन्ति । अतो ज्ञायते पूर्वव्याख्यातृभिरभिन्नभावा एतेऽपि इति ।

इत्थं अतिप्रौढानां ज्ञानवार्धीनां नानामतानुयायिनां पण्डित-प्रकाण्डानां त्रिधातुत्रैधातवीययागविषये भेदानवधारणं केन हेतुना जातं स्यात् ! को वा जानाति ? सर्वैरप्यन्तर्वाणिजनैः स्वबुद्ध्यनुसारेण किमप्युत्प्रेक्षितव्यम् । अस्माक-मप्यत्र कश्चिदभिप्रायो वर्तते । तमत्र प्रदर्शयामः । उत्प्रेक्षामात्रमिदम् । अस्य समीचीन्ये सहृदयाः प्रमाणम् ।

एते पूर्वोदाहृताः सर्वेऽपि पूर्वोत्तरमीमांसयोः कृतभूरिपरिश्रमाः । पूर्वमीमांसायां नवमाध्याये (९-२-२) दशमाध्याये च (१०-२-८-१०-७-१६) १०-८-९) त्रैधात-वीयेष्टिसंबद्धो विचारः भाष्यादिषु ग्रन्थेषु लब्धास्पदो वर्तते । त्रिधात्विष्टिस्तु न तथा ब्रह्मसूत्रभाष्ये शंकरभगवद्पादैः त्रिपुरोडाशिन्यामिष्टौ इति निर्दिष्टमस्ति । तद्दर्शनवशात् एतेषां विदुषां झटिति त्रैधातवीयाया इष्टेः स्मरणं समजायत । त्रिपुरोडशत्वं-त्रयाणामपि पुरोडाशानाम् उपर्यधोभावेन स्थापनंनलकप्रवेशेन युगपद चदानं इत्यादिप्रचारस्य उभयोरप्यनयोरिष्ट्योः तुल्यत्वात् । ततश्च गतानुगतिको लोकः इति रीत्या पश्चात्तनग्रन्थकारैरपि स एव मार्गोऽनुसृतः ।

कृष्णयजुर्वेदे तैत्तिरीयसंहितायां शुक्लयजुर्वेदशतपथब्राह्मणे मैत्रायणीय-संहितायां काठकसंहितायां च अस्या इष्टेः आख्यायिकाकथनपूर्वकं प्रतिपादनं दृश्यते । पूर्वोक्तानां ग्रन्थकर्तृणां यजुश्शाखीयत्वाभावात् एतद्विषये विशदतमनिर्णयस्य स्वारसिकी प्रसक्तिर्नास्ति । आहिताग्नयो यज्ञानुष्ठानतत्परा अप्येते नित्यनैमित्तिके-ष्विव काम्येषु न तथा बद्ध श्रद्धा अभूवन् । परमैकान्तिनोह्येते ब्रह्मनिष्ठाः । इमे उभे अपीष्टी काम्ये । तस्मात् अनुष्ठानकालीनस्य वैशद्यस्यापि न प्रसक्तिरित्यादि ।

इदं सर्वं स्वोत्प्रेक्षामात्रम् । एवं लेखनेन प्रातःस्मरणीयानामेतेषां विषये अपचारोऽस्माकं मा प्रसाङ्क्षीत् । "ममत्वेवं वदतो वाणी दुष्यतीति हरिस्मरणमेव शरणं "इति खण्डदेवमिश्राणां सुधामयीं—सूक्तिमनुस्मरन्तः इदमेतावति समाप्य पूर्वप्रतिज्ञातं विषयं निरूपयामः । अस्याः त्रिधात्विष्टेः देवतानिर्देशः कथम् ? अन्येषु यागेषु अदृष्टः क्लेशः अत्र वरीवर्ति । वेद एव भिन्नभिन्नशब्देन देवतायाः निर्दिश्य-मानत्वादेवइदं संकटं समुपजायते । इयमिष्टिः यागत्रयसमुदायात्मिका इति पूर्वमेवा-वोचाम । तत्र प्रथमद्वितीययागयोः न क्लेशलेशोऽपि तृतीययाग एव विचारः कर्तव्यो

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भवति। तत्रापि यथाश्रुतवेदपठनपाठनमात्रप्रवृत्तानां नायं क्लेशः। ये तु तदर्थज्ञान पूर्वकं अनुष्ठाने प्रवर्तन्ते तेषामेवायं श्रमः। तत्रापि च नित्यनैमित्तकमात्रकर्मानुष्ठान विश्रान्तानामपि न क्लेशलेशः। त्रिधात्विष्टेरस्याः काम्यत्वात्। ये तु कम्येष्टीरपि फलाभिसन्धिराहित्येन फलकामनया वा अनुतिष्ठासन्ति, तेषामेव प्रयोगकाले महत् संकटं जायते। काम्यानामपि कर्मणाम् "अफलाकांक्षिभिर्यज्ञोविधिदृष्टो य इज्यते" इति गीताचार्योपदिष्टमार्गेण परमैकान्तिनोऽप्यनुष्ठातारो भवन्त्येव।

"इयाजसोऽपि सुबहून् यज्ञान् ज्ञानव्यपाश्रयः" इति श्रीविष्णु पुराणवचनमप्यत्र भाव्यम्। अस्यां त्रिधात्विष्टौ तृतीयस्य यागस्य देवता "इन्द्रः स्वराट् अथवा-इन्द्रः स्वराजा ? इत्येव संशयः। 'स्वराडिन्द्रोदमआविश्वगूर्तः इति अस्या इष्टेर्मन्त्रे स्वराट् इति देवता निर्दिश्यते। प्रथमैकवचनान्तोऽयं शब्दः। तथा "असाविन्द्रस्स्वराट् इति एतदिष्टि ब्राह्मणेऽपि अयं स्वराट् शब्दः यथामन्त्रं प्रथमैकवचनान्तो दृश्यते। नैतावतालम् द्वितीया-चतुर्थी-षष्ठी-विभक्तिष्वपि एकवचनान्ततया अस्य शब्दस्य निर्देशः यज्ञानुष्ठातृणामवश्यापेक्षितो भवति।

तत्र षष्ठ्यन्तनिर्देशो वेदे न क्वाप्यस्ति। द्वितीया चतुर्थ्योस्तु विभक्त्योः स्पष्टतरं देवता निर्देशो ब्राह्मणरूपे वेद भागे दृश्यते। "इन्द्रं स्वराजानं" इति द्वितीयायां—"इन्द्राय स्वराज्ञे" इति चतुर्थ्यां च। अतः यथाविधि याग प्रयोगे देवतानिर्देशः कर्तव्यः। "स्वराट् इति प्रथमैकवचने निर्दिष्टायाः देवतायाः विभक्त्यन्तरे वैरूप्येण निर्देशः युज्यते वा ? आरंभे एकधा-अवसाने अन्यथा च देवता निर्देशो युज्यते वा ? "स्वराट् इति शब्दो जकारान्तः। "स्वराजानं स्वराज्ञे इतीमौ शब्दौ तु नकारान्तौ। जकारान्ततया आरंभे, अवसाने च नकारान्ततया निर्देशः कथं उपपद्येत ? भिन्नौ हीमौ शब्दौ। "राजृदीप्तौ एकस्मादेव धातोः निष्पन्नाविमौ शब्दौ। अतो भेदेन निर्देशेऽपि नास्ति दोषः। इति वादस्तु न प्रतितिष्ठति। यथाश्रुत देवताशब्दे अल्पतरस्याप्यन्यभावस्य देवताभेदपर्यवसानावश्यंभावात्। शब्ददेवतावादिनो हि मीमांसकाः। अन्यथा एतेषु त्रिष्वपि यागेषु इन्द्रस्यैकस्यैव देवतात्वमिति विशेषणभेदमनादृत्य एकदेवताकत्वं त्रयाणामपि यागानामापद्येत। नचेष्टापत्तिः। "नानावादेवता पृथक्त्वात् इति भगवता सूत्रकारेण देवतापृथक्त्वं सिद्धवत्कृत्य तदवलम्बनेन प्रदाननानात्वस्य स्थापितत्वात्। न चेदं वैरूप्यं वेद एवास्ति। अतो नास्माभिः किमपि कर्तुं शक्यम्, इति वाच्यम्। यागप्रयोगस्य एकतरनिर्णयाधीनत्वेन अनुपेक्षणीयत्वादस्य। "स्वराट्" इति जकारान्तशब्दस्य स्त्रीलिङ्ग पुंल्लिङ्गयोः रूप भेदो नास्ति। अविकृत एवायमुभयोर्लिंगयोः। "राडसि विराडसि सम्राडसि स्वराडसि" "मार्जालीयस्सम्राडसि-तन्नो सह विराडसि। सपत्नहा सम्राडसि-भ्रातृव्यहा स्वराडसि-अभिमातिहा विश्वाराडसि दशाक्षरा विराट्" "सोऽक्षरः परम-

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वराट्" इत्यादिर्वैदिप्रयोगेभ्यः इदं सुज्ञानमेव। "स्वराजानं-स्वराज्ञे इतीमौ शब्दौ पुंल्लिंगमात्र प्रवृत्तौ।" सोमाय स्वराज्ञे"इत्यादौ अन्यत्रापि नकारान्तस्य स्वराजन् शब्दस्य वेद एव परिदृश्यमानत्वेन अस्य शब्दस्य असाधुत्वं न कथंचिदपि शक्यशंकम्। समासान्तत्वप्रयुक्तशब्दान्यथाभावस्य नियमेनानुसरणं वेदो न करोति। यथा अत्रैव-इन्द्रोऽधिराजः इन्द्रमधिराजम्-इन्द्रायाधिराजाय इत्यादि निर्देशः समासान्तत्वप्रयुक्तं अकारान्तत्वं राजन् शब्दस्य व्यवस्थापयति। "इन्द्रं स्वराजानं इन्द्राय स्वराज्ञे इत्यत्र तु इमं नियममुल्लंघयति। एवं विधे संकटे वेदभाष्यकारैर्वा कल्प सूत्रकारैर्वा, कश्चिदनुष्ठानोपयोगी मार्गः अवश्यमेव दर्शयितव्यः। न तु तथाकृतं तैः।

एतद्यागीयमन्त्रनिविष्टस्य "स्वराट्" इति जकारान्त-शब्दस्यैव द्वितीया-चतुर्थी-षष्ठी-विभक्तिष्वपि, "स्वराजं-स्वराजे-स्वराजः इति निर्देशः कर्तव्यः इत्यस्माकं अभिप्रायः। "स्वराजानं-स्वराज्ञे-इत्यादिनकारान्तनिर्देशस्य उपेक्षैव न्याय्या। विधिवाक्यगतस्याप्यस्य मन्त्रघटकशब्दापेक्षया न प्राबल्यम्। पर्यायपदान्तरप्रयोगनिषेधार्थमेव "विधिशब्दस्य मन्त्रत्वे भावस्स्यात्तेन चोदना" इत्यधिकरणं प्रवृत्तम्। वेद एव मन्त्रे अन्यथा-ब्राह्मणे चान्यथा-निर्देशे विद्यमाने मन्त्रापेक्षया ब्राह्मणस्य प्राबल्यं स्थापयितुं नास्याधिकरणस्य प्रवृत्तिः अशक्यञ्चैतत् कर्तुम्। मन्त्रमुपजीव्यैव ब्राह्मणं प्रवृत्तम्। उपजीव्य विरोधो नैव युज्यते। अविरोधे परिग्रहः-विरोधे तु उपेक्षैव ब्राह्मण भागस्य। "वायव्यं श्वेतमालभेत" इत्यादिषु कर्मोत्पत्तिवाक्येषु "वायुर्वै क्षेपिष्ठा देवता इत्याद्यर्थवादः विधिवाक्यस्थं वायुपदमेव निर्दिश्य प्रकृतयागीयदेवतां प्रशंसति। प्रशस्तदेवताकत्वाच्च प्रकृतकर्मणि स्तुतिः पर्यवस्यति।

"इन्द्राय स्वराज्ञे (पुरोडाशमेकादशकपालं निर्वपेत्) इति त्रिधात्विष्टि समुदायान्तर्गततृतीययागोत्पत्तिवाक्ये "स्वराजन्" शब्दो नकारान्त एव दृश्यते। "इन्द्रं स्वराजानं इत्युपक्रमे च। एवं सति पश्चात्तने अर्थवादे "इन्द्रः स्वराजा इत्येव निर्दिश्य देवतास्तुतिः कर्तव्या। न तु तथा क्रियते। किन्तु "असाविन्द्रस्स्वराट्" इत्येवं "स्वराट् पदम्' विधि वाक्ये अदृश्यमानं निर्दिश्य देवतास्तुतिः क्रियते। किमत्र कारणम्?

केषांचिदाक्षेपध्वनिः श्रूयते "स्वतन्त्रे वेदे कोऽयं पर्यनुयोगः? इति। जानीम एवैतद्वयमपि। मन्त्रब्राह्मणयोः विध्यर्थवादयोः अवैरूप्ये सति न कापि चिन्ता। सत्येव तु तस्मिन् विचारः समुन्मिषति।

अत्रास्मदभिप्रायः पूर्वमुपपादित एव। तेनैव मार्गेण अत्र विध्यर्थवादयोर्वैरूप्यस्य कारणं प्रदर्शयामः। मन्त्राः उपजीव्यभूताः। ब्राह्मणमुपजीवकम् इति व्यक्तमेवेदम् अधीतवेदानाम्। इमं विषयं स्थापयितुं परश्शतं उदाहरणानि तत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्र विलसन्ति । सामान्यतः विशेषतश्च किंचिदेवोदाहरामः । कृष्णयजुर्वेदतैत्तिरीय-संहितायां 'अग्निकाण्डम्' इति समाख्यातः संपूर्णः चतुर्थः काण्डः मन्त्रमयः। संपूर्णः पंचमः काण्डः तद्ब्राह्मणरूपः । चतुर्थकाण्डोदितान् मन्त्रान् एकैकशः-कृत्स्नशो वा संकीर्त्य तदुपयोगेन कर्तव्यं कार्यम् विदधत् गच्छत्ययम् । "इमामगृभ्णन् रशना-मृतस्य-इत्यश्वाभिधानीमादत्ते "इत्यादिकं प्रातिस्विकमन्त्रोदाहरणम् । सृष्टीरुपद-धाति "ते देवा एताव्युष्टीरपश्यन् यस्यैता उपचीयन्ते इत्यादिकं कृत्स्नशः विनियोग-स्योदाहरणम् । तथा प्रथमकाण्डद्वितीयतृतीयचतुर्थप्रश्नानां सोमयागसम्बन्धिनां मन्त्राणां परिपूर्णः षष्ठः काण्डो ब्राह्मणभूतः । अत्रापि पूर्वोक्तांशः स्पष्टतरः । अधीतवेदानां नेदमुपपादयितव्यम् । मूलस्य पूर्वतरं प्रसिद्धस्यैव व्याख्या पश्चात् प्रादुर्भवति । अनयोर्यौगपद्यं न कथंचन सम्भाव्यते । एवं चेत् व्याख्येयानां मन्त्राणां व्याख्यानरूपब्राह्मणोपजीव्यत्वं ब्राह्मणानांच तदुपजीवकत्वं दुरपह्नवम् । अयमेव न्यायः प्रकृतत्रिधात्विष्टिविषयेऽपि । तत एव च मन्त्रोक्तस्य प्राबल्यम् । उपक्रमे मन्त्रस्थं जकारान्तं स्वराट् शब्दं केनापि कारणेन अनादृत्य, परतन्त्रं स्वं स्वतन्त्रत्वेन संभाव्य; स्वेच्छया स्वराजानं इति नकारान्तशब्दप्रयोगे ब्राह्मणं प्रवृत्तम् । अत्र विद्यमानमनौचित्यं झटिति संप्रधार्य उपसंहारे मन्त्रघटकं स्वराट् इति जकारान्तमेव पदं प्रायुंक्त । तस्मात् मन्त्रस्थं जकारान्तं स्वराट् इति पदं वेदेनैव सिद्धान्तितम् । अस्ति चात्र वैदिको लौकिकश्च संवादः तमिदानीं प्रदर्शयामः । काठकसंहितायां एतद्यागप्रस्तावे इन्द्रायस्वराजे इति जकारान्तस्वराट्शब्दे नैव देवतानिर्देशः कृतोऽस्ति । अयं मन्त्रपाठानुसारी निर्देशः ।

संकर्षकाण्डभाष्यकारः देवस्वामी द्वितीयाध्यायद्वितीयपादे नानाप्रदानाधि-करणे इन्द्राय स्वराजे इति काठकसंहितावाक्यमेवोदाहरति । न तु "स्वराज्ञे' इति मन्त्रपाठाननुगुणं तैत्तिरीयसंहितावाक्यम् । विषयानुक्रमणिकायामपि स्वराजं इत्येवं प्रदर्शितमस्ति । १९८५ संवत्सरे मद्रनगरविश्वविद्यालयीयमिदं मुद्रणम् । तत्र विषयसूचिकायाः २२ तमे पुटे ग्रन्थस्यान्तः ८६ तमे पुटे च इदं द्रष्टुं शक्यम् । संपादकः—एस सुब्रह्मण्यशास्त्री ।

श्रीमन्निगमान्तदेशिकैरनुगृहीता "अधिकरणसारावली व्याख्याद्वयसहिता श्रीमदहोबिलमठास्थानमुद्रापिता विराजते । १९४०. ए. डी. मुद्रणकालः । तत्र ५७ तमे पुटे पदयोजनाख्यायां द्वितीयव्याख्यायां "राजत्वाद्यैः=इन्द्राय राज्ञे पुरोडशमे-कादशकपालं निर्वपेत्-इन्द्रायाधिराजाय-इन्द्रायस्वराज्ञे" इत्यादिवाक्यविहितेष्टिविशे-षक राजत्वाधिराजत्वस्वराट्त्व धर्मैः

इति विवरणं कृतमस्ति । अत्र श्रौतवाक्यं तैत्तिरीयशाखास्थमेवोदाहृतम् अथापि अनुवादे "स्वराजत्व इति नोक्तम् । "स्वराट्त्व इत्येवोक्तम् । जकारान्त-स्वराट्शब्दस्य मन्त्रानुगुण्येन उपादेयतरत्वमेवेदं सूचयति ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निर्णयसागरमुद्रणालये मुद्रापिते शांकरभाष्यव्याख्याभूते भामतीग्रन्थे "राजाधिराजस्वराजगुणभेदात् इति नकारान्तस्य स्वराजन् शब्दस्य निर्देशो वर्तत एव । स तु तैत्तिरीयसंहिताविधिवाक्यानुसारी याज्यामन्त्राननुगुणः । मन्त्रब्राह्मणयोः तथा-विध्यर्थवादयोश्च आनुगुण्यं आवश्यकम् । अतः जकारान्तस्वराट् शब्ददेनैव देवतानिर्देशः कार्य इति नो निर्णयः । वस्तुतत्वे एवं रूपे सति, प्राचां प्रौढानां विदुषां ग्रन्थेषु त्रिवृत्ति त्रिष्टिस्थाने त्रैधातवीयेष्टिव्यपदेशः, रसिकैः विद्वद्भिः शोधयितव्यः । अयं नामव्यत्यासः यदि तैरेव लिखितः, अथवा-समनन्तरकालीनैः प्रवक्तृभिः उपकल्पितः-स्यात् । अनेकशतवर्षेभ्यः पूर्वतनाः ग्रन्थकर्तार एते । शिष्यप्रशिष्य-परम्परायां क्वापि अयं व्यत्यासो लब्धास्पदो भवेत् । को वा जानाति ? विद्यमानस्तु पाठोऽनुपपन्न इत्यत्र नास्ति संशयः । तस्मादवश्यमत्र शोधनं कार्यमेव ।

तथा स्वराट्-स्वराजा-इति पदद्वयविषयेऽपि वैदिकैः याज्ञिकैः समुचितो निर्णयः कार्य एव । अखिलभारतीययाज्ञिकवेदवित्सम्मेलनमेतदर्थं सम्पादयितव्यम् । अध्ययनसम्प्रदायागतानां-राज्ञी-विराज्ञी-संराज्ञी-स्वराज्ञी-सोमाय स्वराज्ञे-इन्द्राय स्वराज्ञे-इन्द्रं स्वराजानं-स्वराडिन्द्रः-राट्-विराट्-संम्राट्-स्वराड्-विश्वाराट्-इत्यादीनां पदानां परिशीलनेन मीमांसान्यायानुसंधानपूर्वकं एकधा निर्णयः कार्यः । वेद-वेदार्थ-यज्ञानुष्ठानसंरक्षणबद्धश्रद्धैः जगदाचार्यवर्यैः इदं कर्तव्यम् । एवं विधा बहवो विषयाः तत्र तत्र निवसतां वैदिकानां हृदये लब्धप्रसरा भवेयुः । सम्मेलनकाले सर्वैः परस्पर-वार्तालापेन सर्वं ज्ञायेत । तत्र क्रियमाणो निर्णयः प्रतिष्ठितः उपयुक्तः अनुपेक्ष-णीयश्च स्यात् ।

इत्थम् अस्मन्मनसि चिरप्ररूढं भावं प्राचीकशाम । आर्षसंस्कृतिमन्त्रः प्रामाणिका अन्तर्वाणिजनाः अस्मभ्यं न कुप्येयुरिति विश्वसिमः । यद्यत्र विद्यमान-मनौचित्यं सोपपत्तिकं सहृदयाः विद्वांसः निरूपयेयुः; सांजलिबन्धं तत् स्वीकुर्मः । अस्माभिरादृते पक्षे नास्त्यभिनिवेशोऽस्माकम् । उपपत्तिमदूर्जिताश्रयं वचनं सर्वेषामपि सकाशात् सम्प्राप्तं सामोदं अंगीकर्तव्यमेव । एतावति अस्य विषयस्यो-पसंहारः क्रियते । परंपरस्तात् । इति वेदविदामनुचरः

नावल्पाक्कं श्री देवनाथाचार्यः

तिरुपतिः

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# माघज्योतिषम्

ले०— डॉ० आजादमिश्रो 'मधुकरः'

गङ्गानाथझाकेन्द्रीयसंस्कृतविद्यापीठम्

प्रयागः

"यो वै भूमा तत्सुखम्, नाल्पे सुखमस्ति"[1] इत्येतच्चिरन्तनसत्येन सम्प्रेरिताः सकलजगज्जन्तवो भौतिकाध्यात्मिकसाधारणसर्वविधविषयां स्वात्मनि भूमतामाधातुमाधावति। अत एव महाभाष्यस्य पस्पशाह्निके भाष्यकारेण भगवता पतञ्जलिना प्रोक्तम्—"ब्राह्मणेन निष्कारणो धर्मो वेदः षडङ्गोऽध्येयो ज्ञेयश्च" इति। अनेन कर्मकलापाकुलितानां जागतिक प्रपञ्चाञ्चितानां जनानां कृते षडङ्गवेदाध्ययनस्य निष्कारणताऽनिवार्यता च प्रत्यपादि। एतच्च ज्ञानपरिपूर्णताया असाधारणकारणमिति धीमतामनुभवः। अतएव कवयो महाकवयोऽपि स्वेषु स्वेषु काव्येषु महाकाव्येषु वा वेदाङ्गादीन् विषयानुपवर्णयन्ति। भीनमालप्रदेशीयः महाकविर्माघोऽपि शिशुपालवधाख्ये स्वकीये महाकाव्ये प्रसङ्गतो विविधान् विषयान् निबबन्ध। तद् यथा—"नवसर्गगते माघे नवशब्दो न विद्यते" इत्याभाणकं जानद्भिः कैर्नज्ञायतेऽस्य व्याकरणप्रयोगपाटवम्। एवमेव अत्र काव्ये वर्णितराजनीतिदर्शनादिविषयानाधारीकृत्य सन्ति वै प्रकाशिता बहवो लेखाः। परमस्य लेखस्य विषयो महाकाव्येऽस्मिन् वर्णितं ज्योतिषशास्त्रम्। तदेवात्र "माघज्योतिषम्" इति शीर्षकेनाभिहितम्।

किञ्च सर्वेऽपि कविवर्याः स्वेषु स्वेषु काव्येषु विषयाभिव्यञ्जने औचित्यमार्गेण चारुत्वोत्कर्षप्रकर्षाय शब्दार्थालङ्कारान् प्रयुञ्यते। तस्मिन्नेवोत्कर्षातिशयप्रसङ्गे प्राकरणिकाप्राकरणिकोपमानान्यतमरूपेण प्रकृति वर्णने वा शिशुमारचक्रस्थज्योतिः पुञ्जं शोभा धायकं धर्ममभिवर्धयितुं सूक्ष्मेक्षिकया तूलिकया चित्रयन्ति कवयः। परन्तत्रैतानि चित्राणि ज्योतिषशास्त्रस्य प्रायः सामान्यवृत्तमेव कथयन्ति। तद्यथा सूर्यचन्द्रमसोः शुक्रादीनां वा उदयास्तप्रभृतिनानागुणधर्माः, अवस्थाभेदाः, सूर्यग्रहणं, चन्द्रग्रहणम्, संक्रान्तिः, कमलोदधि संकोचविकासादिकार्यकलापादीनि, उडुगणानां प्रकाशः, दिवसे च तदभिभवः, ग्रह राशिसंचारादय-

---

१. छान्दोग्योपनिषद

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

श्चेति। मन्ये, अनेनापि सामान्यवृत्तेन ज्यौतिषशास्त्रस्योपकृतं भवति, गणकानां न्वैतद्धितायैव, परमस्य विशेष वृत्तानि तु काव्येषु यत्रकुत्रचिदेव समुपलभ्यन्ते। तत्र माघकाव्ये शिशुपालवधे सामान्यवृत्तमयानि ज्यौतिषतत्त्वानि तु प्राचुर्येण सन्त्येव, विशेषवृत्तान्यपि सुतरां सन्ति संगुम्फितानि।

एतस्मिंश्च निबन्धे प्रतिसर्गं शिशुपालवधमहाकाव्यादुद्धृत्योद्धृत्य यथासर्गं पूर्वं ज्यौतिषस्य सामान्यवृत्तानि, ततोविशेषवृत्तानि दर्शयिष्यन्ते। ज्यौतिषशास्त्रस्य किञ्चित् परिचयोऽपि आसङ्गिक एवेति मन्ये। एवञ्च उपक्रमोपसंहारौ विहाय त्रिधा विभागोऽस्य लेखस्य। पूर्वं किञ्चित् ज्यौतिषशास्त्रपरिचयः, ततस्सामान्य-वृत्तम्, पश्चाच्च विशेष वृत्तमिति क्रमः।

**१. ज्यौतिष परिचयः**—एतच्छास्त्रं खलु भगवतो वेदस्य नेत्रस्थानापन्नं[२] समाजस्य दर्शकम्, येन विना सर्वोऽपि कर्मकलापः कुसमये समारभ्यमाणो निष्फला-येत, अन्धस्य गमनकर्मवत्। आकाशीयग्रहनक्षत्रादीनां संयोगवियोगेन शुभाशुभ-कालस्य जीवाजीवेषु जायमान त्रैकालिकानुकूलप्रतिकूलप्रभावस्य चैतन्नित्यपूर्व-दर्शनम्। तदुक्तम्—

**यदुपचितमन्यजन्मनि शुभाशुभां कर्मणः पङ्क्तिम्।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव[३]॥**

शुभाशुभस्य नित्यव्यञ्जकमेतदितिभावः। अथ च—

"प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ।' इत्यादिना खगोलीय ज्योतिःपुञ्जस्य प्रभावः सर्वत्र सिद्धः। तत्र प्रभावोऽयं नहि सर्वत्र सर्वदा समानानु-पाती, जगद्व्यवहारविलोपप्रसङ्गात्, प्रत्यक्षबाधाच्च। तस्मात् सिद्धः आश्रमभेदेन कालभेदेन च प्रभावभेदः। यद्यपि नभोमण्डलीयानि सर्वाण्यपि ज्योतींषि यत्किञ्चित् प्रभावोत्पादकानि, तथापि मर्त्यलोकसन्निकटवर्तीनि एव तेषु यानि तानि ग्रहनक्षत्र-राश्यादिपदेनानादिकालादृषीणामध्ययन विषयाणि, प्रभूतप्रभावजननात्। एतेषामेव ज्योतिषां गतिस्वरूपप्रभावादिबोधकाः परसहस्रग्रन्थाः प्रणीता ऋषिभिः, प्रणीयन्ते च साम्प्रतम्। तत्र ये देशकालादीनां प्राणिनाञ्च साधारण शुभाशुभफलं बोध-यन्ति तेहि संहिताग्रन्थाः। येच व्यक्ति विशेषस्य जन्मकालानुसारेण जीवन फलं व्य-ञ्जयन्ति ते खलु जातकग्रन्थाः होराशास्त्रमिति वा। तथा च ये ग्रंथाः ग्रहनक्षत्रादीनां गतिजन्यं संयोगवियोगं निरूपयन्ति, ते वै सिद्धान्तगणितान्यतरपदेन व्यपदिश्यन्ते। एवञ्च ज्यौतिषकल्पद्रुमस्य गणितफलितसंहितारूपं स्कन्धत्रयं विराजते।

---

२. पाणिनीयशिक्षा

३. सारावली

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

भारतीयं ज्योतिषशास्त्रं हि अनन्तकोटितारागणेषु नवग्रहान् सप्तविंशति-नक्षत्राणि द्वादशराशीश्च स्वरूपादिनावर्णयतीत्युक्तम् । तत्र नवग्रहेषु सूर्यः सर्वश्रेष्ठ आत्मस्थानियो ग्रहराजः । तदुक्तम्—"सूर्य आत्माजगतस्तस्थुषश्च[४] इति ।

अथ च—"सर्वात्माच दिवानाथः[५]" इति । पृथ्वीभौमबुधगुरुशुक्रशनिग्रहाश्च सूर्यं परिभ्रमन्ति, चन्द्रश्च पृथ्वीं परिभ्राम्यतीति विशेषः । तत्र चन्द्रमार्गः पृथ्वी-मार्गश्च यत्र केन्द्रे मिथो मिलतः तत् केन्द्रस्थलमेव राहुः केतुश्चेति कथ्यते । यत् केन्द्र बिन्दुं समुत्तीर्यचन्द्रः उत्तराशां व्रजति, स राहुः; यच्च केन्द्रं समुत्तीर्य स दक्षिणाशां याति स केतुरिति । एतौ छायाग्रहोपग्रहेत्यादिशब्दैरपि व्यपदिश्येते । नक्षत्राणिराशयश्चागतिमन्ति । तद्यथा—

"आकाशे यानि दृश्यन्ते ज्योतिर्बिम्बान्यनेकशः ।
तेषु नक्षत्रसंज्ञानि ग्रहसंज्ञानि कानिचित् ॥
तानि नक्षत्रनामानि स्थिरस्थानानियानि वै[६] ।"

एतेषु ग्रहनक्षत्रेषु कानिचन सुधारश्मिमयानि, कतिपयानि विषरश्मिमयानि, अपराणिचोभयरश्मि जनकानि, इतराणि चोभयरश्मिरहितानीत्येतेषां मिथो योग-वियोगाभ्यां शास्त्रमेतच्छुभाशुभं फलमुपदिशति । उक्तञ्च—

"राशीनामुदयोलग्नं तद्वशादेव जन्मिनाम् ।
ग्रहयोगवियोगाभ्यां फलञ्चिन्त्यं शुभाशुभम्[७]" इति ॥ सेतस्वी

किञ्चाटकादाकटकं कन्याकुमारीत आकश्मीरं श्रौतस्मार्तगार्हस्थ्यादिकर्म-कलापः एतच्छास्त्रीय पञ्चाङ्गाधृतः पञ्चाङ्गस्तुतिपरेयमुक्तिः सर्वथा समाचीना —

"श्रौतं स्मार्तञ्च गार्हस्थ्यं यद्विना नैव सिद्ध्यति ।
तत्कालाख्येश्वरस्याङ्गं वन्दे तिथ्यादिपञ्चकम्" इति ॥ अपि च—
"तिथिर्वारञ्चनक्षत्रं योगः करणमेव च ।
पञ्चाङ्गं शृणुते नित्यं गङ्गास्नानफलं भवेत्" इति ॥

२. ज्योतिषसामान्यवृतम्— एतादृक्षं रुक्षं शुष्कं बुद्धिमात्रैकग्रहगृहीतं ज्योतिस्तत्त्वं सुकुमारमार्गे काव्ये सफलं सम्प्रयोक्तुं स एव समर्थः, यः खलु साहित्य-ज्यौतिषोभयपारावारपारङ्गतः । तदैव नीरसोऽपि ज्योतिषविषयः सौन्दर्य-सारान्त-पूरपूरितः काव्यादपृथग्भूतः कविकर्मस्वभावसमागतः कयापि कमनीयतया कलितः

---

४. ऋग्वेदः, सूर्यसूक्तम्
५. बृहत्पाराशरी ३-१२
६. ,, ३-३
७. ,, ३-६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सन् साहित्यसुधापानचतुरचञ्चरीकसहृदयमनांसि नोद्विजिता। भागवतीयं लघु-कथानकमाश्रित्य माघप्रणीते विंशतिसर्गात्मके विशालकाये शिशुपालवध महाकाव्ये प्रतिसर्गं सूर्य चन्द्रादयोग्रहाः प्राकरणिकाप्राकरणिकरूपेण सन्ति चित्रिता इति कथितम्। तानि एव चित्राणि ज्यौतिषसामान्यवृत्तमितिपदेनात्राभिहितानि तेषां संहितास्कन्ध विषयत्वात् फलादेशे सहकारित्वाच्च। तत्र यथा सर्गं तानि निष्कृष्यदर्श्यन्ते।

कृष्णनारदसम्भाषणनामके प्रथमे सर्गे यत्र शुभ्रवर्णे नारदे मुनिसुलभ-शीतलतामापादयितुम्—"शरच्चन्द्रमरीचि रोचिषम्"[८] इत्युक्तं, तत्रैवतस्य तपः—प्राप्तं तेज आख्यातुम् "पतत्पतङ्गप्रतिमः[९]" इति विशेषणं सर्वथामनोहरति। देवर्षौ सूर्याचन्द्रमसोः धर्मयोः सहैव प्रतिपिपादयिषया एकस्मिन्नेव पद्ये विशेषणद्वयं काव्य-शोभामाधत्ते—"स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः" इति पुनश्च "तुषारमूर्तेरिव नक्तमंशवः[१०]" तथा "निदाघधामानमिव[११] इत्यादि पदैः देवर्षेः कान्तिर्निरूपिता। श्रीकृष्णस्य दन्तपङ्क्तये 'द्विजावलिव्याजनिशाकरांशुभिः[12]' इति प्रयुक्तम्, व्यतिरेकरूपेण तत्रैव सूर्योप्युद्धृतः "नयन् नियन्तुं सम-भाविभानुना[13] इति। तमोध्वंससमर्थस्य सूर्यस्यार्थान्तिरेण प्रयोगो यथा 'ऋते रवेः क्षालयितुं क्षमेत[१४] कः" तथा उपमानरूपेण यथा "सहस्ररश्मेरिव यस्य दर्शनम्[१५]" इति प्रयोगश्च नूनं चमत्करोति। रावणवर्णनप्रसङ्गे अहस्करस्तावत् तद्वधूनाम-लङ्कर्ता, इन्दुश्च नर्मसाचिव्यसम्पादयिता यथा "अलञ्चकारास्य वधूरहस्करः"[१६] इति "न नर्मसाचिव्यमकारि नेन्दुना[१७]" इति च। रावणस्य पुर्यांषड्तवः सदा समुपतिष्ठन्ते—"तपेन वर्षाः शरदा हिमागमो वसन्तलक्ष्म्या शिशिरः समेत्य च[१८]" इति। सर्गान्ते च शिशुपालोऽपि एकदा शिष्टतया रविणा संज्ञितः, यथा—"युवा-

---

८. शिशुपालवधम् १.५
९. ,, १-१२, १-२०
१०. ,, १-२१
११. ,, १-२४
१२. ,, १-२७
१३. ,, १-२७
१४. ,, १-३८
१५. ,, १-५३
१६. ,, १-५८
१७. ,, १-५९
१८. ,, १-६६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कराक्रान्तमहीभृदुच्चकैः असंशयं सम्प्रति तेजसा रविः"[19] इति ।

इत्थञ्च ज्योतिषशास्त्रस्य संहिताभागे वर्णिताः सूर्याचन्द्रमसोः सामान्यगुणधर्माः उपर्युद्धृतेषु चतुर्दशपद्येषु तथागुम्फिताः यथा काव्यसौन्दर्यं द्विगुणायते ।

मन्त्रवर्णननामके द्वितीये सर्गे सूर्याचन्द्रमसोः सामान्यगुणधर्माः निम्नलिखितशब्देषु उल्लिखिताः सन्ति । तथा हि—

१. दधत्संध्यारुणव्योम स्फुरत्तारानुकारिणीः (२-१८)
२. इन्धनौघधगप्यग्निस्त्विषा नात्येति पूषणम् (२-२३)
३. पूर्णश्चन्द्रोदयाकांक्षी दृष्टान्तोऽत्र महार्णवः (२-३१)
४. प्रध्वंसितान्धतमसः तत्रोदाहरणं रविः (२-३३)
५. पुरःक्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम् (२-३५)
६. तुल्येऽपराधे स्वर्भानुः भानुमन्तं चिरेण यत् ।
हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम् ॥ (२-४९)
७. तेजस्विमध्ये तेजस्वी दवीयानपि गण्यते ।
पञ्चमः पञ्चतपसस्तपनो जातवेदसाम् ॥ (२-५१)
८. अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः (२-५३)
९. विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः (२-६१)
१०. सम्पर्कादर्करोचिषाम् (२-६६)

इत्थञ्चैभिर्दशभिः श्लोकैः सूर्याचन्द्रमसोः स्वरूपं गुणधर्माश्च निरूपिताः । एते हि गणकानाङ्कृते परमोपादेयाः सन्ति । पुरीप्रस्थाननामके तृतीये सर्गे सूर्याचन्द्रमोभ्यां सहैव नक्षत्रतारागणोऽपि वर्णितः । तद्यथा प्रथमपद्ये सूतस्योत्तरायणदक्षिणायनमार्गस्य चित्रणं विलोकनीयम्—"कौवेरदिग्भागपास्यमार्गमागस्त्यमुष्णांशुरिवावतीर्णः[20] इति । यात्राणां सूर्यबलाच्चन्द्रबलं बलीयः[21] इति ज्योतिषनियमञ्जानानेनैव श्रीकृष्णेन द्वारकातः प्रस्थाने चन्द्रबलस्य प्राधान्यममानि, तत्रेदं पद्यम्—

"जगत्पवित्रैरपि तं न पादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः ।
यतो बृहत्पार्वणचन्द्रचारु तस्यातपत्रं बिभरां बभूवे[22]" ॥ इति ।

उडुगणः उत्तरीयध्रुव परिक्रामन्ति—"पर्यन्तचरोडुचक्रः सुमेरुवप्रः[23]"

---

१९. शिशुपालवधम् १-७०
२०. ,, ३-१
२१. शीघ्रबोधः
२२. शिशुपालवधम् ३-२
२३. ,, ३-३७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति । चन्द्ररश्मयो द्वारकायाः स्फाटिकाट्टालिकाः समीकुर्वन्ति, परन्तेभ्यः रात्रौ रतिक्रीडारतो रमणीलोकः बिभेति—"स्फुरत्तुषारांशुमरीचिजालैर्विनिह्नुताः स्फाटिकसौधपङ्क्तीः[२४]" इति "बिभ्युः शशिद्युतिभ्यः[२५]" इति च । "वधूजनश्चन्द्रमधश्चकार[२६]" इत्यादिना एकत्र स्त्रीसौन्दर्यं निरूपितम्, अपरत्र ज्यौतिषवासनावासितेन महाकविना एकस्मिन्नेव पद्ये कलारेवतीरोहिणीशरौहिणेयशब्दच्छटाच्छादिता—"कलादधानः सकलाः स्वभाभिरुद्भासयन् सौधसिताभिराशाः । यां रेवतीजानिरियेष हातुं न रौहिणेयो न च रोहिणीशः[२७]" इति । सर्गान्ते च कविः समुद्रतटे चन्द्रांशुमवलोक्य मौक्तिकं स्मरति—"क्षिप्ताइवेन्दोः स रुचोऽब्धिवेलं मुक्तावलीराकलयाञ्चकार[२८]" इति ।

रैवतकवर्णननामके चतुर्थे सर्गे षोडशभिः पद्यैः ज्यौतिषसंहिताविषयाः प्रतिपादिताः सन्ति । तत्र द्वादशकृत्वः सूर्यस्य, सप्त कृत्वः चन्द्रस्य, सकृच्च नक्षत्रस्य सामान्यगुणाः दर्शिताः । ते यथाक्रममधस्तादवलोकनीयाः ।

१. विन्ध्यायमानं दिवसस्य भर्तुर्मार्गं पुना रोद्धुमिव······ (४-२)
२. विलोचनस्थानगतोष्ण रश्मि······ (४-४)
३. आसन्नमुदग्रतापं रविं दधानेऽप्यरविन्दधाने······ (४-१२)
४. सूर्यस्य रथ्या परितः······ (४-१४)
५. उष्णांशुकराभिमर्शात्······ (४-१६)
६. उदयति विततोर्ध्वरश्मिरज्जावहिमरुचौ······ (४-२०)
७. इह स्फुरित चारु चामीकराः सवितुः (४-२४)
८. पत्युस्त्विषामिह (४-३४)
९. स्थगितार्करश्मौ (४-३९)
१०. दोषाऽपि नूनमहिमांशुरसौ किलेति (४-४६)
११. मरकतमयमेदिनीषु भानोर्मयूखाः (४-५६)
१२. तरुणीरिह नयति रविः (४-६७)

अत्र सर्गे चन्द्रवर्णनं यथा—

१. विलोचनस्थानगतोष्णरश्मिनिशाकरम् (४-४)

---

२४. शिशुपालवधम् ३-४३
२५. ,, ३-४५
२६. ,, ३-५२
२७. ,, ३-६०
२८. ,, ३-७४

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

२. मूर्ध्नि स्खलत्तुहिनदीधितिकोटिमेनम् (४-१९)
३. हिमधाम्नि याति चास्तम् (४-२०)
४. उत्सङ्गसङ्गिहरिणस्य शशाङ्कमूर्तेः (४-२२)
५. उत्क्षिप्तमुच्छ्रितसितांशुकरावलम्बैः (४-२५)
६. किरणैर्विहेन्दोः (४-४६)
७. सायं शशाङ्ककिरणाहतचन्द्रकान्तनिष्यन्दिनीरनिकरेण (४-५८)

एवमेव "उत्तम्भितोडुभिः" शब्देन एकदा नक्षत्रमण्डलमपि स्मृतम् ।

पञ्चमे सर्गे पद्यद्वयेन सूर्यस्य पद्यद्वयेन च चन्द्रस्य सामान्यवृत्तमुपस्थितम् । तत्र सूर्यकिरणसम्पर्कादुल्लसितं गगनं यथा—"भास्वत्करव्यतिकरोल्लसिताम्बरान्ताः[२९]" इति "चन्द्राकृतीनिवेशमानि"[३०] इति च चन्द्राकारं पटमण्डपं भूषयतः । एकत्र सूर्यार्धबिम्बोदये "अर्धोदितो हरिरिवोदय शैलमूर्ध्नः[३१]" इति प्रयुक्तम्, अपरत्र च गिरिश्रृङ्गञ्चन्द्रार्धमुपहसति—"अर्धचन्द्रं श्रृङ्गैः शिखाग्रगतलक्ष्ममलं हसद्भिः" इति ।

प्रकृतिवर्णननामके षष्ठे सर्गे प्रतिश्लोकम् ऋतुविशेषः चारुचारुताचकासदुपवर्णितः । संहितास्कन्धे ऋतूनामपि शुभाशुभं फलं प्रोक्तम्, अतः शास्त्रेऽस्मिन् ऋतुधर्माध्ययनमपिमहत्त्वशालि, यस्योपपादनं सूक्ष्मेक्षिकयात्रसर्गे विहितम् । सूर्याचन्द्रमसावपि पञ्चसुश्लोकेषु चित्रितौ । तथा हि हरितिमोद्गमने "रवितुरङ्गतनोरुहतुल्यताम्[३३] इत्युक्तम्, शुभ्रपुष्पं तत्र शशिखण्डं स्मृतम्—"कृशशिखं शशिखण्डमिवच्युतम्[३४]" इत्यादिना । एवमेव "ददतमन्तरिताहिमदीधितिम्[३५]" इति "अशीतकरकरैः[३६]" इत्यादिना च सूर्यः स्मृतः तथा "प्रचलितोडुनिभैः[३७] इत्यादिना उडुगणो गतिमत्त्वेन वर्णितः ।

वनविहारनामके सप्तमे सर्गे सर्वत्रैवारविन्दादिवन्यपुष्पाणिप्रधानतया चित्रि-

---

२९. शिशुपालवधम् ५-३
३०. ,, ५-५२
३१. ,, ५-५६
३२. ,, ५-६३
३३. ,, ६-२२
३४. ,, ६-३४
३५. ,, ६-४१
३६. ,, ६-४३
३७. ,, ६-३६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तानि सन्ति । तत्रैकत्र "अवनतवदनेन्दुः[38] इत्यादिना चन्द्रस्य, "विकसदशीतमरीचिरश्मिजालैः[39]" इत्यादिना च सूर्यस्य सामान्यस्मरणमेवास्ति ।

जलविहारनामके अष्टमे सर्गे जलीयग्रहश्चन्द्रः सेवमानः प्रदर्शितः "प्रियमिवचन्द्रमाश्चकार"[40] इत्यादिना । सोऽयञ्चन्द्रः स्वकालुष्यं प्रतियुवति प्रददाति—'कालुष्यं शशधरदीधितिच्छटाच्छैः[41]' इति । सर्गान्ते चायङ्गलन्निव—"गलन्मुखेन्दुकान्तेः"[42] इति । एवमेवादावन्ते "अतुहिनरश्मि[43]" तथा "शिशिरेतररोचिषः" पदैः सूर्यगुणा अपि प्रकटीभूताः ।

प्रदोषवर्णनाभिधायिनि नवमे सर्गे षट्त्रिंशत्पद्येषु सूर्यचन्द्रनक्षत्राणां सामान्यसुकुमारगुणधर्माः चित्रिताः । सुकुमारता रूपवत्ता च स्त्रीग्रहस्य चन्द्रस्य विशेषो धर्मः, यस्योल्लेखः द्वाविंशतिकृत्वः, पञ्चदशकृत्वश्च सूर्यस्य वर्णनं प्राप्यते । तत्रादौ सूर्यचित्रणं यथा—

१. अभितापसम्पदमथोष्णरुचिः निजतेजसामसहमान इव" (९-१)
२. मुहुरन्तरालभुवमस्तगिरेः सवितुश्च योषिदमिमीतदृशा" (९-२)
३. अभवद्गतः परिणतिं शिथिलः परिमन्दसूर्यनयनो दिवसः" (९-३)
४. तत्क्षणमशीतरुचः" (९-५)
५. अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि" (९-६)
६. भृशमन्वरज्यदतुषारकरः" (९-७)
७. जपाकुसुमस्तवकद्युतौ दिनकरे" (९-८)
८. द्रुतशातकुम्भनिभमंशुमतो वपुरर्धमग्नवपुषः पयसि (९-९)
९. निरकासयद्रविमपेतवसुं वियदालयादपरदिग्गणिका (९-१०)
१०. अभितिग्मरश्मि (९-११)
११. अस्तमितभानु नभः (९-१२)
१२. रुचिधाम्नि भर्तरि (९-१३)
१३. दिवसोनुमित्रमगमद्विलयम् (९-१७)

---

३८. शिशुपालवधम् ७.३८
३९. ,, ७-६३
४०. ,, ८-४
४१. ,, ८-३८
४२. ,, ८-४२
४३. ,, ८-३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

१४. पतिते पतङ्गमृगराजि (९-१८)
१५. दिवसं भृशोष्णरुचिपादहतम् (९-३४)

साम्प्रतं सर्गेऽस्मिन् चित्रितचन्द्रसामान्यवृत्तानि उदाह्रियन्ते—

१. अदृष्टहिमद्युतिबिम्ब (९-१२)
२. स्फुरदंशु जालमथ शीतरुचः ककुभं समस्कुरुत माधवनीम् (९-२५)
३. उदयाचलव्यवहितेन्दुवपुः (९-२६)
४. कलयातुषारकिरणस्य पुरः (९-२७)
५. तुहिनरश्मिदलं······मलयजार्द्रमिव ददृशे (९-२८)
६. प्रथमं कलाभवदथार्धमथो हिमदीधितिर्महदभूदुदितः (९-२९)
७. वदनेन्दुनेव तुहिनद्युतिना (९-३०)
८. रजनीमवाप्य रुचमाप शशी (९-३३)
९. शशिरश्मिगलज्जलविन्दुमिन्दुमणिदारुवधूम् (९-३५)
१०. सान्द्रतरमिन्दुरुचां निकरः (९-३७)
११. रजनीकरः सरितामधीशमपि अचुक्षुभत् (९-३८)
१२. स्फटिकयष्टिरुच इन्दुकिरणान्मदन उदतिष्ठत् (९-३९)
१३. उदिते दिशः प्रकटयति अधमंधाम्नि (९-४०)
१४. शशिन उदयात् (९-४१)
१५. अदिदीपदिन्दुरपरो दहनः (९-४२)
१६. सितदीधितावुदयति (९-४३)
१७. मुखमिन्दुरुज्जवलकपोलमविशत् (९-४८)
१८. हिमधाम्निदर्पणतले च श्रियं ददृशुः (९-५३
१९. अमृतस्रुतोऽपिविरहाद्भवतो यदमूं दहन्ति हिमरश्मिरुचः (९-६८)
२०. उदिते ततः क्षणदाकरे (९-७०)
२१. नमितमुखेन्दु यत्तस्थे (९-८४)
२२. प्रालेयांशोः सपदि रुचयः शान्तमानान्तरायाः (९-८७)

द्वादशे पद्ये "अविभाव्यतारकन्नभ इत्यादिना एभिः सहात्र नक्षत्रमण्डलमपि स्मृतम् ।

सुरतवर्णननामके दशमे सर्गे सुरतोत्सवीयाङ्गान्येव सुविस्तृतं चित्रितानि । सूर्यस्तु क्वाप्यत्रानुल्लिखितः क्रूरग्रहत्वात् चन्द्रोऽपि निष्प्रभावतया एकत्र "गण्डभित्तिषु पुरा सदृशीषु व्याञ्जि नाञ्चित दृशां प्रतिमेन्दुः[44] इत्यादिनान्यत्र च "रजनि-

४४. शिशुपालवधम् १०-३१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

खनतेन्दुलंज्जयाधोमुखीव[४५] इत्यादिना दर्शितः ।

प्रत्यूषवर्णनाख्यएकादशे सर्गे पूर्वं सूर्यस्य चित्रितानि पञ्चविंशतिवृत्तानि, ततश्चन्द्रस्य चतुर्दश, तारागणस्यापि चत्वारितानि क्रमश उपादीयन्ते—

१. व्रजति विषयमक्ष्णामंशुमाली न यावत् (११-२५)
२: नवकनकपिशङ्गं वासराणां विधातुः (११-४३)
३. जलनिधिजलमध्यादेश उत्तार्यतेऽर्कः (११-४४)
४. ज्वलितखदिरकाष्ठाङ्गारगौरं विवस्वान् (११-४५)
५. अतुहिनरुचिनाऽसौ केवलं नोदयाद्रिः (११-४६)
६. परिपतति दिवोऽङ्के हेलया बालसूर्यः (११-४७)
७. क्षितिधरतटपीठादुत्थितः सप्तसप्तिः (११-४८)
८. भास्करेणांशुबाणैः (११-४९)
९. तरुणतपनभासोमन्दिराभ्यन्तरेषु (११-५०)
१०. उदयदहिमरोचिर्ज्योतिषाक्रान्तमन्तः (११.५१)
११. दिनकरकरसंगव्याप्तकौसुम्भकान्तिः (११-५२)
१२. तदेतद् भानुभिर्भाति भानोः (११-५३)
१३. अभिनवरविभासः (११.५४)
१४. हरिरिव हरिदश्वः साधु वृत्तं हिनस्ति (११-५६)
१५. अवतमसभिदायै भास्वताऽभ्युद्गतेन (११-५७)
१६. तिमिरौघं घर्मभानुर्भिनत्ति (११-५८)
१७. दिवसकररुचोऽन्तं ध्वान्तमन्तर्गृहेषु (११-५९)
१८. गुण्तिस्फोटमर्कः करोति (११-६०)
१९. अयुगसप्तिस्तुल्यसंख्यैर्मयूखैः (११-६१)
२०. रागवानुष्णरश्मिः (११-६२)
२१. द्योतिताशेषलोके दशशतकरमूर्तौ (११-६३)
२२. उदयमहिमरश्मिर्याति (११-६४)
२३. अतुहिनधाम्नि प्रोष्य भूयः पुरस्तादुपगतवति (११-६५)
२४. मधुरिपुरिव भास्वानेष एकोऽधिशेते (११.६६)
२५. तव वरद ! करोतु सुप्रभातमह्नामयं नायकः (११-६७)

अधुना चन्द्रोल्लेखस्थलानि पश्यन्तु तावत्—

१. शशिनमिव सुरौघाः सारमुद्धर्तुमेते (११-८)
२. पतति न वरमिन्दुः सोऽपरामेषगत्वा (११-१२)

---

४५. शिशुपालवधम् १०-९१

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

३. हिमरुचिररुणिम्ना राजते (११-१४)
४. संसृते सम्प्रतीदं सितकरकरजालम् (११-१६)
५. लुलितनयनताराः क्षामवक्त्रेन्दुबिम्बा (११-२०)
६. शिशिरकिरणकान्तं बासरान्तेऽभिसार्य (११-२१)
७. पाण्डुं म्लानमात्मानमिन्दुः (११-२२)
८. अङ्गमिन्दुर्दहति कृशमशेषम् (११-२४)
९. उपहसित इवासौ चन्द्रमाः (११-३०)
१०. प्लुतमिव शिशिरांशोरंशुभिर्यन्निशासु (११-५३)
११. अदयमिव कराग्रैरेष निष्पीड्य सद्यः शशधरमहरादौ (११-६२)
१२. सितकरवपुषासौ लक्ष्यते (११-६३)
१३. यातिशीतांशुरस्तम् (११-६४)
१४. उपपतिरिव नीचैः पश्चिमान्तेन चन्द्रः (११-६५)

इत्थमेव ध्रुवस्य दूरता सप्तर्षिमण्डलोपलक्षकता च "स्फुटतरमुपरिष्टादल्पमूर्तेर्ध्रुवस्य, स्फुरति सुरमुनीनां मण्डलं व्यस्तमेतत्[४६] इत्यादिना स्फुटीभवति। "प्रसभमुडुगणोऽसौ दर्शनीयोऽप्यपास्त[४७] इति "अपेतास्तारकाः ताः समस्ताः" इत्यादिना च नक्षत्रमण्डलस्य प्रकाशाभिभवात् तादृशफलाभावोऽपि दर्शितः।

प्रयाणवर्णननामके द्वादशे सर्गे सौम्यप्रकृतिचन्द्रग्रहः सर्वथाप्यचर्चितः। सूर्यस्यापि पद्यद्वय एव क्रमशः तापगुणः पितृकारकत्वधर्मश्चाभिव्यञ्जितः। तद्यथा—"अंशुभिः प्रतप्तमभ्यर्णतया विवस्वतः (१२.६६) तथा "याधर्मभानोस्तनयापि (१२.६७) इति।

श्रीकृष्णसमागमनामके त्रयोदशेसर्गे ज्योतिषस्य द्वाभ्यां योगाभ्यां सह दशसु श्लोकेषु सूर्यचन्द्रौ चित्रितौ स्तः तद्यथाऽऽकृतिवर्णने "क्षपाकरकरोत्कराकृति (१३.२०) इत्यादिना चन्द्रस्मरणम्, "अलघूडुपाण्डु उष्णवारणम् (१३.२१) इत्यादिना विशालनक्षत्राणामुल्लेखः, "अर्कमारुतावनुसस्रतुस्तमथ दस्रयोः सुतौ (१३.२३) इत्यादिना सूर्यभौमस्मरण कृतम्। प्रमदाः "निशाकरमनोरममुखैः (१३.२९) युक्ताः सन्ति। तासां मुखेषु अवगुण्ठनानि "उदयाद्रिकन्दराविवरोदरस्थितमिवेन्दुमण्डलम् (१३.३१) इत्यादिनोत्प्रेक्षितानि। माधवे चन्द्रः "हिममुक्तचन्द्ररुचिरः (१२.३८) दुग्धोदधौ च स "दुग्धवारिधिक्षणगर्भवासमनिदाघदीधितिः (१३.५१) इत्यादिरूपेण वर्णितः। स एव चन्द्रो मारकोऽपि यथा "शशलाञ्छनांशव

---

४६. शिशुपालवधम् ११-३
४७. ,, ११-५७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

उपांशु जह्निरे (१३.५४)। अत्र लग्ने पूर्णचन्द्रसूर्ययोरसम्भवयुतिसङ्कल्पनापि दृश्यते "उदयाद्रिमूर्ध्नियुगपच्चकासतोर्दिननाथपूर्णशशिनोरसम्भवाम् (१३.६४) इति पर्यन्ते च श्रीकृष्णः शशिनोपमितः "उदन्वतः पयः शशिनेव राजकुलमापनन्दथुम् (१३.६५) इति।

श्रीकृष्णार्घदानाभिधे चतुर्दशे सर्गे 'वो विहन्तुमलमास्थितोदये वासरश्रियम-शीतदीधितौ (१४.८) इत्यादिना सूर्योदयः, "आननेन शशिनः कला दधत् (१४.१८) इत्यादिना च शशिकला स्मर्यते। सूर्यचन्द्रमण्डलस्य सर्वापेक्षया दीर्घस्थायिता "आशशाङ्कतपनार्णवस्थितेः (१४.३७) इत्यादिना व्यज्यते। जन्मकुण्डलीफलादेशे द्वादशभावस्पष्टस्य परमोपादेयता "भावशुद्धि सहितैः (१४.५०) इत्यादिना प्रतिपादिता। चन्द्रग्रहणस्य चित्रम् "राहुरिन्दुमधुनापि बाधते (१४.७०) इत्यत्र द्रष्टुं शक्यते। अत्र सूर्यशशिमण्डलादपि उर्ध्वलोकः संकेतितः, यथा—"लङ्घितार्क-शशिमण्डलक्रमः (१४.७५) इति।

शिशुपालादिक्षोभवर्णनपरे पञ्चदशे सर्गे अष्टसु श्लोकेषु सूर्यचन्द्रग्रहयोः गुणधर्माः प्रकाशिताः सन्ति। तद्यथा—"उददीपि भिये जगतः स कीलमिव सूर्यमण्डलम् (१५.४८) इत्यादिना सूर्यस्य भयजनकता, "प्रातरहिमकरताम्रतनुः (१५.४९) इत्यादिना रक्ततापगुणयोः, "द्योतमुखरुक्मविलसदहिमांशुमण्डलाः (१५.७८) इत्यादिना चण्डता च व्यज्यते। एवमेव "भिन्नवक्त्रेन्दुलक्ष्मीः (१५-९६) इत्यादिना चन्द्रस्य शोभाधायकता, दधतः शशाङ्कितशशाङ्करुचिः (१५-८०) इत्यादिना लाञ्छनं च स्फुटीभवति। चन्द्रग्रहणस्य दृश्यमपि "राहुवदनविकृतं व्यभाव्यत ग्रस्तशशधरमिव (१५-३१) इत्यादिना उपस्थाप्यते। बृहस्पतेर्निर्बलत्वेन वाणीवैकल्पमिति ध्वन्यते "गुरुकोपरुद्धपदमापद् (१५-५६) इत्यादिना। "परितश्च-लोडुमण्डलनभः (१५-७४) इत्यादिना तारागणस्य गतिरनुमातुं शक्या।

दूतसात्यकिसंवादपरकेषोडशे सर्गे षट्सु श्लोकेषु सूर्यचन्द्रयोः सामान्यगुणधर्माः कथिताः सन्ति। तथाहि "अधिवह्निपतङ्गतेजसः (१६-५) इत्यादिना सूर्यस्य तेजः, "रविरागिषु शीतरोचिषः करजाल कमलाकरेष्विव (१६-४३) इत्यादिना सूर्यस्य कर्मणि चन्द्रस्याकिञ्चित्करत्वञ्च प्रकाशितम्। सूर्यग्रहणं "ग्रसते हितमोदहं मुहुर्ननु राह्वाहमहर्पतिं तमः (१६-५७) इत्यादिना निर्दिष्टम्। "तुहिनांशुममुं सुहृज्जनाः कलयन्त्युष्णकरं विरोधिनः (१६-६४) इत्यादिना सूर्यचन्द्रयोः मिथो विरुद्धगुणो उद्भासिताः। भिन्नरुचिर्हिचन्द्रः—"रुचिमिन्दुदले करोत्यजः परिपूर्णेन्दु-रुचिर्महीपतिः (१६.७१) इत्यादिना ध्वन्यते। "लोकालोकव्याहतं धर्मरश्मेर्धाम (१६-८३) इत्यादिना च दृश्यमानसूर्योऽपि परिसीमितः।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

यदुवंशक्षोभणाख्ये सप्तदशे सर्गे "रवेः करैः (१७-१५) इति "मधुभिद्-विवस्वता (१७-४१) इति, "प्रतिमुखतिग्मदीधितिप्रतिप्रभास्फुरदसि दुःखदर्शना (१७-४५) इति, "समुल्लसद्दिनकरवक्त्रकान्तयः (१७-६७) इति च सूर्यगुणान्; "शरच्छशधरखण्डपाण्डुरः (१७-५६) इति च चन्द्रगुणानभिव्यञ्जन्ति। एवमेव उदितगुरुप्रतिश्रुतिः (१७-४२) इत्यादिना उदितगुरोः श्रुत्यादिकारकत्वमभिव्यज्यते।

संकुलयुद्धवर्णनाभिधेऽष्टादशे सर्गे "उच्चैर्मूर्धव्योम्नि नक्षत्रमाला··· ओषामासे (१८-३५) तथा "ताराजालसारामिव द्याम् (१८-४४) इत्यत्र नक्षत्र मण्डलं स्मृतम्। एवमेव "प्रौढचन्द्रद्युतीनि (१८-६७) इत्यादौ चन्द्रस्य, 'ग्रेसेमुग्धैः सैंहिकेयानुकाराद्रौद्राकारादप्सरोवक्त्रचन्द्रैः (१८-५९) इत्यादौ च चन्द्रग्रहणस्य स्वरूपमुद्घाटितं भवति।

चित्रयुद्धवर्णननामके एकोनविंशे सर्गे "विभावी विभवी भामः" (१९-८६) इत्यादौ तथा "भाभोऽभीभाभिभूभाभूः (१९-३) इत्यादौ नक्षत्रमण्डलाभोद्भासिता। सूर्यसंक्रान्तिचित्रमत्र पद्यद्वयेनोपस्थितम्—"दिशमर्कमिवावाचीं मूर्च्छागतमपाहरत्, मन्दप्रतापं तं सूतः शीघ्रमाजि विहायसः (१९-६) इत्यादिना, "शूरः शौरिरशिशिरैराशाशैराशु शशिशः, शरारूः श्रीशरीरेशः शुशूरेऽरिशिरः शरैः (१९-१०८) इत्यादिना च। एवमेव "विववारवरो वैरं वीरोरवि रिवौर्वरः (१९-१००) इत्यादिना तथा "करीरः कर्करोऽर्करुक् (१९-१०४) इत्यादिना सूर्यसामान्यधर्माः प्रख्यापिताः भवन्ति।

शिशुपालवधवर्णननामके विंशे सर्गे बहुधा सूर्यस्य, त्रिर्धूमकेतोः सकृच्च चन्द्रश्च राहोश्च सामान्यवर्णनमुपलभ्यते। तद्यथा क्रमेण—

१. रुरुधे पिहिताहिम द्युतिर्यौर्विशिखैः (२०-१५)
२ विनिवारितभानुतापम् (२०-१६)
३ कृततिग्मद्युतिमण्डलापलापैः (२०-२८)
४ विदधद्भास्करमर्थशून्यसंज्ञम् (२०-३३)
५ अर्थसूर्यरुचीव दृष्टी तद्विभुरिन्द्रकं विलोचनः (२०-३७)
६ पादैश्चक्लृपे भानुमतः पुनः प्रसर्तुम् (२०-३९)
७ सुतरामुत्तपते पतिः प्रभाणाम् (२०-४०)
८ दुरीक्ष्यबिम्बस्तपनस्तत्किरणैः, (२०-५५)
९ तिरयन्तः पटलानि भानुभासाम् (२०-६७)
१० सवितुः परिभावुकैर्मरीचीन् (२०-६९)
११ आकाशे दिनकरकरान् विक्षिपद् विस्मिताक्षैः (२०-७९)

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राहोः स्मरणं यथा—"राहुस्त्रीस्तनयोरकारि सहसा कार्कश्यलक्ष्मीर्वृथा (२० ७८) इत्यादौ चन्द्रस्मरणं तु तद्विभुरिन्द्वर्कविलोचनः (२० ३७) इत्यादौ कृनम्। विनाशसूचकस्य धूमकेतोरपि त्रिरुल्लेखो यथा—निजकेतुशिरः श्रितः (२०.५२), "चलितोद्धतधूमकेतनोऽसौ (२०.६१), "विदधे केतनतेव धूमकेतोः (२० ६९) इति।

३ **ज्यौतिषविशेष वृत्तम्**—उपर्युक्तोदाहारादिभिर्माधकाव्यस्य तावत्तानि सर्वाण्यपि चित्राणि प्रदर्शितानि, यैः सूर्यादिग्रहाणां विशेषतः सूर्याचन्द्रमसोः गुणधर्माःद्योत्यन्ते। यद्यपि तानि चित्राणि काव्यचारुतामञ्चन्तीति ततोऽपृथग्भूतानि, तथापि औचित्यपदवीमत्यजन्ति गणकचेतसि स्वाभाविकं किमपि शास्त्रीयं स्वरूपं नूनं व्यञ्जयन्ति। तदेव स्वरूपं सामान्यवृत्ततयात्र किञ्चिदुद्घाटितम्। अधुना च सूर्यादिग्रहाणां रूपगुणकारकत्वादिविषयमाश्रित्य माघकाव्ये यदुक्तं तदेवनिष्कृष्यात्र किञ्चिदुच्यते। अस्यामुक्तौ पूर्वं तावद् ग्रहाणां स्वरूपादिकं स्फुटी भविष्यति, अनन्तरञ्च ज्यौतिषस्य ते खलु चत्वारो योगाः प्रदर्श्यन्ते, ये काव्येऽस्मिन् विलसन्ति। वक्ष्यमाणं ग्रहस्वरूपं तज्जन्ययोगाश्च जातकफलादेशकथने साक्षात् सहकारितया पूर्वोक्त वृत्तादनूनं भिद्यन्ते, अतस्ततः पार्थक्येन विशेषवृत्तेति नाम्ना संगृह्योच्यन्ते।

सूर्यः प्रतिमासमेकैकां राशिं संक्रमते इति वर्षस्य द्वादशसु मासेषु द्वादशसंक्रान्तयो भवन्ति। तत्र प्रतिसंक्रान्ति सूर्यस्वरूपं भिद्यते इति पुराणेषु द्वादशनामभिः "द्वादशात्मादिवाकरः' इत्युच्यते। तदुक्तं माघकाव्येऽपि—

> **"उदेतुमत्यजन्नीहां राजसु द्वादशस्वपि।**
> **जिगीषुरेकोदिनकृदादित्येष्विव कल्पते॥'** (२-८१) **इति**

चन्द्रस्तावद् वनस्पतिलतागुल्मक्षीरिवृक्षाणां कारकोऽधिपतिश्च "क्षीरोपेतांस्तथाचन्द्रः[४८] इति। अतएव महाकविनापि "ओषधिपतिः करैः (९.३६) इत्यादि प्रयुक्तम्।

सूर्यचन्द्रग्रहणे स्पर्शमध्यमोक्षनामभिः त्रिधावस्थाविश्रुताः। तदुक्तं माघेनापि—

> **'समकालमिवाभिलक्षणीयग्रहसन्धानविकर्षणापवर्गैः।**
> **अथ सामिसरं शरैस्तरस्वी स तिरस्कर्तुमुपेन्द्रमभ्यवर्षत्"** (२०-८)

**इति—**

ग्रहणकाले राहुच्छायया सूर्यमण्डलं धूमायितं भवति। तदुक्तं माघकाव्येऽपि—

---

४८. बृहत्पाराशरी ३-३९

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"सविषस्वसनोद्धतोरुधूमव्यवधिम्लानमरीचिपन्नगानाम् ।
उपरागवतेव तिग्मभासा वपुरौदुम्बरमण्डलाभमूहे ॥" (२०-४५)

वराहमिहिरादिनां प्राचां ज्यौतिषाचार्याणां सिद्धान्तानभ्युपगम्य महाकविमाघोऽपि सूर्ये गतिं स्वीकरोति—"गतं तिरश्चीनमनूरुसारथेः (१.२)" इत्यादिना । अत्र यद्यपि आर्यभट्टादयो नवीना गणकाः सूर्यं गतिहीनं मन्वते, तथापि तेन ज्यौतिषगणिते न कोऽपि भेदः ।

ज्यौतिषहोरास्कन्धस्य सिद्धान्तः खलु "सूर्यसन्निधिमुपेत्यग्रहा अस्तं यान्तीति" । तेषां फलञ्चाशुभम् । संकेतितमिदं महाकविनापि— "ददृशेऽपि भास्कररुचाह्नि न यः" (९.२३) इत्यादिना । सूर्यग्रहस्य कारकत्वविषये कविना द्योतितं यथाऽयं रोगनाशको बलदः कुरसशोषकोग्रहराजश्चेति—

"सदामदबलप्रायः समुद्धतरसो बभौ ।
प्रतीतविक्रमः श्रीमान् हरिर्हरिरिवापरः ॥ (१९-११९) इति ।

आमं रोगं द्यति इति आमदः, बलं पृणाति इति बलप्रः, सतां भक्तानाम् आमदः बलप्रश्च अयः उदयः यस्य स इतिच्छेदः ।

'सूर्यः चन्द्रश्च राजानौ' इति शास्त्रोक्त्या महाकविनापि चन्द्रमसि राजता सौम्यता च प्रत्यपादि । तद्यथा—

"अथ लक्ष्मणानुगतकान्तवपुर्जलधिं विलङ्घ्य शशिदाशरथिः ।
परिवारितः परित ऋक्षगणैस्तिमिरौघराक्षसकुलं बिभिदे" ।
(९.३१) इति

शास्त्रे चन्द्रोवैश्यजातिः 'शशिसौम्यौ वैश्यवर्णौ" इत्यभिधानात् । चन्द्रसमुद्रयोश्च वर्तते कश्चनाभिसंबन्धोविशेषः तत्र महाकवेरुपमानमिदं तोलनीयम्—

"उपजीवतिस्म सततं दधतः परिमुग्धतां वणिगिवोडुपतेः ।
घनवीथिवीथिमवतीर्णवतो निधिरम्भसामुपचयाय कलाः" ॥
(९.३२) इति

"सूर्यपुत्रधरापुत्रौ तमः प्रकृतिकौ द्विज[५०]" इति शास्त्रोक्त्या भौमः तमःप्रधानः पापग्रहः क्रूरकर्मरतश्च । महाकविनापि तथ्यमिदं संकेतितम्—

"तवधर्मराज इति नाम कथमिदमपठ्ठु पठ्यते ।
भौमदिनमभिदधत्यथवा भृशमप्रशस्तमपि मङ्गलं जनाः" ॥ (१५-१७) इति

गुरुः धनूराश्याधिपः, स्वराशिस्थश्च शुभफलदायी । अत्र महाकवेः पद्यम्—

---

४९ बृहत्पाराशरी ३-२१
५०. ,, ३-२२
५०. फलदीपिका २-२७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

गुरवोऽपि निषद्य यन्तिदद्र्धनुषि क्षमापतयो न वाच्यमेतत् ।
क्षयितापदि जाग्रतोऽपि नित्यं ननु तत्रैव हि तेऽभवन्निषण्णाः ।। (२०-३४)

केतुग्रहस्तु नृशंसः पतितः रक्तः उग्रदृष्टिः कटुभाषी संशस्त्रश्च शास्त्रे निरूपितः[५१] । महाकविनापि "व्योम्नीव भ्रुकुटिच्छलेन वदने केतुश्चकारास्पदम्" (१-७५) इत्यादिना तस्य कोपलक्षकताङ्गीकृता । अनेन भाविशिशुपालविनाशः पूर्वमेव सूचितः ।

एतावता दृष्टान्तेन ग्रहस्वरूपं प्रदर्शितम् । साम्प्रतं महाकाव्ये उपलभ्यमानाश्चत्वारो योगाः प्रस्तूयन्ते ।

लग्नयोगः—सारावलीग्रन्थेऽस्य स्वरूपं यथा—

"लग्नेत्रयो विगतशोकविवर्धितानां कुर्वन्ति जन्मशुभदाः पृथिवीपतीनाम्[५२] इति । उत्तरकालामृते चास्येदं स्वरूपम्—

'लग्नस्यादिमभव्यमान्तिमयुतो लग्नाधिनाथः क्रमात्,
कुर्याद् दण्डपतिञ्चमाण्डलपतिं ग्रामाधिपं तच्छिशुम् ।
शुक्रार्येन्दुजवीक्षितश्च सहितश्चेत्सौम्यवर्गस्थितः,
स्वोच्चेवाऽखिलभूमिपालकममुं भूपालवन्द्यं वरम्"[५३] इति

स्वगृहिलग्नेशेन सह गुरुशुक्रयोः युतिदृष्टिसत्त्वञ्चेत्तर्हि जातको राजाधिराजो भवति । निर्दिष्टञ्चेदं तथ्यं द्वितीयसर्गे महाकाव्यस्य—

"सार्धमुद्धवसीरिभ्यामथासावासदत् सदः ।
गुरुकाव्यानुगां बिभ्रच्चान्द्रीमभिनभः श्रियम् ।।" (२-२) इति

देवमन्त्रीगुरुः दैत्यमन्त्री च शुक्रः उभौ चेच्चन्द्रेण मन्त्रयेयाताम्, नानेनपरोयोगो भवितुमर्हति ।

यात्रायोगः—श्रीकृष्णस्य द्वारकातः इन्द्रप्रस्थाय प्रस्थानमतीवशुभमुहूर्ते समजनि । तद्यथा संकेतितम्—

ररराज सम्पादकमिष्टसिद्धेः सर्वासु दिक्ष्वप्रतिसिद्धमार्गम् ।
महारथः पुष्यरथं रथाङ्गीक्षिप्रं क्षपानाथ इवाधिरूढः ।।" (३-२२) इति

उत्तरदिशायाः पुष्यनक्षत्रे सर्वोत्तमः यात्रायोगो भवति । "पुष्यः सर्वार्थसाधकः" तथा "पुष्यो हस्तो मैत्रमप्याश्विनञ्च चत्वार्याहुः सर्वदिग्द्वारकाणि" इत्यादिवाक्यैः पुष्यमहिमासुस्पष्टः । पुष्ये तदधीशः चन्द्रः स्वगृही सन् उत्तराशागमने

५१. फलदीपिका २-३४
५२. सारावली ३४-१२
५३. उत्तरकालामृतम् ४.७

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सम्मुखीनो भवति। "यो यो भावः स्वामिदृष्टो युतो वा तस्य तस्यास्ति वृद्धिः" इत्यादिना तस्य शुभत्वं निर्बाधम्।

दुरधरायोगः—

" चन्द्रात् स्वान्त्योभयस्थे हि ग्रहे सूर्यं विना क्रमात्।
सुनफाख्योऽनफाख्यश्च योगो दुरधराह्वयः[५४] ॥" इति

चन्द्रात् द्वितीये द्वादशे च सूर्येतरग्रहसत्त्वे योगोऽयं जायते। शुभग्रहसत्त्वे शुभता चास्य योगस्य। तदुक्तम्—

उत्पन्नसुखभुग्दाता धनवानसंयुतः।
सद्भृत्यो जायते नूनं जनो दुरधरासम्भवः[५५] ॥" इति

महाकाव्येऽस्य चर्चा यथा "पवनात्मजेन्द्रसुतमध्यवर्तिना नितरामरोचि रुचिरेण चक्रिणा।

दधतेव योगमुभयग्रहान्तरस्थितिकारितं दुरधराख्यमिन्दुना ॥" (१३,२२)

अत्र हि भौमबुधान्तरवर्तिचन्द्रजन्यदुरधरायोगः स्पष्टमभिहितः।

शुभयोगः—महाकाव्येऽस्मिन्नस्योल्लेखो यथा—

"अभितः सदोऽथ हरिपाण्डवौ रथादमलांशुमण्डलसमुल्लसत्तनू।
अधतेरतुर्नयननन्दनौ नभः शशिभार्गवावुदयपर्वताविव ॥ (१३-६१)"इति

रात्रौ जनिः स्यात्, स्वांशेऽधिमित्रांशे वा स्थितेन चन्द्रेण शुक्रस्य युति-दृष्ट्यन्यतरसंबन्धश्चेत्तर्हि योगोऽयञ्जायते। अत्र पद्ये शशिभार्गवोदयात् रात्रिरिति-निश्चितम्। एतत्स्वरूपं शास्त्रे यथा—

"स्वांशेवा स्वाधिमित्रांशे स्थितश्च शशभृन्निशि।
शुक्रेणदृश्यते तत्र जातो धनसुखान्वितः[५६] ॥" इति

एवञ्च समासेन योगान् प्रस्तूयानिष्टग्रहाणां विप्रैः शान्तिरपि विधेयेति माघकाव्यादेव स्मार्यते तद्यथा काव्येऽस्मिन्—

"विद्वद्भिरागमपरैर्विवृतं कथञ्चिच्छ्रुत्वापि दुर्ग्रहमनिश्चितधीभिरन्यैः।
श्रेयान् द्विजातिरिव हन्तुमघानि दक्षं गूढार्थमेष निधिमन्त्रगणं बिभर्ति ॥"
(४-३७) इति

ज्यौतिषशास्त्रेऽपि ग्रहशान्तिरियं मानिता। उपायश्चास्याः तत्र तत्र बहुविधः प्रोक्तः। साम्प्रतं तु एतेषूपायेषु रत्नादिधारणमेव लब्धप्रचरं स्वार्थसाधकञ्च।

---

५४. बृहत्पाराशरी ३७.७
५५. ,, ३७:१०
५६. ,, ३७-३

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

परं महाकवेः संकेतः पौराणिकीमेव ग्रहशान्ति स्मारयति । तदुक्तम्—

'तत्प्राप्तिर्धर्ममूलात्तदनुबुधकवी शंकरस्याभिषेकात्,
चन्द्रश्चेत् तद्वदेव त्रिदिवपतिगुरुर्मन्त्रयन्त्रौषधीनाम् ।
सिद्ध्या मन्दारसूर्या यदि शिखितमसी तत्र वंशेश पूजा,
कार्याम्नायोक्तरीत्या बुधगुरुनवपाः क्षिप्रमेवात्र सिद्धिः[४७] ॥' इति

एतावतावाग्जालेन शिशुपालवध महाकव्ये समागतज्योतिषां स्वरूपं प्रदर्शितम् । साहित्यिककाव्ये ज्यौतिषशास्त्रस्य तत्त्वं तावत् स्वल्पमेव भवतीतिकृत्वा सामान्यवृत्तानामेवात्र यद्यपि वैपुल्यं जातम् पुनरपि यानि विशेष वृत्तानि तानि निष्कृष्य साकल्येन निर्दिष्टानि । उत्साहस्थायिभावाभिव्यक्तवीररसप्रधानेऽस्मिन् महाकाव्ये ज्यौतिषदर्शनव्याकरणराजनीतिप्रभृतिविषयाणां सन्निवेशः सर्वथौचितीं नातिक्रामति । अनेनैवाभिप्रायेण महाकविर्माघः स्वकीयं ज्यौतिषवैदुष्यमितस्ततः प्रवाहयन्नङ्गिनं वीररसं सर्वथा परिपुष्णन् चारुत्वनिबन्धनशोभामाधापयन्नालङ्कारिकमणिमालायां सुमेरुभूतो महीयते !

---

४७. जातकालङ्कारः २.१६

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# उदयनाचार्यस्य ईश्वरविचारः

—खड्गनाथ मिश्रः

भ्रमरी कबरी मार भ्रमरी मुखरी कृतम् ।
दूरी करोतु दुरितं गौरी चरण पंकजम् ॥
भवानी शंकरौ वन्दे श्रद्धाविश्वास रूपिणौ ।
याभ्यां विना न पश्यन्ति सिद्धाः स्वान्तःस्थमीश्वरम् ॥

ईश्वरावतार विशेषस्य नैयायिक शिरोमणिरुदयनाचार्यस्य ईश्वरोपासन सारमेव तावत्प्रस्तूयते-यद्यपि ईश्वरः परमात्मा संदिग्धो नास्ति येन संशयोच्छेदाय स निरुपयितव्यो विचारयितव्यः स्यात्, कुतो नास्ति स संदिग्ध इति चेदुच्यते वेदान्तिकापिलपातंजलमहापाशुपतशैववैष्णवपौराणिक बौद्धजैनमीमांसकचार्वाकादयः समेऽपि शास्त्रविदो दार्शनिकास्तं भगवन्तं भवम् अद्वितीयस्वप्रकाशस्वाभाविकचेतनक्लेशादिरहितपुरुषविशेष, परमाण्वदृष्टादि निरपेक्ष जगत्कर्तृ, निस्त्रैगुण्य, पुरुषेषु नित्यसर्वज्ञत्वादि युक्तोत्तम, पितामह, क्षणिक सर्वज्ञ, स्वकर्माजित शरीरादृष्टात्मकावरणरहित, वेदोपदिष्टोपास्य यन्त्रादि, लोकव्यवहारसिद्धराज-चतुर्भुज प्रतिमान्यतमं किंचित् किंचित्तत्तद्रूपेण स्वीकुर्वन्त्येव । नैयायिकास्तत्र आहुःयावदुक्तोप-पन्न-इति, वेदान्ति प्रभृतिभिरुक्तेषु परमात्म प्रकारेषु यस्योपपत्तिर्भवितुं शक्नोति—योगमकतोपयिकयावत्साधनागम्यो भवति स एव परमात्मा इति—

"यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो,
बौद्धा बुद्ध इति प्रमाण पटवः कर्तेति नैयायिकाः ।
अर्हन्नित्यथ जैन शासनरताः कर्मेति मीमांसकाः,
सोऽयं वो विदधातु वांछित फलं त्रैलोक्य नाथो हरिः ॥"

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इति सुप्रसिद्धाशीर्वादोक्तितोऽपि ईश्वरे संशय राहित्यमेव। शास्त्रविदां का कथा अशास्त्र विदोऽपि साधारणाः शिल्पिनस्तं विश्वकर्मेत्युपासते विश्व जगत् कर्मकार्यं यस्येति व्युत्पत्या जगत्कर्तारं भवं मन्यन्ते शिल्पिनो जनाः अतो जाति गोत्र प्रवर चरण कुलधर्मादित्रिदासंसारं श्रुत्यादि प्रमाण सिद्धे प्रसिद्धानुभावे—प्रसिद्ध जगत्कर्तृत्वादिके भगवति भवे नास्ति संशयलेशोऽपि येन स संशयोच्छेदाय निरूपयितव्यो भवेत् तथापि अत्र येयं न्यायचर्चा ईश्वर विषयिणी अनुमान द्वारा ईश्वर सिद्धि प्रयासात्मिका न्याय प्रसूनाञ्जलि रूपा अंजलिस्थ कुसुमरूपाभासा परमात्मनः उपासना एव इयं न्यायचर्चा मननस्वरूपाश्रुतिस्मृतीहासपुराणादिभ्यो बहुधा परमात्मश्रवणानन्तरम् "आत्मावारे द्रष्टव्यो श्रोतव्योमन्तव्यो निदिध्यासितव्यः" इति श्रुतेः "आगमेनानुमानेन ध्यानाभ्यासरसेन च त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्" इति स्मृतेश्च कर्तव्यत्वेनावगता अतोऽत्र संशयोच्छेदरूपदृष्ट प्रयोजन विरहेऽपि स्वर्गापवर्गात्मक जीवन्मुक्ति परममुक्तिरूपोत्तमोत्तमादृष्ट परम पुरुषार्थं लाभायोपासनावश्यं कर्तव्येत्यतः क्रियमाणास्ति एतदेव मंगलानन्तरं—

**"स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः।**
**यदुपास्तिमसावत्र परमात्मा निरूप्यते॥"**

इह यं कमपिपुरुषार्थमर्थयमाना शुद्धबुद्ध स्वभाव इत्यौपनिषदाः इत्यादि—

**"न्यायचर्चेयमीशस्य मनन व्यपदेश भाक्।**
**उपासनैव क्रियते श्रवणानन्तरागता॥"**

आगमेनानुमानेन ध्यानाभ्यासरसेन च त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् इति स्मृतेश्च इत्यन्त पद्य गद्यात्मक वाक्य कदम्बेन विज्ञापितं कुसुमांजलो आचार्यैः। मननस्य स्वर्गापवर्ग मार्गत्व बोधक निर्दिष्ट वाक्ये स्वर्गापवर्गपदेन जीवन्मुक्तिः परम मुक्तिरभिप्रेता, कर्म संचित, प्रारब्ध, क्रियमाण, भेदेन त्रिविधं भवति तत्र प्रारब्धं कर्म सुख-दुःख साक्षात्कारात्मकभोगमन्तरा नैव विनश्यति इत्येकः पक्षो नाभुक्तं क्षीयते कर्म जन्म कोटि शतैरपि इत्युक्तेः तत्र पक्षे श्रवण मनन निदिध्यासनैः परमात्म साक्षात्कारे जाते कायव्यूह रचनया अर्थात् युगपदेव अनेक शरीर परिग्रह द्वारा अभुक्ताशेष प्रारब्ध कर्मणामपि तत्रैवत्वरितं भोगो जायते, भोगादेव च तेषां प्रक्षयः इति। ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुतेऽर्जुन इत्यत्र सर्वपदस्योक्तापवादशास्त्रप्रामाण्येन प्रारब्धेतरकर्मपदत्वस्वीकारात्। योगप्रकर्षबलेन योगी एकस्मिन्नेव जन्मनि काय-व्यूह रचनया युगपदेव नानाशरीराणि परिगृह्य अनेक जन्मानिक शरीरभोग्य कर्मफलानि आश्वेव भुङ्क्ते भुक्त्वा च प्रध्वस्ताशेष कर्मराशिः सम्पद्यते इति तदाशयः। पक्षान्तरे भुक्तावशिष्ट

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

संचित क्रियमाण यावत्कर्मराशेरीश्वरसाक्षात्कारात्मकज्ञानाग्निनैव नाशः क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इति श्रुतेः, ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन इति स्मृतेश्च । जीवन्मुक्तावस्थायां क्रियमाणं कर्म बन्धाय न भवति "न प्रवृत्तिः प्रतिसन्धानाय हीन क्लेशस्य (जीवन्मुक्तस्य) देहिनः" इत्युक्तेः, अपूर्वकर्मणे जीवन्मुक्तानां प्रवृत्तिर्नैवभवति तेषां मद्य स्त्री निषेवण ब्रह्महत्यायागादि अशेषं कर्म केवल पूर्वकृत कर्मणां फलस्वरूप सुखदुःखादि भोग हेतुतयैव भवति न पुनरग्रिमफलाय, जनकोह वैदेहो बहु दक्षिणेन, यज्ञेनेजे अभयं वै जनक प्राप्तोसि तत् सुकृतदुष्कृते विधूनुते, एनं ह वाव नतपति किमहं साधुनाकरवं किमहं पापमकरवमित्यादि श्रुतिभ्यस्तथैव विनिश्चयात् ।

अनुमानात्मक न्यायस्य तत्रैव संदिग्धविषयकत्वापेक्षा यत्र दृष्टमेव संशयनिवर्तकं भवति । अयन्तु न्यायः श्रुति स्मृति प्राप्त परमात्मोपासनात्मकोऽदृष्टस्वर्गापवर्ग प्रयोजनकोऽतोऽत्रपरमात्मनि संशयविरहो नैवदोषावह इति आचार्योक्तेराशयः ।

यत्र भाष्यादौ संशयस्य न्यायांगता उक्तानानुपलब्धेनोनिर्णीतेर्थेन्यायः प्रवर्तते किं तर्हि संशयितेऽर्थे इत्यादिना, सानानुमितेर्न्यायस्य वा अशेषस्थलाभिप्रायिका असंशयितस्यापि वस्तुनो मेघादेः घनगर्जनादिनाऽनुमितेः सर्वसम्मतत्वात् । या खलुपक्षता परामर्शस्येव अनुमिति मात्रम्प्रति कारणत्वेनापेक्षिता सा न साध्य संशय रूपा विनापि संशयं घनगर्जितेन मेघानुमितेरुपपन्नत्वात् ।

पक्षता विवेचनारम्भे अनुमान चिन्तामणौ न तावत् संदिग्ध साध्य धर्मत्वं पक्षत्वम् संदेहोहि न विशेषणम्, परामर्श पूर्वं लिंगदर्शन व्याप्ति स्मरणादिना तस्य नाशात् । नोपलक्षणम्, अव्यावर्तकतापत्तेः, अनुमित्सारहित सिद्धि स्थले अनुमिति वारकत्वासम्भवात्-तत्कालीन परामर्शस्यापि कालान्तरीय संशय विषय साध्यवद्धर्मि वृत्तित्वावगाहितया अनुमिति सामग्री सत्त्वात्, इत्यादिना साध्य संशये पक्षतात्व निराकरणात् ।

एवं संशययोग्यतापि न पक्षता-संशययोग्यता हि साधक बाधकप्रमाणाभावरूपा, तस्या यदि उभयाभावोर्थस्तर्हि उभयाभावस्य प्रत्येकसत्त्वेऽपि सत्त्वेन दोषः स्यात् । यदि तस्या अभावद्वयम्-साधकाभावो बाधकाभावश्चार्थस्तर्हि बाधक प्रमाणाभावो व्यर्थः स्यात् बाधक प्रमाणवत्ह्रदादि पक्षकस्थले बाधहेत्वसिद्ध्यादि दोषस्य अवश्यं सत्त्वेन तत एव तत्र अनुमित्युत्पतेः सम्भवाभावात् ।

नापि साधक प्रमाणाभाव मात्रं पक्षता, प्रत्यक्ष दृष्टेपि अनुमानदर्शनात्, एकलिंगेनानुमितावपि लिंगान्तरेण तदनुमानाच्च ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं सिषाधयिषामात्रमपि न पक्षता, संशयस्येव परामर्शात्पूर्वं सिषाधयिषाया अपि नाशात् विनापि सिषाधयिषां घनगर्जनेन मेघानुमानाच्च । किन्तु सिषाधयिषा-विरह विशिष्टा या सिद्धिस्तादृश्या विशिष्ट सिद्धेरभावरूपैव पक्षता, परामर्श इव अनुमितिम्प्रति कारणम् अग्निना दाहं प्रति यथा चन्द्रकान्तमणिः प्रतिबन्धकः सूर्य्य-कान्तमणिश्च उत्तेजकः अर्थात् सूर्यकान्तमण्यभावविशिष्ट एव चन्द्रकान्तमणिः दाह-म्प्रति प्रतिबन्धकः प्रतिबन्धकाभाव विषया च सूर्यकान्तमण्यभाव विशिष्ट चन्द्रकान्त-मणेरभावो दाहम्प्रति कारणम्, तथैव अनुमितिम्प्रति सिद्धिः साधक मान पदाभिधेया साध्य निश्चय स्वरूपा प्रतिबन्धिका भवति । अनुमितीच्छात्मिका सिषाधयिषा च तत्र उत्तेजिका भवति अर्थात् सिषाधयिषा विरह विशिष्टैव सिद्धिरनुमितं प्रतिबध्-नाति नान्या, सिषाधयिषा सहित सिद्धि सत्त्वे तु परामर्शसत्त्वे अनुमितिर्भवत्येव अतः सिषाधयिषा विरहस्थले सति परामर्शे सिद्धेरभावोऽपेक्षितः तत्र सिद्धौ सत्या-मनुमितिर्न भवति । तस्मात् साध्य संशयवत्यपि क्वचिद् यत्र परामर्शाधिकरणे सिषाधयिषाया विरहः सिद्धि विरहश्च तिष्ठतस्तत्र साध्य संशयस्थले सिषाधयि-षायाः सिद्धेश्च अभावात् उभयाभाव प्रयुक्तस्य सिषाधयिषा विरह विशिष्ट सिद्धेर-भावस्यैव सत्त्वेन सिद्धान्तीकृतपक्षतासत्त्वादनुमितिर्भवति । एतद् बुद्ध्यैव केवल नानुपलब्धे नो निर्णीतेऽर्थे न्यायः प्रवर्तते किन्तर्हि संशयितेऽर्थे इत्युक्तिः, न तु सर्वविधन्यायस्थलाभिप्रायेण इति वस्तुस्थितिः । विशेष प्रतिपत्तिर्व्याख्यानादेव भवति अतो व्याख्यानापेक्षोऽयं विशेषो व्याख्यातः । वस्तुतः सिषाधयिषा विरह विशिष्ट सिद्ध्यभावरूपाया एव पक्षताया अनुमितौ अपेक्षितत्वेन—

नहि करिणि दृष्टे चीत्कारेण तमनुमिमतेऽनुमातारः, प्रत्यक्ष परिकलितम-प्यर्थमनुमानेनबुभुत्सन्ते तर्क रसिका, इत्यनयोर्वाचस्पतिवचनयोर्विरोधः परिहृतो भवति, तदुक्तम् इति वाचस्पति वचनयोरविरोधात् इति अनुमानचिन्तामणौ, अनुमित्सा तद् विरहाभ्यां तदुपपत्तेरिति तदर्थः । अनुमित्सा रहित सिद्धिस्थले परामर्शेन अनुमितिर्न भवति दर्शित पक्षतात्मक कारण विरहात् । अनुमित्सा सम्वलित सिद्धि स्थले तु अनुमितिर्भवत्येव दर्शित पक्षतात्मक कारणसद्भावात् । पूर्वत्र पक्षतारूपकारण विरह प्रयोजकोऽनुमित्साविरहः, उत्तरत्र पक्षतारूपकारण सद्भाव प्रयोजिका अनुमित्सा इति हि तदाशयः ।

अभेदमभिधीयते यत् अनौपाधिक स्वरूपावस्थः अमूर्तः श्रद्धाविश्वासैक भूः परमात्मा चर्म चक्षुषा नास्ति साक्षात्कर्तुं शक्यः रूपस्पर्श रहितत्वात् आका-शादिवत् नितान्तमावश्यकश्च तत्साक्षात्कारः तत्साक्षात्कारादेवमिथ्याज्ञानादि मूलकबन्धोच्छेदरूप परम पुरुषार्थं लाभात् तमेव विदित्वातिमृत्युमेति नान्यः पन्था

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विद्यतेऽयनाय इति श्रुतेः पुरुषार्थादृते जन्ममरणादिक्लेश निवृत्तेरभावात् चातुर्यभग प्रसंगाच्च—

"याराका शशिशोभनागतघना सा यामिनी यामिनी,
या सौन्दर्यगुणान्विता पतिरता सा कामिनी कामिनी ।
या गोविन्द रस प्रमोद मधुरा सा माधुरी माधुरी,
या लोकद्वय साधनी चतुरता सा चातुरी चातुरी ॥"

इति शिष्टोक्तेः । अतोऽत्र चर्म चक्षुषा साक्षात्कारानर्हे ऽवश्य साक्षात्कर्तव्ये च परमात्मनि साक्षात्कारस्योपायः "आत्मावारे द्रष्टव्यो श्रोतव्योमन्तव्यो निदिध्यासितव्यः" इत्यादि श्रुत्या, आगमेनानुमानेन ध्यानाभ्यास रसेन च त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम्, श्रोतव्यः वाक्येभ्यो,मन्तव्यश्चोपपत्तिभिः गत्वा च सततं ध्येय इति दर्शनहेतवः इत्यादि स्मृत्या च बोधितः । श्रुति स्मृतीहास पुराणेभ्यो बहुधापरमात्म श्रवणतः चर्म चक्षुरवेद्य परमात्म साक्षात्कारस्य बाधिकायाअसम्भावनाया निवृत्तिर्जायते । अनेकाभिरूपपत्तिभिरर्थाद् बहुभिर्व्याप्ति-पक्षधर्मता विशिष्टैर्हेतुभिरनुमिति स्वरूप मननतो विपरीत भावनात्मकस्य परमात्म साक्षात्कार बाधकस्य उच्छेदो भवति । मननोत्तरं विहित निदिध्यासनेन पुनः परमात्म साक्षात्कार बाधिकायाः परोक्षताया विनाशो भवति । एवं त्रिभिरूपायैः परमात्म साक्षात्कार बाधक त्रयस्य निर्मूलेनसति परमात्म साक्षात्कारः उदेति इति वस्तु स्थितिः । अत्र अन्तर्निहितमिदं स्पष्टयितव्यमावश्यकं यन्न्यायनये जीवात्म परमात्मानौ विभिन्नौ न तु वेदान्त नय इव तयोरभेदः ।

ततश्च शंका जागर्ति यत् ईश्वर मननं कथं मोक्ष हेतुः ? "आत्मा वारे द्रष्टव्यो श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति श्रुतौ सामानाधिकरण्येन निर्देशात् यद् विषयकः साक्षात्कारो मोक्ष जनकस्तद्विषयकमेव मननं मोक्ष हेतुः साक्षात्कारश्च जीवात्ममात्रगोचरः परमात्मगोचरो वा न मोक्ष हेतुर्भवितुं शक्नोति यतोहि मिथ्याज्ञान विध्वंसन द्वारैव आत्म साक्षात्कारस्य मोक्ष हेतुता जीवात्म मात्र विषयकं वा मिथ्याज्ञानं न संसारात्मक बन्ध हेतुर्येन तदुच्छेदस्तद्द्वारं भवेत्, किन्तु स्वात्म गोचरमेव मिथ्याज्ञानं संसारात्मक बन्ध हेतुः, ततश्च स्वात्म-तत्त्व साक्षात्कार एव स्वात्म गोचर मिथ्याज्ञान विध्वंस द्वारा मोक्षहेतुर्भवितुं शक्नोति तस्मान्मननमपि स्वात्मगोचरमेव मोक्षायापेक्षितुं युक्तम् न तु परमात्म गोचरमिति । अत्रेदं समाधानं यत् परमात्म मननं मोक्ष हेतुः यतोहि "तमेव विदित्वाति मृत्युमेति" इति श्रुतौ तत् पदं प्रकृताभिप्रायकम् । प्रकृतोऽस्ति परमात्मा इतः पूर्ववर्ति श्रुतौ "द्वे ब्रह्मणी वेदितव्ये परंचापरंच" इत्यादौ ब्रह्म पदेन परमात्मनोऽपि बोधितत्वात् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तत्रत्यवेदितव्य पदेन च वेदन सामान्यान्तर्गत परमात्म मननस्यापिप्राप्तत्वात् । श्रोतव्यो मन्तव्य इत्यादौ सामस्त्येनान्वयाच्च श्रुति श्रुत परमात्म मननस्य प्राप्तत्वात् ।

परमात्म साक्षात्कारो हि यद्यपि स्वविषयक मिथ्याज्ञानोन्मूलनद्वारा साक्षान्न मोक्ष हेतुः स्वात्म साक्षात्कारस्यैव स्वविषयक मिथ्याज्ञानोन्मूलकत्वेन परमात्म साक्षात्कारस्यातथात्वात् तथापि स्वात्म तत्त्व साक्षात्कारम् परमात्मतत्त्व साक्षात्कारः उपकरोति स हि (परमात्मा हि) तत्त्वतो ज्ञातः स्वात्मसाक्षात्कारस्योपकरोतीति श्रुतेः । परमात्म साक्षात्कारानन्तरमेव स्वात्मतत्त्व साक्षात्कारोत्पादो यदि नैव प्रामाणिकस्तर्हि "सा हि तत्त्वतो ज्ञातः स्वात्मसाक्षात्कारस्योपकरोति" इति श्रुति बोधिता परमात्म साक्षात्कारस्य स्वात्मसाक्षात्कारं प्रति उपकारकता अनुपपन्ना स्यात् अतस्तत्र द्वारीभूत अदृष्टकल्पना आवश्यिका तेन अदृष्ट द्वारा परमात्म साक्षात्कारः स्वात्मसाक्षात्कारं जनयति स्वात्म साक्षात्काराच्च स्वात्मगोचर मिथ्याज्ञानोन्मूलने जाते मोक्षो भवति । अथवा परमात्म साक्षात्कारस्यापि अदृष्टं द्वारीकृत्य मोक्षं प्रति साक्षादेव हेतुना । एतत् पक्षे स हि तत्त्वतोज्ञातः स्वात्म साक्षात्कारस्योपकरोति" इति श्रुतेः संगतिस्तु स्वोत्पाद्यमोक्षोत्पादकत्वेन उपकारकत्वात् उपपन्ना भवति ।

प्रस्तुत विषये पुनर्जिज्ञासा जायते यद् यदि परमात्मा परमात्मधर्मोवा जगत्कर्तृत्वादिर्नैव संदिग्धः श्रुतिषुश्रुतत्वात् संशयश्च न अनुमितिरूपमननमात्रे हेतुस्तर्हि संशयोत्थापक विप्रतिपत्तयः तदिह संक्षेपतः पंचतयी-१-अलौकिकस्य परलोकसाधनस्याभावात् २-अन्यथापि परलोक साधनानुष्ठान सम्भवात् ३-तदभावावेदक प्रमाणसद्भावात् ४-सत्त्वेऽपितस्या प्रमाणत्वात् ५-तत्साधक प्रमाणाभावाच्चेत्युल्लिख्याचार्येण परमात्मोपासन व्यापृतेन कथमिह निर्दिष्टा इति

अत्रेदं समाहितं यत् संशयस्यानुमिति मात्रं प्रति हेतुत्व विरहेऽपि जिज्ञासितार्थानुमितौ जिज्ञासा द्वारा संशयस्यानुमिति हेतुत्वबुद्ध्या संशयबीज विप्रतिपत्तयोऽपेक्षन्ते तस्मादेव ता अत्र निर्दिष्टा इति । संशयो यथा न परामर्श समकालं सर्वत्रानुमितिस्थले स्थायी तथैव-जिज्ञासाऽपि न सर्वत्रानुमिति स्थले स्थायिनी एवं स्थिते न्यायोपासने संशयोंऽगमिति संशयं विना यो न परितुष्येत् तस्य परितोषाय संशय बीज-विप्रतिपत्तयोत्र निर्दिष्टाः न तु संशयं विना मननासंभवधियेति प्रकाशकृता समाहितम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शंकरमिश्रैस्तु प्रकृतस्य पूर्वापर संदर्भ ग्रन्थस्य विकल्पेन समन्वयो व्यधायि तत्र अन्ते मध्यस्थादिवदाहार्य एव वा संशय इत्यभिधायि। एतदेव मह्यं रोचते। अहमत्र वर्धमान शंकरोक्त्योरेकमेव तात्पर्यं प्रत्येमि। परमात्मोपासनाप्रवृत्तस्याचार्यस्य स्वोपस्थापित विप्रतिपत्तिवाक्येतरस्य परमात्मस्वरूपधर्मि तद्धर्म विषयकानाहार्य संशय जनकस्य विरहात्। श्रुति स्मृतिभ्यां परमात्मधर्मितद्धर्मनिश्चयात्। पूर्वं संशयस्यानुमिति मात्रांगत्वबुध्या सर्वविध विचारांगत्वबुध्या च शंशयाभावो यद्यपिनाशंकितः। यद्यपि घटितं वाक्यं पूर्वपक्षोपपादकं, तथापि घटितंच तदुत्तरवर्तिवाक्यं समाधानपरं सर्वत्रानुमितौ सर्वविध विचारे संशयस्यानपेक्षितत्व सूचकम्। तदिह संक्षेपतः पंचतयी विप्रतिपत्तिरित्यादि तृतीयं वाक्यं पुनः प्रकृते आहार्यं संशय सूचन द्वारा अनाहार्य्याहार्यं साधारण संशयस्य विचार सामान्यांगत्व सूचन द्वारा च समन्वय तात्पर्यकम्।

वस्तुतत्त्वं विजानतो मध्यस्थस्य यथा आहार्यं एव संशयः तथैवप्रकृतेऽपि आहार्य एव संशयः एतावता संशयो न्यायांगम्—(संशयो विचारांगम्) इत्यस्य निर्वाहः, परमात्मनोमननाय उत्थित प्रकार विशेषाकांक्षाया निवृत्तिश्चोभयं जायते।

आचार्यैः परमात्मनि धर्मिणि संशयाभावः स्पष्टमभिहितः, कुसुमांजल्युपरि प्रकाश प्रकाशिकादि सुप्रसिद्ध टीकाकृद्भिर्वर्द्धमान मेघ ठक्कुर प्रभृतिभिर्धर्मिणि संशयाभावेऽपि तद्धर्मे जगत्कर्तृत्वादौ संशयः स्यात् श्रुतौ श्रुति बोधिते च प्रामाण्य संशयो वा स्यादित्यादिपूर्वपक्षमुत्थाप्य येन रूपेण श्रवणं तेनैव रूपेण मननं युक्तम् रूपान्तरेण श्रुतस्य रूपान्तरेणमनने अश्रद्धामलक्षालनात्मक शास्त्र व्यापार निर्वाहो न स्यात् श्रुतस्यामननात्। नवातद्रूपमस्तीश्वरे यन्न वेदे श्रुतमित्यादिना धर्मिणि धर्मे वा अनाहार्य संशयाभावः साधितः। उपपादितंच परस्पराविरुद्ध धर्म प्रकारेण परमात्मनो मननम् परस्पराविरुद्ध प्रकारेण तच्चिन्तनोपपत्तेरित्यन्तेन। यद्वासंकसुकता निवृत्तयेन्यायोपासने संशयोंगमिति संशयम्विना यो न परितुष्येत् तं प्रति श्रोतव्योमन्तव्य इति श्रुतेरनन्यगत्याभिन्न विषयक एव धर्म विषयक संशयो धर्मि विषयक न्याय प्रवृत्ति हेतुरित्यास्थेयमिति विमावयंस्तत्कारणं विशेष विप्रतिपत्तिमादर्शयति तदिहेति इति प्रकाश कृता वर्द्धमानेन यदलेखि तत्र अनन्यगत्येत्यस्ति स्पष्टमुल्लेखः, ततश्च तस्यापि प्रकृते आहार्यं सशये एव तात्पर्यमायाति एतादृशाहार्यं संशय स्थले च कार्यं कारणभावः प्रतिबध्य प्रतिबन्धकभावो वा न समानविशेष्यतया, समानविषयता मात्रेण वा अनुगतरूपेण, किन्तु विशिष्यैव यथा कथंचित् अतो वस्तु विचारे इदमप्ययुक्तमेव समान विशेष्यतया संशय निश्चययोर्विरोधित्वे कथं धर्मिणि न्याय प्रवृत्त्या धर्मसंशयो निवर्तनीय इति संकसुकता निवृत्तये न्यायोपासनमित्याकार विरोधः, समान विषयता मात्रेण संशय निश्चययोर्विरोधे तु कथं धर्मिविशेष्यक

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

निश्चये सति धर्मविशेष्यक संशय इति प्रकाशोपरिप्रकाशिकाकृतो मेघ ठक्कुरस्योक्तिः समाहिता, तयोक्तेरनाहार्यं संशयस्थलाभिप्रायकत्वात् प्रकृते आहार्यं संशयोपगमादिति प्रत्येमि । वस्तुतो मूलभूत कुसुमांजलि ग्रंथ निर्दिष्टं तदिह संक्षेपतः पंचतयी विप्रतिपत्तिरित्येतद्घटकं विप्रतिपत्ति पदं चार्वाकादेभ्रमात्मक निश्चय रूप विपरीत-धारणा बोधकम् न तु संशय बीज विरुद्ध कोटिद्वयोपस्थापक शब्द घटित-वाक्य विशेष परम् आचार्योक्तौ अलौकिकस्य परलोक साधनस्याभावात् इत्यादौ कोटिद्वयोपस्थापक पदादर्शनात् ।

लौकिक प्रत्यक्षाविषय गुणत्व साक्षाद् व्याप्य जातिमत्त्वमात्मगुणे वर्तते नवेत्यादि विप्रतिपत्तयः संशय बीज रूपास्तु प्रकाश कृता वर्द्धमानेन उत्प्रेक्ष्य दर्शिता आहार्य संशयस्यैव सूचकाः, विरुद्ध कोटि द्वयान्यतरकोटिनिश्चयस्य स्वस्मिन् परस्मिश्चसत्त्वादिति प्रत्येमि । तत्र चार्वाक विपरीतधारणैव प्रथमम् अलौकिकपरलोक साधनादौ प्रमाणं व्युत्पादयद्भिः परमात्मानमुपासमानैराचार्यैरपाक्रियते—

चार्वाक मते लौकिक प्रत्यक्षाविषय गुणत्व साक्षाद् व्याप्या जातिः गुरुत्व-त्वरूपा गुरुत्वे प्रसिद्धा या तन्मते आत्मगुणे नास्ति, नैयायिकमते तादृशी जातिरदृष्टत्व रूपात्मगुणे धर्मेऽधर्मे अष्टाख्ये वर्तते । प्रथमस्तवकेन सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तितः । प्रत्यात्मनियमाद्भुक्तेरस्ति हेतुरलौकिकः । इत्यादिना कार्यं सहेतुकं कादाचित्कत्वाद् भोजन जन्य तृप्तिवत् । कार्यं विचित्र कारणवत् विचित्र कार्यत्वात् विचित्र कार्यान्तरवत् । परलोकार्थिनां विश्वेषां यागादौ प्रवृत्तिरदृष्ट सापेक्षा एव अतोऽस्ति अवश्यम् अदृष्टं कारणम् । कारणं कार्य समानाधिकरणम् कार्यजनकत्वात् । अदृष्टं भोग समानाधिकरणं भोग जनकत्वात् । इत्यादिभिरूपपत्तिभिश्च परलोक साधनमदृष्टं साधितम् । निराकृता च चार्वाकस्य अलौकिक परलोक साधनाभाव-विषयिका प्रथमा विपरीत धारणा । अन्यथापि परलोक साधनानुष्ठान सम्भवादिति विप्रतिपत्ति बोधक वाक्यबोधिता मीमांसकस्य ईश्वराभाव विषयिणी द्वितीया विपरीत धारणा तदादाय वेद जन्या शाब्दीप्रमा गुणजन्या नवेति आहार्य संशयोत्प्रेक्षा । वेदजन्य शाब्द प्रमायां यथार्थ वाक्यधी रूप गुणजन्यत्वस्य नैयायिकानां विनिश्चितत्वात् दोषोऽप्रमाया जनक इति नैयायिक सिद्धान्तात् । मीमांसकानान्तु वेदजन्य शाब्द प्रमायां गुणजन्यत्वाभाव विषयक विपरीत धारणा सत्वात् प्रमात्वे स्वतो ग्राह्यत्व सिद्धान्तात् । सेयं मीमांसकानां द्वितीया विपरीत धारणा प्रमायाः परतन्त्रत्वात् सर्ग प्रलय सम्भवात् । तदन्यस्मिन्न विश्वासान्न विधान्तरसम्भवः ॥ इत्यादि पद्य गद्यात्मक द्वितीयस्तबकेन वेदजन्य शाब्द प्रमायां गुणजन्यत्वं वेदस्येश्वरीयत्वं सप्रमाणमुपपादयद्भिराचार्यैरपाकृता ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तृतीया विपरीत धारणा बौद्धानां तद्‌भावावेदक प्रमाण सद्‌भावादित्यनेन बोधिता। तत उत्प्रेक्षिताहार्य संशय:—अनुपलब्धिरभावग्राहिका न वा इति। बौद्धसिद्धान्ते अनुपलब्धि: प्रमाणान्तरम् अभाव ग्राहकम् तत एव तेषां सर्वज्ञेश्वराभाव विषयिणी विपरीत धारणा। सा अनुपलब्धे: प्रमाणान्तरत्वं व्युदस्यद्‌भिराचार्यैरीश्वरे चर्म चक्षुरवेद्येऽयोग्यत्व प्रदर्शन मुखेन-योग्या दृष्टि: कुतोऽयोग्ये प्रतिबन्धि:— कुतस्तराम्। अत्रायोग्यं बाध्यते शृंगश्वानुमानमनाश्रयम्॥ इत्यादिना तृतीय स्तबकेनोन्मूलिता।

चतुर्थी विपरीत धारणा दिगम्बर प्रसिद्ध जैनानाम्-या सत्त्वेऽपितस्या प्रमाणत्वादित्येतच्चतुर्थ विप्रतिपत्तिबोधिता। तत्राहार्य संशयश्च ईश्वर: प्रमाणं नवा इति। जैनानां सिद्धान्ते अगृहीतग्राहि ज्ञानमेव प्रमात्मकं ज्ञानमग्राहित्वंच स्वोत्पत्ति-कालीन ध्वंस प्रतियोगि स्वसमानाधिकरण ज्ञानाविषयत्व रूपम्। नित्यं सर्वविषय-कंच ईश्वर ज्ञानं नेदृशमगृहीत ग्राहि अत: ईश्वर ज्ञानं न प्रमा, प्रमात्मक ज्ञानाश्रयत्व विरहादीश्वरो न प्रमाणमित्येषा तदीया चतुर्थी विपरीत धारणा—

अप्राप्तेरधिक प्राप्तेरलक्षणमपूर्वदृक्।
यथार्थानुभवो मानमनपेक्षतयेष्यते॥

इत्यादिना चतुर्थस्तवकेन यथार्थानुभवत्वस्य प्रमा सामान्य लक्षणत्वमुपपाद-यद्भि: अगृहीत ग्राहित्व लक्षणे अव्याप्त्यतिव्याप्ति दोषौ दर्शयद्‌भिराचार्यै-र्निराकृता। तत्साधकप्रमाणाभावादिति पंचमी विपरीत धारणासांख्यानां तद्‌दृष्टौ ईश्वर साधकं नास्ति किमपि प्रमाणं येन ईश्वर: सिद्ध्येत्।

सर्वं कार्यं प्रकृतिरेव करोति न तु चेतन: कश्चित् किंचित् कार्यं कर्ता येन कार्य विशेषस्य कारणीभूत: ईश्वर: स्यादितीयं विपरीत धारणा कपिलानुयायिनां, तस्मादुत्प्रेक्षितश्चाहार्य संशय: क्षित्यादि सकर्तृकं न वा इति।

तत्र क्षित्यंकुरादि सकर्तृकम् अर्थात्स्वोपादानगोचरापरोक्ष ज्ञान चिकीर्षा कृतिमज्जन्य, कार्यत्वात् घटवत्। कुलालो घटोपादान कपाल गोचरापरोक्षज्ञानं चिकीर्षा कृतिमान् यथा घटस्य जनकोऽनुभूत: सुप्रसिद्धश्च, तथैव क्षित्यंकुराद्युपादान गोचरापरोक्ष ज्ञानचिकीर्षा कृतिमान् कश्चिदवश्यं क्षित्यादेर्मानवमात्रासाध्यकार्यस्य कर्त्ता स एव सर्व शक्तिमान् नित्य ज्ञानादिमानीश्वर: कर्तृ प्रयत्नमन्तरा कार्य जनना-दर्शनात्।

२. आयोजनं कर्म—तेन सृष्ट्यारम्भ कालीन द्वयणुकारम्भक परमाणु द्वय संयोग जनकं कर्म चेतन प्रयत्न पूर्वकं कार्यत्वात् अस्मदादि शरीर क्रियावत्।

३. ब्रह्माण्डादि, पतन प्रतिबन्धकीभूत प्रयत्नवदधिष्ठितम्, धृतिमत्त्वात्, आकाशस्थ पक्षि धृतकाष्ठवत्।

४. पद्यते ज्ञायते इति व्युत्पत्त्या पदं व्यवहार:—

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

घटपटादि सम्प्रदाय व्यवहारः, स्वतन्त्र पुरुष प्रयोज्यः, व्यवहारत्वात्, आधुनिक लिप्यादि व्यवहारवत् ।

५. प्रत्ययः-प्रामाण्यं-वेदजन्यं ज्ञानं, कारणगुणजन्यं, प्रमात्वात् प्रत्यक्षादि-प्रमावत् ।

६. श्रुतिः-वेदः, पौरुषेयः ? वेदत्वात् आयुर्वेदवत् ।

७. वेद वाक्यानि, पौरुषेयाणि, वाक्यत्वात्, अस्मदादि वाक्यवत् ।

८. संख्या विशेषात्-द्वयणुक परिमाणं संख्याजन्यं परिमाण प्रचयाजन्यत्वे सति जन्यपरिमाणत्वात् तुल्य परिमाणक कपालद्वयारब्ध घटपरिमाणातादृश कपालत्रयारब्ध प्रकृष्ट घट परिमाणवत् । सृष्ट्यारम्भद्वयणुक परिमाण हेतु परमाणुद्वयनिष्ठ द्वित्व संख्या जनिका अपेक्षा बुद्धिर्यस्य स ईश्वर एव नान्यो भवितुमर्हः ।

अथवा संख्यायते कथ्यते अनया इति संख्या संज्ञा एकोऽहं बहुस्याम् इत्यादि वैदिकोत्तम पुरुषाः स्वतन्त्रोच्चारयितृ पुरुष संज्ञा बोधकाः उत्तम पुरुषत्वात्, लौकिकोत्तम पुरुषवत्, इत्येवं कार्यत्व कर्मत्वधृतिमत्त्व, व्यवहारत्व, प्रमात्व, वेदत्व, वाक्यत्व, संख्या विशेषरूपैरष्टभिर्गमकतौपयिक पक्षसत्वादि यावद्रूपोपपन्नैर्बाधादि दोषशून्यैर्गमकैरष्टानुमिति व्युत्पादकेन —

कार्यायोजन धृत्यादेः पदात् प्रत्ययतः श्रुतेः ।
वाक्यात् संख्याविशेषाच्च साध्यो विश्वजिदव्ययः ॥
न बाधोऽस्योपजीव्यत्वात् प्रतिबन्धोनदुर्बलैः ।
सिद्ध्यसिद्ध्योर्विरोधोन नासिद्धिरनिबन्धना ॥"

इत्यादि पद्य-गद्यात्मकेन पंचमस्तबकेन ईश्वर साधक प्रमाणानिव्युत्पादयद्भिः परमात्मानमुपासमानैराचार्यैः सांख्यानां पंचमी विपरीत धारणा विध्वस्ता ।

अन्ते पुनर्यस्येश्वरे नास्ति विश्वासस्तं प्रतिवदद्भिराचार्यैं-इत्येवं श्रुति (वेद), नीति (न्याय संप्लव) (परस्पराविरोधेन साहित्य) जलैर्भूयोभिराक्षालिते ।

"येषां नास्पदमादधाति हृदये ते शैलसाराशयाः ।
किन्तु प्रस्तुतविप्रतीपविधयो प्युच्चैर्भवच्चिन्तकाः ।
काले कारुणिक त्वयैव कृपया ते तारणीया नराः ॥"

इत्युक्तम्—

हे कारुणिक ! ईश ! ये भगवति भवे प्रतिकूलाः कुतर्काभ्यासरताः सन्तः काले विशेषक्लेशदशायामुच्चैर्भवच्चिन्तकास्ते कृपया त्वयैव तारणीयाः स्वविषयक विपरीत धारणात्मक शंका कलक शून्याः कार्या इति तदुक्तस्याशयः ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

स्वात्मने प्रार्थितं पुनः—

"अस्माकन्तुनिसर्ग सुन्दरचिताच्चेतोनिमग्नं त्वयी
त्यद्धानन्दनिधौ तथापि तरलं नाद्यापि संतृप्यते।
तन्नाथत्वरितं विधेहिकरूपां येनत्वदेकाग्रताम्
या ते चेतसि नाप्नुवाम शतशो याम्याः पुनर्यातनाः॥" इतिः

"सत्पक्षप्रसरः सतां परिमल प्रोद्बोधबद्धोत्सवे
विम्लानो न विमर्दने मृतरस प्रस्यन्दमाध्वीकमूः।
ईशस्यैव निवेशितः पदयुगे भृंगायमानं भ्रम
च्चेतोमे रमयत्वविघ्नमनघो न्याय प्रसूनांजलिः॥"

इत्यनेन प्रारम्भिक मांगलिक पद्येन प्रसिद्ध समाराधन साधनांजलिस्थ प्रसून रूपतया ईशस्य प्रमाण तर्क रूपे पद युगे सश्रद्धं समर्पितः, परमात्मोपासना विषयको न्यायः,-नीयते प्रोच्यते विवक्षितार्थ सिद्धिरित्यनेनेतिव्युत्पत्तिकः,-गमकतौपयिक पक्षसत्त्व सपक्षसत्त्व विपक्षासत्त्वाबाधित्वासत्प्रतिपक्षितत्व स्वरूप पंचरूपोपन्न लिंग प्रतिपादकः, उचितानुपूर्वीकप्रतिज्ञाहेतूदाहरणोपनय निगमन रूप पंचावयवक वाक्य विशेषात्मकः, शब्ददोषार्थं दोष राहित्य रूप विशुद्धिमान्, पक्षताव-त्पक्षधर्मिकाबाधितासाध्य ज्ञान प्रयोजकः, व्याप्ति-विषयक प्रमारूपोद्‌बोधमाध्यमेन सत्पुरुष समवेत सत्परामर्श रूपोत्सव प्रदः, स्वर्गापवर्गात्मिकामृतोत्पत्ति स्थानं बोधितः। सूचितंच न्याय शास्त्रीयमशेषं वस्तुभूत न्याय स्वरूपम्।

शब्द दोषा निराकांक्षत्वादयः, अर्थ दोषा व्यभिचार विरोधबाध सत्प्रतिपक्षा-सिद्ध्यादयश्च हेत्वाभासपदाभिधेयाः सुप्रसिद्धा एव, यद्राहित्यं न्याये नितान्तमावश्यकं भवति अन्यथा स अन्याय एव भवति न तु न्यायः।

इह इदमपि अवगन्तव्यं यत् तर्कोव्याप्यारोपेण व्यापकारोपरूपः प्रमाणानां प्रत्यक्षानुमानोपमान शब्दानां सहकारी एव न तु स्वतंत्रः प्रमाणान्तरम्, वस्तुतत्त्वे प्रवर्तमानं प्रमाणं तर्कोऽनुगृह्णाति भूतलादो घटाभावादिकं वास्तविकं ग्राहयत्प्रमाणं तर्कः यद्यत् घटः स्यात्तर्हि भूतलमिवाद्रक्ष्यत् न तु दृश्यते अतो नास्त्यत्र घट इत्यादि स्वरूपकः अतएव वृद्धेन कुमारिलेनोक्तम् धर्मे प्रमीयमाणे हि वेदेन करणात्मना। इति कर्तव्याभागं मीमांसा पूरयिष्यति इति। मीमांसा तर्क रूपैव विचारपदाभिधेयापि इति।

परमात्मनो मननस्य मोक्षोपयोगित्वे बोधिते परमात्ममननोपयोगिप्रमाणव्यु-त्पादनस्यापि मनन द्वारा मोक्ष हेतुताऽर्थादायातैव, प्रमाण मन्तरा परमात्म मनना-सम्भवात्, किन्तु कुसुमांजलि ग्रन्थात्मकस्य शब्द विशेष रूपस्य प्रमाणव्युत्पादनस्य व्याप्तिज्ञान परामर्श पक्षतानामिव मननम्प्रतिनास्त्यसाधारण हेतुता, व्युत्पादित प्रमाणादेव मननस्य सिद्धत्वात् अतः परमात्म मनने शाब्दत्वानुमितित्व जाति शंकरोनेति प्रकाश कृदुक्तिरपि अवधातव्या एव।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रकाश प्रकाशिका मकरन्द धर्मदत्तप्रसिद्ध बच्चा झा कृत टिप्पणी सम्वलित कुसुमांजलि प्रस्तावनायां पण्डित राज राजेश्वर शास्त्रिणा विलिखितम् अहो आचार्याणां वैदुष्यातिशयः प्रभावातिशयश्च यन्नाय मतानुसारेण इच्छाविशेषरूपां शाब्दीभावनामंगीकुर्वन् खण्डदेव : स्वनिर्मितभाट्ट दीपिकायाम् ईश्वर निराकरण पराणि मीमांसा सूत्राणि शाबरभाष्य टुप् टीकाद्यनुसारेणव्याचक्षाणोऽपि अन्ते मीत भीतो ममत्वेवं वदतो जिह्वा दूषयति हरिस्मरणमेवात्र शरणमिति प्रायश्चित्तं विदधौ इति, इयाँस्तु विशेषो यदद्वैतवादिनां द्वैतवादिनांचेश्वरविषयक विवादे मध्य सेतु भूतास्तत्र भवन्त आचार्याः स्वकीयया अलौकिक्या न्याय परिभाषया ईश्वर तत्वननुमान द्वारा उभयाविरुद्धं साधयन्ति, तदुपयोगि पंचावयव वाक्य प्रयोगस्यैव सम्पूर्णेऽस्मिन् ग्रन्थे उपलम्भात् । अन्तरा जीवेश्वर भेदादौ अनूद्यमानत्वमेव न तु विधेयत्वम् तदुपयोगि पंचावयव वाक्यस्यात्रग्रन्थे क्वचिदप्यदर्शनात् । । प्रत्युत—

**न ग्राह्य भेदमवधूयधियोऽस्ति वृत्तिस्तदबाधनेवेद नये जय श्रीः ।**
**नो चेद निबन्धमिदमीदृशमेवविश्वं तथ्यं तथागत मतस्यतु कोऽवकाशः ।।**

इत्यादिना आत्मतत्वविवेके आचार्यैर्वेदैक सिद्धे परमेश्वर तत्त्वे स्वतात्पर्यमाविष्कृतम् इति । जीवेश्वर भेदं तिरस्कृत्य धियः अन्तः करणस्य अद्वैत तत्व साक्षात्कार जनिकावृत्तिर्न उदेति, बलिनि वेदनये-अद्वैत सिद्धान्ते द्वैततत्त्वरूपभेद बाधने सति जयश्रीः-विजय लक्ष्मीः । नो चेत्-द्वैत तत्त्व रूप भेद बाधन विरहे ईदृशमेव इदं विश्वम् अनिबन्धम् शुभं तथ्यम् । तथागतमतस्य बौद्धमतस्य शून्यस्य को वकाशः कोपि न इति तदुक्तस्याशयःसर्वज्ञात्मनुनिनासंक्षेप शारीरकेऽलेखि आरुह्य भूमिमधराभिरवरोढुं शक्येति शास्त्रमपि कारण कार्यभावम् । उक्त्वा पुरा परिणति प्रतिपादनेन सम्प्रत्ययोहर्ति विकार मृषात्वसिद्धयै ।। इति अनेनापि सूचितं यदद्वैतभावायापि कार्यकारणभावाश्रित न्यायोपासना कर्तव्या भवत्येव, अधरां भूमिमनारुह्य इतरारोहणासम्भवात् सगुणोपासनामन्तरा निर्गुणोपासनाया अनुभवातीतत्वात् । श्री हर्षेण ईश्वर परक श्रुतिमधिकृत्य स्वनिर्मित खण्डनखण्डखाद्ये उक्तम्—

**धीधना बाधनायास्पास्तदा प्रज्ञां प्रयच्छथ ।**
**क्षेप्तुं चिन्तामणिं पाणिलब्धमब्धौयदीच्छथ ।।"**

इति, पाणि लब्धं चिन्तामणिम् अब्धौ समुद्रे गर्तादौवा यदि प्रक्षेप्तुम् इच्छथ तर्हि एव ईश्वर परक श्रुतेर्बाधनाय ईश्वर विषयक कुतर्काभ्यासं कुतर्कोपस्थापनम्वा कुरुत इति तदर्थः इत्यलमधिकेन ।

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

# भारतराष्ट्रीय कांग्रसीयेतिहासः राष्ट्रीयान्दोलनकथा 1857 - 1885

केॆ० कस्तूरिरंगाचार्यः
"श्रीरंगमुनिः"

**मन्दनम्—**

वाल्मीकिमितिहासाख्यग्रन्थसन्दर्भशिक्षकम् ।
पराशरं च व्यासं च प्रणतोऽस्मि मुनित्रयम् ॥ १ ॥

**प्रतिज्ञा—**

श्रीवेंगिपूर्णार्यकुलाप्तजन्मा श्रीरंगरामानुजयोगिशिष्यः ।
कस्तूरिरंगः कथयामि कांग्रस्महासभायाश्चरितं महार्थम् ॥ २ ॥

इदं पवित्रं चरितं पूर्वेषां भारतौकसाम् ।
"श्रीरंगमुनि"ना प्रोक्तं सावधानं निशम्यताम् ॥ ३ ॥

**कथामाहात्म्यम्—**

राष्ट्रीयान्दोलनकथा यस्यां सर्वेऽधिनायकाः ।
राजानश्च प्रजाश्चैव त्यागेन समतां गताः ॥ ४ ॥

त्यागयज्ञकथा चेयं अस्माकं देशवासिनाम् ।
यस्मिन् सर्वे समफलाः दीर्वसत्रे यथा प्रजाः ॥ ५ ॥

पाश्चात्यनिगडाबद्धमातृभूमेर्विमुक्तये ।
बहवो जुहुवु र्यस्मिन् यज्ञे प्राणान् धनानि च ॥ ६ ॥

राजाज्ञा निन्द्यते यत्र तद्भंगश्च प्रशंस्यते ।
आज्ञाकारी तु जिह्लेति भंग कर्तॄन् स्तुवन् हृदि ॥ ७ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अदंड्यान् दण्डयन् राजा दण्ड्यांश्चैवाप्यदण्डयन् ।
अयशो महदाप्नोती त्यस्य यत्र निदर्शनम् ॥ ८ ॥

न देवा न च गन्धर्वा न राक्षसगणा अपि ।
नास्त्येव नारदो यत्र मानवा एव केवलम् ॥ ९ ॥

न हासो न च शृंगारः न व विरहवेदना ।
न भयोत्पादनं किंतु केवलं राष्ट्रभावना ॥ १० ॥

न निन्दा न प्रशंसा वा न चाऽपि कविकल्पनम् ।
नालंकार चमत्काराः केवलं तथ्यवर्णनम् ॥ ११ ॥

येषां रंगं विना युद्धं विना शत्रुविहिंसनम् ।
शस्त्रत्यागे तु विजयः शस्त्रग्राहे पराजयः ॥ १२ ॥

त्यागः परेषां भोगाय बन्धः देशविमुक्तये ।
जीवनं देशसेवायै मरणं तज्जयाय च ॥ १३ ॥

भक्तिश्चेद् भारतीमातुः मुक्तिश्चेत् पारतंत्र्यतः ।
कर्म 'चेद् देशनिर्माणं धर्मश्चेद् दलितोन्नतिः ॥ १४ ॥

अस्माकंपूर्वजानां तां अतिसाहस संभृताम् ।
एतां विलक्षणां पुण्य कथां श्रोतुमिहार्हथ ॥ १५ ॥

**कथायाः पुण्यत्वं—**

अर्थकामैकलग्नानां लुण्टकानां प्रशासने ।
धर्मार्थकाममोक्षेषु किं सिद्ध्येत् लुण्टितात्मनाम् ॥ १६ ॥

कथं धर्मं विना मोक्षः धर्मश्चार्थं विना कथम् । ?
अर्थः स्वशासनाभावे लुण्टकैर्लुण्टने कथम् ॥ ? १७ ॥

शासनं लुण्टकानां किं विना त्यागं विना बलम् ।
स्वयं नश्येदनुत्पाद्य प्रतिकूलां परिस्थितिम् ॥ १८ ॥

सा स्थितिः कथमुत्पन्ना कथं निष्कासिताः परे । ?
देशश्च बन्धनान्मुक्तः कथं लब्धं स्वशासनम् ॥ ? १९ ॥

यदेतत् भोगसाम्राज्यं युष्माभिरनुभूयते ।
कियत्त्यागेन तल्लब्धं इत्येतत्तु निशम्यताम् ॥ २० ॥

अश्वमेधसहस्रैश्च वाजपेयशतैरपि ।
यत् पुण्यं तदवाप्नोति देशस्वातंत्र्ययाजकः ॥ २१ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

## आंग्लानां शासनारम्भः

अथ व्यतीते कल्यब्दे सहस्राणां चतुष्टये ।
शताष्टके गते, वर्षेचाष्टपंचादशे स्थिते ॥[1] २२ ॥
गतेष्वष्टादश शतेष्वब्दानां विक्रमार्कतः ।[2]
चतुर्दशेस्थिते वर्षे गरुण्डाः शासनं स्वकम् ॥ २३ ॥
भारते स्थापयामासुः छलेन च बलेन च ।
यद् भविष्यत्पुराणोक्तं सत्यापयति सांप्रतम् ॥ २४ ॥

**ततो वर्षशतात् पश्चात्—**

ततो वर्षशतात् पश्चात् विप्लवः सुमहानभूत् ।
यस्मिन् गरुण्डैर्निहताः देश स्वातंत्र्य कांक्षिणः ॥ २५ ॥
साहसी मंगलः पांडे तत्यातोपश्च वीर्यवान् ।
कुमारसिंहश्च तथा लक्ष्मीबाय्यंगना अपि ॥[3] २६ ॥
एवं हतेषु वीरेषु देशे विप्लवकारिषु ।
सर्वभारत भूभागान् स्ववशे चक्रुरांगलाः ॥ २७ ॥

**आंग्लानां प्रवृत्तिः—**

मन्यन्ते स्म निजान् सर्वान् शासकत्वेन निर्मितान् ।
विधात्रा भारतीयांस्तु शास्यत्वेनैव जन्मतः ॥ २८ ॥
ततः प्रगर्वितास्ते तु भारतीयप्रशासने ।
प्रावर्तयन् स्वनियमान् आंग्लस्वार्थसमर्थकान् ॥ २९ ॥
अर्थनीतौ राजनीतौ दण्डनीतौ विशेषतः ।
सर्वत्र स्वमतेनैव न्यायनिर्णयमाचरन् ॥ ३० ॥

---

१. कल्यब्दः: 4858=संवत् 1814=ईस्वी 1757 1 कल्यब्द कथनं भारतीय संप्रदायानुसारेण—

२. गरुण्डाः इति भविष्यत् पुराणे प्रयोगः "नगर्यां कलिकातायां' इति च ।

३. 18-4-1859 तात्या तोपे मारितः । 18-6-1858 लक्ष्मीबाई हता । कुंवरसिंह विहार प्रान्ते जगदीशपुर राजा । मृत्युः April 1858. (See Page—337-43 The history of modern india—M.L.Bhargava

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

तदा 'कार्निग' नामाऽभूदांग्लकं पेनिशासकः ।
विप्लव प्रतिशोधार्थं क्रूरं कर्म समाचरत् ॥ ३१ ॥

सर्वत्र भूपानन्यांश्च हत्वा स्वातंत्र्यकांक्षिणः ।[१]
आंग्लशासनविश्वस्तानेव भूपान् न्ययूयुजत् ॥ ३२ ॥

विशेषतस्तु वंगेषु हस्तिनेष्ववधेष्वपि ।
निर्दोषांश्च सदोषांश्च सममेव व्यनाशयत् ॥ ३३ ॥

एकं दण्डयितुं भूपं निर्दोषान् तज्जनानपि ।
खण्डशः कर्तयामास वृद्धाः बालाः शिशूनपि ॥ ३४ ॥

गणशो गणशो हत्वा लुण्टित्वा तद्धनानि च ।
श्मशानभूमिमकरोत् अवधान् हस्तिनान् क्रुधा ॥ ३५ ॥

एकस्त्रीस्पर्शदोषेण राक्षसानां कुलं हतम् ।
स्त्रीसहस्रव्रता घाती बभूवावधशासकः ॥ ३६ ॥

एकस्त्रीकेशसंस्पर्शात् हता दुर्योधनादयः ।
अनेकस्त्रीधर्षकोऽभूत् हस्तिनापुरनायकः ॥ ३७ ॥

दिल्लीशं बहद्दूर शाहं राजद्रोहीति दण्डयन् ।[२]
राजा कः कोऽपराधीति कार्निग् नैव व्यचारयत् ॥ ३८ ॥

कार्निग् तु कंपनेर्दासः नैव राज्ञ्या नियोजितः ।
नचाऽपि बहद्दूर् शाहः साम्राट्त्वं त्यक्तवान् स्वयम् ॥ ३९ ॥

आलम्शाहस्तु दिल्लीशः शुल्कग्रहणकर्मणि ।
स्वसेवायां नियुयुजे पूर्वं भारतकंपेनिम् ॥ ४० ॥

कंपेनेः सेवकः कार्निग् दिल्लीशस्यैव सन्ततिम् ।
राजत्वे वर्तमानं च राजद्रोहीत्यदण्डयत् ॥ ४१ ॥

विपरीतमिदं वृत्तं दृष्टवन्तोऽपि भारताः ।
बभूवुर्मौनिनः कृष्णामार्ता भीष्मादयो यथा ॥ ४२ ॥

---

१. द्रष्टव्यं 337-43 पृष्ठेषु History of modern india—by Bhargava

१. See page 347-History of modern. india. by Bhargava The trial lasted from 27 Jan. 9 March 1858. before 10 May 1857 none claimed that shah was subordinate—Ibid

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कथं धर्मस्य राजत्वं ज्येष्ठजे मयि जीवति । ?
इति दायबलाद् राज्यं कांक्षते स्म सुयोधनः ॥ ॥ ४३ ॥

कानिंगः कस्य दायादः कथं राज्यं ज़िहीर्षति । ?
इति प्रश्नो न कर्तव्यः तैमुर् वंशः तथैव हि ॥ ४४ ॥

अव्यापारेषु व्यापारं कृत्वा बाद्शाह् महोदयः ।
कथं न कष्टमाप्नोति कीलोत्पाटीव वानरः ॥ ४५ ॥

आ सहस्रात्तु वर्षाणां भारते चलति प्रथा ।
गोरी च गजनवी चैव तैमूर् प्रभृतयोऽपि च ॥ ४६ ॥

हुमायूं चैव शेरशाहः मीर जाफूर् कासिमोऽपि च ।
किं शास्त्रमवलंब्यात्र राजपीठे प्रतिष्ठिताः ॥ ॥ ४७ ॥

तिमीन् गिलन् यथा मोदमवाप्नोति तिमिंगिलः ।
तथा तिमिंगिलान् खादन् तिमिंगिलगिलोमुदम् ॥ ४८ ॥

तिमिंगिलगिलन्यायेनैवांग्लाः समुपस्थिताः ।
अतश्च तिमयः केचित्तेषां साहाय्यमाचरन् ॥ ४९ ॥

एवं च विप्लवात् पश्चात् सिद्धमेतद् द्वयं दृढम् ।
दौर्बल्यं भारतीयानां आंग्लानां च महद् बलम् ॥ ५० ॥

लाभस्त्वांग्लसहायेन हानिस्तेषां विरोधतः ।
इति निश्चित्य सर्वेऽपि तेषां सेवामतन्वत ॥ ५१ ॥

अत एव बंकिम्चन्द्रः चाटर्जी वंगदेशजः ।[1]
योऽसौ विंशतिवर्षीयः आंग्लभाषा विचक्षणः ॥ ५२ ॥

विप्लवं विफलं पश्यन् आनन्दमठ नामके ।
ग्रन्थे संकेतरूपेण चकारांग्लसमर्थनम् ॥ ५३ ॥

**आंग्लानां प्रमोदः**

भारते स्वानुकूलां तां स्थितिं दृष्टवा परस्परम् ।
अंगलाः कथयन्तिस्म संमोदमदगर्विताः ॥ ५४ ॥

---

१. बंकिम् चन्द्रचाटर्जी-आनन्दमठ नाम्नः कथाग्रन्थस्य कर्ता 1838-94 विप्लवावसरे विंशतिवर्षीयः कथाद्वारा आंग्लानां समर्थनं चकार

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अहो किल महद् भाग्यं आंग्लद्वीपनिवासिनाम् ।
यदयं सुमहान् खंडः भारतानां समृद्धिमान् ॥ ५५ ॥

आहिन्दूकाश्यपक्षेत्रात् आचब्रह्मप्रदेशतः ।
आहैमाचल कूटान्तात् आचकन्याकुमारितः ॥ ॥ ५६ ॥

अस्माकमांग्लजातीनां स्ववशे संप्रतिष्ठितः ।
आंग्लानां शासनक्षेत्रे नास्तमेति गभस्तिमान्'' ॥ ५७ ॥

इति प्रवादः सत्योऽयं सदा स्थास्नुः भविष्यति ।
भारते तु विशेषेण यतस्ते भाग्यवादिनः ॥ ५८ ॥

मानोवाऽप्यपमानो वा जयोवाऽस्तु पराजयः ।
सर्वं समानं मन्यन्ते स्वस्व भाग्यवशादिति ॥ ५९ ॥

ये केचिदत्र पुरुषाः वीराः पौरुषवादिनः ।
तात्यातोपे प्रभृतयः सर्वे नाशं गता रणे ॥ ६० ॥

क्षेत्रीया ये च राजानः परस्परवधैषिणः ।
स्वसत्तारक्षणविधौ आंग्लसाहाय्यकांक्षिणः ॥ ६१ ॥

ये स्थिता धर्मपीठेषु तेचाऽप्यर्थपरायणाः ।
तेषां संस्थाश्च बहुलाः विरलास्तत्र पंडिताः ॥ ६२ ॥

सर्वे मिलित्वा स्वमतं नैकं स्थापयितुं क्षमाः ।
आंग्लशासनकापट्य नीतिज्ञानविवर्जिताः ॥ ६३ ॥

एषां मतमति क्रूरं अन्धविश्वासकल्पितम् ।
पाषणाः यत्र पूज्यन्ते शिशुः देव्यै समर्प्यते ॥ ६४ ॥

कन्यानां जातमात्राणां वधश्चापिसमीहितः ।
पत्युः शवेन साकं तु दह्यन्ते विधवाः स्त्रियः ॥ ६५ ॥

शिक्षाव्यवस्था तेषां तु सर्वथाऽनुपयोगिनी ।[१]
यत्र ज्ञानं न विज्ञानं नैव लोकोपकारकम् ॥ ६६ ॥

---

१. 'The sun never sets in the British Empire'
सप्त श्लोका इमे Mecaulay अस्य तात्पर्यवर्णनपराः Lord Mecaulay minutes on education 1835. See page 122—4 British India "1772-1947 by Michael Edwards

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अरबी संस्कृता चैव याऽत्र शालासु पाठ्यते ।
सर्वकारस्य साहाय्यं उभयत्राऽप्यपेक्ष्यते ॥ ६७ ॥

अत्रोभयत्र विज्ञानं भूगोलं वैतिहासिकम् ।
सर्वं हास्यास्पदं भाति तथ्यात्तु बहुदूरगम् ॥ ६८ ॥

संस्कृते वर्णितं वैद्यं नाश्वपालोऽपि विश्वसेत् ।
खगोलशास्त्रं श्रुत्वोच्चैर्हसेयु श्चांग्ल बालिका: ॥ ६९ ॥

इतिहासे तु राजानः तालवृक्षोन्नताः श्रुताः ।
षष्टिर्वर्षसहस्राणां तेषामायुः प्रकीर्त्यते ॥ ७० ॥

भूगोलेषु समुद्राः स्युः दधिक्षीर सुराभृतः ।
द्वात्रिंशत् कोटयो देवाः पुराणे समुदाहृताः ॥ ७१ ॥

एतां विद्यामधीयानः राज्यात् वांच्छति भोजनम् ।
अधीत्यापि हि दारिद्र्यात् भोजनं याचते जनात् ॥ ७२ ॥

जनेषु बहवोऽत्रत्याः वांछन्त्यांग्लप्रशासनम् ।
अत्रत्येषु नरेशेषु विरोधं दर्शयन्ति ते ॥ ७३ ॥

सम्पदां यावती वृद्धिः वर्षे वर्षेऽत्र जायते ।
ततोऽधिकतरा वृद्धिः भेद भावेषु जायते ॥ ७४ ॥

सदा भयेन राजन्यान् संमोहेनैव पंण्डितान् ।
विजेष्यामो वयं सर्वान् भेदेन मतवादिनः ॥ ७५ ॥

अथवा दमनेनैव सर्वान् भारतवासिनः ।
दासीकर्तुं वयं शक्ताः बन्दूकबलरक्षिताः ॥ ७६ ॥

इत्येवं भाषमाणास्ते स्वीयं शासन बन्धनम् ।
बलाद् विस्तारयामासुः गाढं च निबिडं दृढम् ॥ ७७ ॥

तदा विक्टोरिया राज्ञी सिंहासनमधिष्ठिता ।
आंग्लराज्यान्यनेकानि शशासैकपुरीमिव ॥ ७८ ॥

शासनं भारतानां तु पूर्वभारतकंपनिः ।[1]
स्वकीयसेवक द्वारा करोति स्म निरंकुशः ॥ ७९ ॥

---

1. Ca nning the governor general was the servant of east India Company

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

सर्वत्र खलु राज्येषु राजा भवति शासकः ।
स्वदेशी वा विदेशी वा भारते तु न तत्तथा ॥ ८० ॥

काचिद्वाणिज्यसंस्था हि भारतानां प्रशासनम् ।
करोति स्मेति दुर्भाग्यं न दृष्टं नापि च श्रुतम् ॥ ८१ ॥

नरेशा येऽत्र पूज्यन्ते स्तूयन्ते स्म च वन्दिभिः ।
तेऽप्यस्याः किल संस्थायाः दासानां दासतां गताः ॥ ८२ ॥

तथाऽप्यत्र महाशूरैः कैश्चिद् विप्लवकारिभिः ।
आंग्लसैन्यान्यनेकानि हतानीत्यद्भुतं महत् ॥ ८३ ॥

श्रुत्वा भयातांश्चिन्तार्ताः तत्रांग्लद्वीपवासिनः ।
क्रोधं प्रदर्शयामासुः भारतीयप्रशासने ॥ ८४ ॥

प्राच्यभारतवाणिज्यसंस्था भारतशासने ।
असमर्थेति निश्चिक्युः आंग्लद्वीपनिवासिनः ॥ ८५ ॥

अतो विक्टोरिया राज्ञी विचिन्त्य स्थितिमीदृशीम् ।
स्ववशे परिजग्राह भारतानां प्रशासनम् ॥ ८६ ॥

कम्पनेर्व्यवहारेण धर्मध्वंसन हेतुना ।
हलावशेषान् विद्रोहियुद्धे भारतवासिनः ॥ ८७ ॥

अन्तः क्रुद्धान् बहिःशान्तान् उपसान्त्वयितुं जनान् ।
इतिहास प्रसिद्धां सा घोषणां महतीं व्यधात् ॥ ८८ ॥

**विक्टोरिया घोषणा**

"भारतीया जनास्सर्वे स्वस्वधर्मे निरंकुशाः ।
भवन्तु शासनं नात्र हस्तक्षेपं करिष्यति ॥ ८९ ॥

नैव जात्या न धर्मेण न रूपेण न राष्ट्रतः ।
भेदभावः प्रवर्त्येत प्रजासु विविधास्वपि ॥ ९० ॥

एवं सा घोषणां कृत्वा प्रभुं कानिंगमेव तम् ।
स्वस्याः प्रतिनिधित्वेन पूर्ववत् सन्न्ययययुजत् ॥ ९१ ॥

राजप्रतिनिधिस्सोऽपि घोषणां तां तथाकृताम् ।
प्रयागनगरे राज्ञां अन्येषां च महासभाम् ॥ ९२ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

विधाय, श्रावयामास प्रजाविश्वाससिद्धये ।
नृपाः प्रजाश्च यां श्रुत्वा निश्चिन्तमनसोऽभवन् ॥ ९३ ॥

प्रमुखाः विवयाः केचित् प्रजानां तुष्टिहेतवः ।
विक्टोरिया घोषणायां अश्रूयन्त विशेषतः ॥ ९४ ॥

मतसम्बद्धविषये शासनस्य तटस्थता ।
सर्वकारे नियुक्त्यादौ भेदभावनिरासनम् ॥ ९५ ॥

क्षेत्रीयाणां नृपालानां स्वाधिकार प्रदापनम् ।
तेषां स्वीकृतपुत्रस्य राजत्वेनानुमोदनम् ॥ ९६ ॥

एवं विप्लवहेतूनां दोषाणां विनिवारणात् ।
शान्ति स्थापयितुं देशे कानिंग् यत्नमचीकरत् ॥ ९७ ॥

**आंग्लसंसद्शासनम्—**

विक्टोरिया महाराज्ञ्याः घोषणारंभकालतः ।[1]
आंग्लसंसदधीनत्वे स्थापितः सचिवालयः ॥ ९८॥

अभूत् भारतनिर्वाहकेंद्रः तत्संप्रशासकः ।
योऽसौ भारतमंत्रीति सचिवः संप्रकीर्तितः ॥ ९९ ॥

तस्य साहाय्यमाधातुं समितिः काऽपि निर्मिता ।
"इन्दिया कौंसिल्" इति तां आंग्लनाम्ना जना विदुः ॥१००॥

तत्र पंचदश प्रौढाः सदस्याः सभ्यतां गताः ।
भारत व्यवहारेषु कुशलत्वेन सम्मताः ॥ १०१ ॥

तेषां अष्टौ शासनेन नियुक्ताः स्युः तथाऽपरे ।
सप्त निर्देशकानां तु दार्वटेन मतात् वृताः ॥[2] १०२ ॥

प्रभुत्वे चैककेन्द्रस्थे केन्द्रे चापि विदूरगे ।
अस्य विस्तृतदेशस्य निर्वाहेऽभूत् महान् श्रमः ॥ १०३ ॥

अतः क्वचित् प्रदेशेषु समितिः योजिताऽभवत् ।
राज्यप्रमुख साहाय्यमाचरेत् या प्रशासने ॥[3] १०४ ॥

---

१. The Act of 1858

२. निर्देशक दार्वटम् = Court of directors मतं = Vote

३. The Act of 1861

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

एवं विकेन्द्रीकरणे प्रवृत्तेऽप्यन्त्यनिर्णयः ।
राजप्रतिनिधेर्मान्यः तथा भारतमंत्रिणः ॥ १०५ ॥

तदा हि; भारते प्रान्तेष्वधिकारी प्रशासकः ।
'गवर्नर्' इति शब्देन कथ्यते स्मांग्लभाषिभिः ॥ १०६ ॥

तेषामप्युपरिष्टाद् यः, "गवर्नर् जेनरल्" भवेत् ।
राजप्रतिनिधिश्चापि राज्ञामुपरि शासनात् ॥ १०७ ॥

एकेनैव द्वयं कार्यं कृतं तन्मुखभेदतः ।
तस्य भारतमंत्रीति शासकोऽसौ नियामकः ॥ १०८ ॥

'गवर्नर् जेनरल्' चासौ हिमाद्रिशिखरस्थितः ।
कन्याकुमारीं लंकां च शशास गिरिशो यथा ॥ १०९ ॥

मन्त्री भारतराज्यानामिति यः परिकीर्तितः ।
देशान्तरात् शशासैनानीशो लोकान्तरादिव ॥ ११० ॥

आग्रामसेवकात् आच राजप्रतिनिधेः, स्थितः ।
सर्वः सेवकवर्गोऽयं वशे भारतमंत्रिणः ॥ १११ ॥

'सिविल् सर्विस्' इति प्रोक्ता सेवा जानपदी च या ।
तत्राधिकारिणश्चापि वश्याः भारतमंत्रिणः ॥ ११२ ॥

तथा सेनाधिकारोऽपि तस्यैव च वशे स्थितः ।
सेनापतिस्तन्नियोगात् सर्वं कार्यमकारयत् ॥ ११३ ॥

सेनासु राजस्थानीयं सिक्खीयं गोरखीयकम् ।
एवं कृतानि यूथानि पृथक् जात्यादि भेदतः ॥ ११४ ॥

यद्येकं विप्लवं कुर्यात् अन्यत् तद् धक्कयेद् ध्रुवं ।
येषु स्वाभाविको द्वेषः आंग्लानां लाभदायकः ॥ ११५ ॥

सर्वत्रोच्चतरस्थानेष्वांग्ला एव नियोजिताः ।
भारतीयास्सुयोग्या अप्येषां किंकरतां गताः ॥ ११६ ॥

"भारतीयेषु विश्वासः कर्तव्यो न कदाचन ।
दूरतः परिहर्तव्याः" इति नीतिर्विधापिता ॥ ११७ ॥

तदा; राज्ञीसमारम्भा राज्यपालकमध्यमा ।
ग्रामसेवक पर्यन्ता चासीत् शासक श्रृंखला ॥ ११८ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

प्रभुत्वस्य तदा केंद्रे हस्तान्तरगतेऽपि च।
विशेषो नाममात्रेण दृष्टो नैवान्यथा क्वचित् ॥ ११९ ॥

सर्वेऽधिकारिणः पूर्वे यथापूर्वं व्यवस्थिताः।
यथावत् स्वदुराचारं दुष्प्रचारमतन्वत ॥ १२० ॥

क्रिस्तु धर्मे प्रविष्टानां सेवकानां प्रदोन्नतिः।
अन्य स्वधर्म निष्ठानां योग्यानामप्यनादरः ॥ १२१ ॥

क्रिस्तूमत प्रचाराय परधर्मविनिन्दनम्।
तत्राप्यसभ्यया वाण्या शिष्टभाषाविरुद्धया ॥ १२२ ॥

चाया, यावन, नील्यादिपण्य कृष्यधिकारिणाम्।[1]
आंग्लानां निज भृत्येषु क्रूरतापूर्णवर्तनम् ॥ १२३ ॥

भारतोत्पन्न जातीनां नीचत्वेन विशेषणम्।
भारते सर्वमान्यानां समाजेष्ववमाननम् ॥ १२४ ॥

तेषां सम्पत्तिमाच्छिद्य स्वदासेषु समर्पणम्।
इत्याद्याः बहवो दोषाः क्रोधविप्लवकारणम् ॥ १२५ ॥

एतादृशाः दोषकृतः भारते त्रिविधाः स्मृताः।
सर्वकारस्य सेवायां नियुक्ता आंग्लदेशिनः ॥ १२६ ॥

क्रिस्तूमतप्रचारेषु लग्नाः पादिरयस्तथा।
यूरपीयाश्च वाणिज्यपत्रिकादिषु तत्पराः ॥ १२७ ॥

एते सर्वेऽधुनाऽभूवन् स्वस्वकार्ये निरंकुशाः।
विना नियंत्रणं चैव वर्धन्ते स्म दिने दिने ॥ १२८ ॥

यषां निष्कासनं लक्ष्यमासीद् विप्लवकारिणाम्।
तेऽत्र नाडिन्धया देशे दृढलग्ना जलूकवत् ॥ १२९ ॥

**अथ नीतिः—**

आपाततः सामदानोपायैः भारतवासिनाम्।
विश्वासं जनयन्तोऽपि शासकाः छलमाचरन् ॥ १३० ॥

---

१. चाया = Tea यावनं = Coffee नीली Indigo-See English & Sanskrit Dictionary by Monier Williams.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अर्थनीतौ विशेषेण तेषां कापट्यमद्भुतम् ।
वर्णयन्तीतिहासेषु बहवस्तद्विदो जनाः ॥ १३१ ॥

यथाऽयं भारतो देशः पूर्वमांग्ल समागमात् ।
सुसमृद्धः सुखीचासीत् पश्चाद् दारिद्र्यमाप्तवान् ॥ १३२ ॥

कृषीवलेषु शुल्कार्थे यथा क्रौर्यं समाचरन् ।
'सर् जान् षोरे''ण चान्यैश्च तत्सर्वमुपवर्णितम् ॥ १३३ ॥

कंपनेः शासनारंभात् आ च तस्यावसानतः ।
अनेककोटि रूप्याणि नीतान्यांग्लैः स्वकं गृहम् ॥ १३४ ॥

राज्ञां बहूनां सम्पत्तिः गृहीता लुण्टिता च तैः ।
विक्रीता चापि संचित्य स्वदेशे सुष्ठु रक्षिता ॥ १३५ ॥

एकैकं रूप्यकं यद् यद् आंग्लानां हस्तमापतेत् ।
भारतं न निवर्तेत गतं तु गतमेव तत् ॥ १३६ ॥

भारते वा बहिर्वा ते यद् यद् युद्धमकुर्वत ।
आंग्लानामेव लाभार्थं न तु भारतवासिनाम् ॥ १३७ ॥

आंग्लव्यापारिनालानां द्वारा या धनवाहिनी ।
भारतान्निस्सृता सांऽऽग्लद्वीप सागरमापिता ॥ १३८ ॥

केषांचिदल्पसंख्यानां आंग्लानां सुखभुक्तये ।
अनेककोटिसंख्याकाः भारताः निर्धनाः कृताः ॥ १३९ ॥

यदाचांग्लाः नवं देशं जितवन्तः छलात् बलात् ।[1]
तत्र तत्र नवं शुल्कं चकर्षुश्च स्ववांछितम् ॥ १४० ॥

एवं बहुधन प्राप्तौ कंपनी ऋणवान् कथम् ? ।
ऋणं तदपनेतुं किं आंग्लाः नोत्तरदायिनः ? ॥ १४१ ॥

यदा नैजीरियादेशं दक्षिणानाफ्रिकानपि ।
'ब्रित्तन्' वशेऽकरोत् स्वीयकोशाद् बहुधन व्ययात् ॥ १४२॥

तदा भारतदेशस्य दासीकरण कर्मणि ।
दक्षिणामाददु''र्दास'' कोशादांग्लपुरोहिताः ॥ १४३ ॥

१. द्रष्टव्यं 195-9 पृष्ठेषु - The History of modern India—Bhargava

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अपराधादृणं वृद्धं सेवकानां तु कंपनेः ।[1]
भारतस्यैव कोशात् तत् शोधितं रूप्यकोटिभिः ॥ १४४ ॥

आंग्लानामपराधेनोत्क्रान्त विप्लवशान्तये ।
जनसंहारकर्तॄणां 'निकोल्सन्', 'नील' 'हड्स'नाम् ॥ [2]१४५॥

तत्सेनानां च तृप्त्यर्थे भारतीया महाजनाः ।
स्वबन्धुप्रेतनिष्ठ्यूत वसाद्रीण्यश्रुपूर्वकम् ॥ १४६ ॥

रूप्यकोटि सहस्राणि दक्षिणायां, तिलान् विना ।
समर्प्य प्रेतबन्धूनां हिरण्य श्राद्धमाचरन् ॥ १४७ ॥

**कपटनीतिः—**

राज्ञ्या घोषणपत्रे यद् "समीचीनं प्रशासनम्" ।
प्रतिज्ञातं, तत्त नैव कदाऽप्याप्नोत् क्रियान्वयम् ॥ १४८ ॥

यदुक्तं घोषणापत्रे 'सर्वकार नियुक्तिषु ।
भेदभावो न वर्त्येते" त्येतत् सर्वमुपेक्षितम् ॥ १४९ ॥

यदा विद्रोहिणां ग्रामवास्तव्या अपि मारिताः ।
तदा न दण्डितास्तेषां क्रोधोद्दीपनकारिणः ॥ १५० ॥

## कानिंग्कृतं सान्त्वनम् । मानपत्रम् (सनद्)

कानिंग् महाशयोऽप्यत्र राजप्रतिनिधिः स्थितः ।
बहून् भूपान् समाहूय सभां तेषामधिष्ठितः ॥ १५१ ॥

तेषां पुनश्च भूपत्व सिद्धयर्थं समभाषत ।
"यावद् भवन्तो विश्वस्ताः आंग्लपीठप्रशासने ॥" १५२ ॥

"ईश्वरीं सर्व देशानां यावद् राज्ञीं च मन्वते ।
अस्मत्सेवां प्रकुर्वन्ति मनोवाक्कायतः सदा ॥ १५३ ॥

तावद् भवद्भिः स्वक्षेत्रे स्वामित्वमनुपाल्यताम् ।
यूयं पालयतास्माकमाज्ञां दद्मोऽभयं वयम् ॥" १५४ ॥

---

१. विप्लवदमन मात्रे व्ययः 4000000 रूप्यकाणि । भारत कोशात् गृहीतानि वधकर्तॄणां वेतनादिव्ययोऽन्यः— Ibid

२. Nicholson पंजाब प्रान्ते जब संहारकर्ता । Hudson दिल्लीनगरे Niel= अन्यत्र

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

"युष्माकं सुख भोगार्थे गौरवस्य च रक्षणे ।
आवश्यकं धनं युष्मद्राज्यात् स्वीकर्तुमर्हथ ॥" १५५ ॥

एवं कृतापराधानां प्रायश्चित्तमिवाचरन् ।
प्रमाणपत्रदानेन पुनस्तान् भूपतीन् व्यधात् ॥ १५६ ॥

अन्तर्गुप्तांग्लदासत्वं भूपतित्वेन संवृतम् ।
अगृहुर्मानपत्रं तत् भूपाः खिन्नेन चेतसा ॥ १५७ ॥

**श्वेतः कृतो विद्रोहः—**

यदाऽऽङ्गलराजपीठस्य स्वीचक्रुः दासतां नृपाः ।
भटाश्च कंपनेः सेनाः न स्वीचक्रुरिमां तदा ॥ १५८ ॥

अस्मदिच्छा विरोधेन कथं कंपेनिसेवकान् ।
नियोक्तुमन्यसेवायां औचित्यं इति चाक्षिपन् ॥ १५९ ॥

एवं विरोधं कुर्वन्तः केचित् सेवासमापनम् ।
अन्ये चाप्यधिकं द्रव्यं अवांछन् क्षोभकारिणः ॥ १६० ॥

अशक्तो दमने कानिंग् आंग्लानां क्षोभकारिणाम् ।
तदाकांक्षां पूरयित्वा शान्तिमस्थापयत् द्रुतम् ॥ १६१ ॥

स्थाने द्वेषस्य सौहार्दं दण्डनस्य च सान्त्वनम् ।
त्रासस्यानुनयश्चेति नीतिं कानिंग् समाश्रयत् ॥ १६२ ॥

एवं विश्वासमुत्पाद्य नृपेषु जनतासु च ।
सेनायां अर्थतंत्रे च जनरक्षणकर्मणि ॥ १६३ ॥

निर्वाहे नीतिदाने च शिक्षाप्रसरणादिषु ।
परिष्कारान् बहून् चक्रे यथाशक्ति यथोचितम् ॥ १६४ ॥

अस्यैव समये, केंद्रे प्रान्तेषु च विभागशः ।[1]
राज्य प्रमुख साहाय्यसमितेः विस्तरोऽभवत् ॥ १६५ ॥

विप्लवोत्पातसमये 'हड्सन्' प्रभृतिभिः कृतम् ।
पापं विशोध्य कानिंगे सेवातो विरते, ततः ॥ १६६ ॥

---

१. India council Act 1861. एतेन मदरास बम्बई प्रान्तेषु समितेः पुनः अधिकारो लब्धः । अन्यत्रापि समितिः नियुक्ताः । Page-5- Constitutional History of India—Koutilya

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

चतुर्दशसु वर्षेषु चत्वारो राजशासकाः।
आगताश्च गताश्चाऽपि क्रमा भारतशासनम् ॥ १६७ ॥

ततो 'डिस्रेलि' नामाऽभूत् आंग्लानां संसदावृतः।
महामात्योऽति कुशलः राज्ञ्या प्रेम्णा समादृतः ॥ १६८ ॥

**राष्ट्रैक्य भावनाबीजं—**

तेन संप्रेषितो लिट्टन् प्रभुर्नाम महाशयः।
राजप्रतिनिधित्वेन भारतं समुपागमत् ॥ १६९ ॥

एतन्मध्ये भारतस्य निर्वाहविषयेऽसकृत्।
संविधानपरिष्कारः कृतोऽपि न महत्फलः ॥ १७० ॥

एतस्मिन्नन्तरे देशे, लोहवर्त्म निवेशनात्।
यातायातेषु सौकर्यं वैज्ञानिकविधानतः ॥ १७१ ॥

पत्रवार्तादिहरणेऽप्यत्यन्तजवयोगतः।
विदूराणां प्रदेशानां नैकट्यं मार्गयोगतः ॥ १७२ ॥

इत्यादिभिः हितमभूत् शासनस्य जनस्य च।
परस्परं च प्रान्तानां सम्बन्धो निबिडोऽभवत् ॥ १७३ ॥

शिक्षा पाश्चात्य पद्धत्या समाजेषु प्रसारिता।
देशे सर्वत्रैकरूपा दण्डनीति विधापिता ॥ १७४ ॥

उच्च न्यायालयाश्चापि स्थापिताः न्यायसिद्धये।
पत्रिकाः प्रान्तभाषासु तथांऽऽग्लायां प्रकाशिताः ॥१७५॥

निर्वाहे नीति तन्त्रे च वाणिज्ये शुल्कसंग्रहे।
सामाजिकेषु विषयेषूत्पन्नान् संकटान् प्रति ॥१७७॥

जनानुद्बोधयामासुः विवेचनपुरःसरम्।
विद्याशालासु सर्वत्र शिक्षा दत्तांऽऽग्ल भाषया ॥१७७॥

तत्तत्क्षेत्रीय भाषाणां क्वचित् सत्यपि पाठने।
आंग्ल भाषैव सर्वत्र प्रान्तेष्वेकतमा कृता ॥ १७८ ॥

शासनस्यापि निर्वाहे सैव भाषा प्रचालिता।
एतैरन्यैः कारणैश्च प्रान्तेष्वैक्यमभून्मिथः ॥ १७९ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राम मोहन रायाख्यः वंगीयो विप्रवंशजः ।
आंग्लशिक्षावतामाद्यः मार्गदर्शी महामतिः ॥ १८० ॥

राजाविरुदभाक्चायं आंग्लद्वीपं समागतः ।
भारतानां आंग्लशिक्षां अन्वरुध्यत यत्नतः ॥ १८१ ॥

विरोधोऽपि कृते तत्र कंपनेरधिकारिभिः ।
मेकाले प्रभुणाऽऽरब्धं पश्चादांग्लप्रक्षिणम् ॥ १८२ ॥

शासनस्य सहायार्थं अल्पमूल्येन सेवकान् ।
क्रीणीतुमिच्छता तेन नव्यशिक्षा प्रचालिता ॥ १८३ ॥

स तु स्रष्टुमियेषाऽत्र भृत्यवर्गं विलक्षणं ।[1]
यस्तु रूपेण जात्या च भारतीयो भवेद् बहिः ॥ १८४ ॥

आचारेण विचारेण हृदयेनाऽपि चांगलः ।
आंग्लशासनसाहाय्यमाचरेत् श्रद्धयाऽन्वितः ॥ १८५ ॥

यद्यप्येतादृशाः केचित् सर्वकारस्य सेवकाः ।
वेषभूषाविहारादिष्वांग्लानामनुकारिणः ॥ १८६ ॥

तेषां समर्थनं चक्रुः तथाऽप्यांग्लास्त्विमान् जनान् ।
स्वगोष्ठ्यां नान्वमन्यन्त "निग्गर्" इत्येव चाह्वयन् ॥ १८७ ॥

एतेऽपि स्वान् पृथक् कृत्य भारतीयसमाजतः ।
शास्यशासकयोर्मध्ये त्रिशंकव इव स्थिताः ॥ १८८ ॥

तथाऽपि बहवो देश भक्ताः आंग्लविचक्षणाः ।
भारते कारयामासुः राष्ट्रीय जन जागृतिम् ॥ १८९ ॥

राममोहनरायोऽत्र हिन्दूधर्मपरिष्कृतेः ।
राष्ट्रीय भावनायाश्च बीजदाता पितामहः ॥ १९० ॥

बंकिम् चंद्रश्च चाटर्जी भारतं मातरं वदन् ।
तद्रक्षणं च तद्भक्तिः स्वधर्मं इति चाब्रवीत् ॥ १९१ ॥

आंग्लशिक्षावतामत्र भिन्नप्रान्त निवासिनाम् ।
अन्येभ्योऽप्यधिका दृष्टा विचारेषु समानता ॥ १९२ ॥

---

१. See page 122-7 British India 1772-1947—by Michael Edwards (extracts from Mecaulay's minutes on Education 1835).

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अदृष्टपूर्वमेकत्वं नानाप्रान्तनिवासिनाम् ।
दृष्ट्वा विस्मयमापन्नाः भारतीया महाजनाः ॥ १६३ ॥

एवमभ्यस्तपाश्चात्यविद्याः केचित् विचारकाः ।
आंग्लद्वीपं गतास्तत्र प्रजानामार्थिकस्थितम् ॥ १६४ ॥

सुसमृद्धं सुखमयं जीवनं च स्वतंत्रताम् ।
पाश्चात्यभाषासाहित्यात् स्फुटितां राष्ट्रभावनाम् ॥ १६५ ॥

स्वातंत्र्यप्रियतां चापि गृहीत्वा हृदये दृढम् ।
स्वयं सन्तोलयामासुः भारतीयां परिस्थितिम् ॥ १६६ ॥

**भारतीया परिस्थितिः—**

आंग्लद्वीपे भारते च वर्तमानाः प्रजा इमाः ।
आंग्लराज्याः प्रजा एवेत्यसकृत् कथ्यते हि तैः ॥ १६७ ॥

आंग्लानां अधिकारो यः या च तेषां स्वतंत्रता ।
तादृशी तच्छतांशोवा भारतानां न विद्यते ॥ १६८ ॥

आंग्लाधिनियमास्सर्वे निर्मिता आंग्लसंसदा ।
भारतीयानुपेक्ष्यैव भारते नियमाः कृताः ॥ १६९ ॥

"जात्यादि भेदो नेष्येत सर्वकारनियुक्तिषु" ।
इति प्रतिज्ञां भंग्त्वा तैः भारतीया बहिष्कृताः ॥ २०० ॥

कृतघ्ना भारत जनाः तान् कदाऽपि न विश्वसेत् ।
इति प्रवादमुत्पाद्य तान् बहिश्चक्रुरांगलाः ॥ २०१ ॥

उच्चस्थानेषु सर्वत्राप्यांग्लानेव न्ययूयुजन् ।
तत्सेवायां भारतीयान् न्ययुजन् निपुणानपि ॥ २०२ ॥

सिविल् सेवापरीक्षाया नियमान् पर्यवर्तयन् ।[1]
यथा च भारतीयानां प्रातिकूल्यं भवेत् तथा ॥ २०३ ॥

आंग्लवाणिज्यसंस्थानां अतिलाभो यथा भवेत् ।
भारतानां तु ह्रानिः स्यात्, तथा शुल्कविधिं व्यधुः ॥ २०४ ॥

---

१. See page-94 Indian national movement-Mahajan

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

लवणार्थेऽपि शुल्कं तु पूर्वमेव विधापितम् ।
तद्वर्धितं शतगुणं ततोऽधिकमपि क्वचित् ॥ २०५ ॥

अदृष्टमश्रुतं शुल्कं आयस्यापि विधाय ते ।[२]
बलात्कारेण जगृहुः प्रजाभ्यः क्रौर्य पूर्वकम् ॥२०६ ॥

**लिट्टन् प्रभोः शासनम्—**

यदा च भारते प्रायः महावग्रह पीडया ।
बुभुक्षातश्च रोगार्ताः जनाः मृत्युमवाप्नुवन् ॥ २०७ ॥

तेषां उपेक्षां कृत्वैव राजप्रतिनिधिस्तदा ।
दिल्ली नगर्यां भूपानामन्येषां च महासभाम् ॥ २०८ ॥

कृत्वा तत्र समाहूय राज्ञीं विक्टोरियां तदा ।
सर्वभारतराज्यानां अकरोच्चक्रवर्तिनीम् ॥ २०९ ॥

भारतैः पूजिताः सर्वे नरेशास्तामपूजयन् ।
तदाज्ञां शिरसा वोढुं अस्पर्धन्त परस्परम् ॥ २१० ॥

रोगावग्रहदारिद्र्यैः आर्तान् सर्वानुपेक्ष्य सः ।
मुकुटोत्सवसंरम्भे लिट्टन् कुर्वन् अतिव्ययम् ॥ २११ ॥

प्राज्ज्वालयत् जने क्रोधं पूर्वमेव प्रधूमितम् ।
प्रज्ज्वालिताग्निशान्त्यर्थं मृत्तैलं पूरयन्निव ॥ २१२ ॥

राष्ट्रीयवार्तापत्राणां तस्य कर्म विनिन्दताम् ॥
वाग्बन्धकान् विधीन् कृत्वा दमनार्थं प्रयुक्तवान् ॥ २१३ ॥

एवं राज्ञ्याः प्रभावाच्च शासने परिवर्तनात् ।
प्रजानां दमनाच्चैव राष्ट्रे शान्तिः भविष्यति ॥ २१४ ॥

इति मत्वांग्लजातीयाः निश्शंकाश्च निरंकुशाः ।
भारते शासनं चक्रुः अर्थकामपरायणाः ॥ २१५ ॥

प्रजानां हृदयेष्वन्तः प्रज्ज्वलन्तीं भयावहाम् ।
बाह्यशान्ति प्रतिच्छन्नां अशान्ति वेत्तुमक्षमाः ॥ २१६ ॥

शान्तिर्या शासकैर्ज्ञाता साऽशान्तेर नवेक्षणात्
प्रजासु या बहिः शान्तिः सा चाऽऽसामगित्वतः ॥ २१७ ॥

---

२. Page-4-5 Ibid

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

अवग्रहैश्च रोगैश्च दारिद्र्येण च पीडितान् ।
उपेक्षितान् जनान् श्रुत्वा विदेशाः क्रोधमावहन् ॥ २१८ ॥

वार्तापत्राण्यनेकानि तदा दमनपूर्वकम् ।
मौनीकृत्य स्वापराधान् छादयन्तिस्म शासकाः ॥ २१९ ॥

अत्राऽप्युदाहरन्तीमं वृत्तान्तं वृत्तकोविदाः ।
नारी 'दीपकरे' त्येव विश्रुता दीनसेविका ॥ २२० ॥

'नैटिंगेल' इति विख्याता दयासेवास्वरूपिणी ।
'क्रिमिया' युद्ध विद्धानां सेवा शुश्रूषणे रता ॥ २२१ ॥

तत्र युद्धे पीडितेभ्योऽप्यधिकान् भारते मृतान् ।
अवग्रहे पीडितांश्च संश्रुत्य चकिताऽभवत् ॥ २२२ ॥

तत्सेवां कर्तुमिच्छन्ती शासकैस्तु निवारिता ।
भारते 'भद्रं' इत्येव प्रचारो विहितो मृषा ॥ २२३ ॥

वैश्यानां जीविकोच्छेदात् वीराणांच विनाशनात् ।
शिल्पिनामंगुलिच्छेदात् शोषणात् कृषिजीविनाम् ॥२२४ ॥

स्वापराधतिरोधानात् ववतॄणां मुखबन्धनात् ।
'भद्र' प्रदर्शयामासुः भारतेष्वांग्लशासकाः ॥ २२५ ॥

**शास्यशासकभावः—**

पितृपुत्रत्वभावो यः जन्मसिद्धः तनूभृताम् ।
रक्ष्यरक्षक भावत्वं आपन्नः गृहमेधिषु ॥ २२६ ॥

स एव व्यापको भूत्वा समाजानां व्यवस्थितौ ।
नृप प्रजात्वरुपेण स्मृतिषु प्रतिपाद्यते ॥ २२७ ॥

अत एव स्वधर्मोऽयं नृपाणां नरपालनम् ।
षड्भागं च बलिं तेभ्यः ददति स्म प्रजाः स्वयम् ॥ २२८ ॥

आंग्लानां भारतानां च सम्बन्धः कृत्रिमोह्ययम् ।
क्रेतृविक्रेतृभावेन वाणिज्येनास्यतूद्भवः ॥ २२९ ॥

लुंट्यलुंटकता भूत्वा शास्यशास्तृतया स्थितः ।
प्रच्छन्ना प्रक्रियाह्येषा लुंटायाः शोषणस्य च ॥ २३० ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

शास्य शासक भावेऽस्मिन् शोष्य शोषकतां गते ।
'राजा' 'प्रजे' ति शब्दास्तु संकेता एव केवलम् ॥ २३१ ॥

आंग्लानां न स्वधर्मोऽयं भारते जनपालनम् ।
कुतो दया ? कुतः श्रद्धा ? देशेऽस्मिन् पण्यजीविनाम् ।२३२।

एकैव नीतिरांग्लानां 'बलवान् धर्मवान्' इति ।
अनयैवैकया नीत्या शासकाः जगृहुर्बलिम् ॥ २३३ ॥

**कर्तव्यं अधिकारश्च—**

कर्तव्यं अधिकारश्च मिथुनं तु परस्परम् ।
स्वसिद्धौ अन्यसापेक्षम् क्रियायामन्यपोषकम् ॥ २३४ ॥

स्वकर्तव्यात् कृतादेव स्वाधिकारः प्रसिद्ध्यति ।
इति नीत्यनुसारेण राजानो भुञ्जते बलिम् ॥ २३५ ॥

आंग्लानामधिकारोऽत्र बन्दूकबलरक्षितः ।
अतः कर्तव्यविषये प्रश्न एव न जायते ॥ २३६ ॥

प्रजानां विनयाधानं रक्षणं भरणं तथा ।
रञ्जनं वा न कर्तव्यं एषां पण्योपजीविनाम् ॥ २३७ ॥

एक एव महान् यज्ञः तेषां कर्तव्य इष्यते ।
अर्थलुण्टन यज्ञोऽसौ दीर्घसत्रो यथा स्मृतः ॥ २३८ ॥

सर्वेऽपि यजमानाः स्युः आंग्लद्वीपनिवासिनः ।
अत्रत्याः क्रैस्तवाः केचिदपि यत्फलभोजिनः ॥ २३९ ॥

ऋत्विग्गणश्चतुर्वर्गः सर्वकारे पदे स्थिताः ।
आंगला वणिजश्चैव पादिरीणां गणस्तथा ॥ २४० ॥

तत्सेवायां च संलग्नाः भारतीया महाजनाः ।
भारतीयास्तु पशवः हुता बन्दूकवह्निषु ॥ २४१ ॥

त्रित्तन् शासनपीठस्य प्रीणने विनियोजिताः ।
'मार्च' 'शूट्' 'फायर्' इत्यादिमंत्रास्तद्येयजामहाः ॥ २४२ ॥

सर्वे पादिरयस्तत्र पौरोहित्ये निमंत्रिताः ।
अन्तिमं फलं आंग्लानां सर्वेषां सुखजीवनम् ॥ २४३ ॥

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

**शास्य शासकवर्गयोः अन्तरम्—**

एतादृश्यां परिस्थित्यां शास्यशासकवर्गयोः ।
मध्येऽन्तरालं दीर्घं च विस्तृतं च दिने दिने ॥२४४॥

आंग्ल भारतयोर्मध्ये दूरं यद् द्वीपयोः स्थितम् ।
ततोऽधिकतरं दूरं शास्यशासकवर्गयोः ॥ २४५॥

'हिड्मेन' प्रभृतयः केचित् शासने दीर्घदर्शिनः ।
शास्यशासकयोर्मध्ये ददृशुर्महदन्तरम् ॥ २४६॥

समृद्धि शासकांग्लानां डम्भाडम्बरजीवनम् ।
छिन्नकौपीनशेषाणां शास्यानामार्थिकस्थितिम् ॥ २४७॥

कृषीवलेभ्यश्चबलात् करकर्षणपद्धतिम् ।[1]
प्रजानां मरणं चैव देशेऽवग्रहपीडया ॥ २४८॥

रुग्णानां मृतशेषाणां उपकारेऽवहेलनम् ।[2]
धाराधि नियमांश्चैव गौरागौरप्रभेदकान् ॥ २४९॥

विशेषनियमांश्चैव गौराणां गौरवप्रदान् ।
एतान्यांग्लैःकृतान्यन्यान्यत्याचारशतानि च ॥ २५०॥

वीक्ष्य, ते स्म प्रतीक्षन्ते प्रजाभ्यः तत्प्रतिक्रियाम् ।[3]
कथयन्तिस्म चान्योन्यं "एषा शासन पद्धतिः ॥ २५१॥

कदाचित् भारतीयेषु क्रोधमुत्पादयिष्यति ।
यस्य शान्तिः पुनः कर्तुं अशक्यैव भविष्यति ॥ २५२॥

अहो खलु महत्पापं 'मेकाले' कर्तुमुद्यतः ।
यदेतानांग्लपद्धत्या कारयामास शिक्षणम् ॥ २५३॥

यथाऽस्मत्समतां प्राप्तुं यतेरन् देशमोचने ।
इत्येवं चिन्तयानेषु वदत्स्वांग्लेषु केषुचित् ॥ २५४॥

---

१. H. M. Hindman

२. भारतीयानां दुर्दशायाः वर्णनं A. O. Hume महाशयेन कृतं, उद्धृतं च पश्चात् तदीयेतिहासलेखकेन W.Wedder Burn महाशयेन तथा अनेकैश्च । द्रष्टव्यं 44, 45-46 पृष्ठेषु 'How India struggled for freedom—by Ram gopal.

३. Marquis of Salisbury lamented in 1875

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

राजप्रतिनिधित्वेन 'रिप्पन्' प्रभुरुपागमत् ।[1]
योऽसौ लिट्टन् कृतान् दोषान् परिहर्तुं समुद्यतः ॥ २५५ ॥

**रिप्पन् प्रभोः उद्यमः —**

रिप्पन् प्रभुः जानराज्यपक्षपाती स्वभावतः ।
उदारवादो कार्येण निर्वाह निपुणोऽप्यभूत् ॥ २५६ ॥

पण्यनिर्माणशालासु कुशलं कर्मचारिणाम् ।[2]
उद्दिश्य नव्यान् नियमान् कारयामास सत्वरम् ॥ २५७ ॥

अर्थतंत्रे तु केंद्रस्य प्रान्तानां च विभागशः ।
आयव्ययाधिकारं च यथोचितमदापयत् ॥ २५८ ॥

केंद्रे प्रान्ते मंडले चाप्यधिकारं विभज्य सः ।[3]
क्षेत्रीय संस्था निर्वाहं सर्वत्रैव व्यधापयत् ॥ २५९ ॥

अस्यामेव व्यवस्थायां 'पुर' मंडल' पालिकाः ।[4]
स्थापिताः यत्र निर्वाहे शिक्षा प्राप्तातदौकसाम् ॥ २६० ॥

लिट्टन् कृतानां दोषाणां परिहारं विधापयन् ।
पुनः संस्थापयामास भाषापत्रस्वतंत्रताम् ॥ २६१ ॥

गौरैः कृतानां दोषाणां विचारे दण्डदापने ।
अगौर दण्डाध्यक्षेषु प्रतिबन्धं निवारयन् ॥ २६२ ॥

'इल्बर्ट्' महोदय द्वाराऽऽनिन्ये किंचिद् विधेयकम् ।[5]
गौरास्तु संघशो यस्य विरोधं कर्तुमुद्यताः ॥ २६३ ॥

नील्यादीनां कृषितंत्रे भृत्यानां दमनोद्यमे ।
ये गौरास्तान् प्रहृत्यैव मारयन्तिस्म, तेऽधुना ॥ २६४ ॥

त्रस्ताः विधेयकस्यास्य विरोधे विप्लवं व्यधुः ।
आंग्लद्वीपे भारते च स्वविरोधप्रदर्शनम् ॥ २६५ ॥

---

१. On June 1880 Rippan relieved Litton.

२. Page- 241, A New look on modern Indian History by Grover & Sethi

३.४.५. द्रष्टव्यं 242-46 पृष्ठेषु A New look on moderm Indian History — by Grover & Sethi

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

मुक्तकण्ठमकुर्वंस्ते व्यलिखन् पत्रिकासु च ।
यस्तु भारतदेशीयः जन्मतः निग्गर् उच्येते ॥ २६६ ॥
कथमुच्चकुलानस्मान् स दण्डयितुमर्हति ।
इतः श्रेयस्करं त्वेतत् यन्नश्येदांग्लशासनम् ॥ २६७ ॥
भारते; मास्म दण्डोभूत् गौराणां अन्यवर्णजैः ।
असंभवं खल्वेतद्, यद् अन्योऽस्मान् दण्डयेदिति ॥ २६८ ॥
"अयं राजप्रतिनिधिः स्वकीयान् हन्तुमुद्यतः ।
अस्य निष्कासनेऽस्माकं गौराणां कुशलं भवेत् ॥" ॥ २६९ ॥
एवं विचिन्त्य ते गौराः तस्य निष्कासनोद्यमम् ।
प्रच्छन्नं चक्रुरन्यत्र प्रकाशं पत्रिकासु च ॥ २७० ॥
तत्रासींन्नांग्लदेशीयः मेरिडित् टौन् षेड्" आह्वयः ।
लिलेख गौरान् संबोध्य पत्रिकासु निवेदयन् ॥ २७१ ॥
"गौराः ! किमभि मन्यध्वे वासं तत्रान्यभूमिषु ।[1]
यत्राऽसौ ताम्रवर्णोऽपि, यः प्रायोलिंगपूजकः ॥ २७२ ॥
दण्डं मोक्ष्यति वः स्त्रीषु स्वल्पादप्यपराधतः ।
गवं चाप्स्यति दुर्घर्षं गौरस्त्रीः दण्डयन् मुदा" ॥ २७३ ॥
एतादृशीं विरोधोर्वित रिप्पन् सोढुमशक्नुवन् ।
तेषामेवानुकूल्येन विदधौ तद् विधेयकम् ॥ २७४ ॥
स्वप्रवृत्तिविघातं तं ज्ञात्वा गौरैः कृतं बलात् ।
अज्ञानजं मदं चैषां दृष्ट्वा रिप्पन् अखिद्यत ॥ २७५ ॥
रिप्पन् प्रभोः प्रयत्नस्य वैफल्यं गौरजैः कृतम् ।
दृष्ट्वा भारतराज्येषु जनक्रोधः व्यवर्धत ॥ २७६ ॥
ततः केचिद् भारतीयाः देशसेवाऽभिलाषिणः ।
नगर्यां कलिकातायां समेता दीर्घदर्शिनः ॥ २७७ ॥
सुरेन्द्रनाथो बानर्जी तथा चानन्दमोहनः ।
वसुश्च यत्र प्रमुखौ सभायां समुपस्थितौ ॥ २७८ ॥
अन्ये सप्तशतीसंख्याः सभायां समुपस्थिताः ।
श्यामाचरणशर्माख्यः सर्कार् आध्यक्ष्यं आवहत् ॥ २७९ ॥

---

१. मासिक पत्रिका - **Hermitage** तः उद्धृतं

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

या च 'इंडियन् असोसेषन्' इत्येव प्रथिताऽभवत् ।[1]
राष्ट्रीयान्दोलार्थानां संस्थानां अग्रिमाच या ॥ २८० ॥

यस्यां बभाषे बानर्जी सम्यक् सम्बोध्य शासकान् ।
राजनीतिपरा काचित् संस्था राष्ट्रहितैषिणी ॥ २८१ ॥

अवश्यं स्थापनीये"ति तेने तस्याश्च मातृकाम् ।
पूर्वं कतिपयाः संस्था आसन्नेव क्वचित् क्वचित् ॥ २८२ ॥

"जमीन्दारी असोसेषन्" स्थापिता वंगभूमिपैः ।[2]
वंग ब्रिदिष् भारतीना समाऽव्या स्थापिता पृथक् ॥[3] २८३ ॥

महाराष्ट्रे च कल्याणोन्नायकं मंडलं तथा ।[4]
बांबे असोसियेषन् च स्वदेशहितकांक्षिणी ॥[5] २८४ ॥

'ईस्ट् इंडिया असोसेषन्' 'पूना सार्वजनी सभा ।'
इत्याद्याः विश्वविख्यातैः नेतृभिः स्थापिताः पृथक् ॥ २८५ ॥

मद्रास् महाजनसभा स्थापिताऽसीद् महाजनैः ।[6]
टी. वीरराघवाचार्य प्रमुखैः पुरवासिभिः ॥ २८६ ॥

हिन्दूनामकपत्रस्य संस्था तत्पूर्वमुत्थिता ।[7]
टी. वीरराघवाचार्यः यस्याः संस्थापकोऽग्रिमः ॥ २८७ ॥

योऽध्यापकपदं त्यक्त्वा देशसेवापरायणः ।
एतां संस्थामुपक्रम्य तस्या निर्वाहकोऽभवत् ॥ २८८ ॥

इयं सा पत्रिका यस्यां मुद्रयित्वा प्रकाशिताः ।
अत्याचाराः कृता ये ये शासकैः कृषिजीविषु ॥ २८९ ॥

---

१. Indian Association started on 27-28-29 december 1883.

२. Jamindari Asso. 1837.

३. Bengal British India Society 20 April 1843.

४. Kalyan Unnayak Mandal 1849.

५. Bombay Asso 1851,

६. Madras Mahajana sabha was founded in the premises of "The Hindu" in 1884

७. "The Hindu" was established on 20-Sept. 1878.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

इयं सा यत्र 'च ग्रेंदडफ्' प्रभृतीनां कुशासनम् ।
प्रकाशितं खंडितं च निष्पक्षं निर्भयं तथा ॥[1] २९० ॥

अतश्च वस्तुतः राष्ट्रसेवा भावस्य जागृतेः ।
सेवारीतेश्चोपदेष्ट्री हिन्दूसंस्तेति चक्षते ॥[2] २९१ ॥

एवं ब्रह्मसमाजानां तथाचार्यसमाजिनाम् ।
राष्ट्रीयभावनायुक्ताः संस्थाः धर्मप्रचारिकाः ॥ २९२ ॥

क्रिस्तूमतप्रचारस्य निरोधाय, निजं मतम् ।
आचारं च परिष्कर्तुं प्रवृत्तास्ताः पृथक् पृथक् ॥ २९३ ॥

तथाऽपि मुख्यतो राजनीतौ सेवा परा तदा ।
सर्वं भारतराज्येषु व्याप्ता काचिदपेक्षिता ॥ २९४ ॥

तदर्थं चिन्तयानेषु केषुचित्त्वथ बुद्धिमान् ।
"आलन् आक्टोवियन् ह्यूम्' इत्याह्वयः तंत्र कोविदः ॥२९५॥

योऽसौ विंशतिवर्षीयः भारतं समुपागतः ।
मंडलाधीशपदतः कार्यदर्शिपदं क्रमात् ॥ २९६ ॥

अरोहत् सर्वकारेऽत्र संप्राप्तानुभवः कृती ।
सर्वकारस्य सेवातः निर्वृत्तिं प्राप्तवान् ततः ॥ २९७ ॥

शास्यशासकसम्बन्धं स्निग्धं कर्तुं समुद्यतः ।
शास्यानां दुःस्थितिं सम्यक् शासकेभ्यो निवेदितुम् ॥ २९८ ॥

प्रजाप्रतिनिधित्वेन सभां कांचित् प्रचक्रमे ।
यस्या नाम चकाराऽसौ 'इंदियन् यूनियन्' इति ॥ २९९ ॥

या प्रजानां सुखं दुःखं गुणदोषांश्च शासने ।
विविच्य सर्वकारेभ्यः शक्नुयाद् विनिवेदितुम् ॥ ३०० ॥

तस्याः सभायाः प्रथमे मुम्बय्यां अधिवेशने ।
कृतो 'भारतराष्ट्रीयकांग्रस्' इति समाह्वयः ॥ ३०१ ॥

---

१. See Page-12, 13, 14, The hundred years of the Hindu.
२. SeePage-13 The History of the congress—by Pattabhi SeeTharamayya

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

कलौ वर्षसहस्राणां चतुष्के, शतके नवे।[1]
गतेऽथ षडशीत्यब्दे कांग्रसीय महासभा॥ ३०२॥

मुम्बपुर्यां समारब्धे प्रजानां हित चिन्तकैः।
यतोऽसौ ह्यम् महाभागः महतीं कीर्तिमाप्तवान्॥ ३०३॥

**स्वस्त्यस्तु—**

**कांग्रस् सभा जन्मकुण्डली**

जन्मतारिका—२८-१२-१८८५ जन्मसमयः मध्याह्न १२ होराः

**स्वस्तिश्री—**

विक्रमाब्दे सहस्रे तु गते नवशताधिके।
द्विचत्वारिंशके वर्षे हेविलंबिसमाह्वये॥ ३०४॥

मार्गशीर्षे कृष्णपक्षस्याष्टम्यां इन्दुवासरे।
धनुः स्थिते रवौ भौमे, शनौ मिथुनराशिगे॥ ३०५॥

गुरौ चन्द्रे च कन्यास्थे, शुक्रे केतौ च कुंभगे।
बुधे वृश्चिकगे, राहौ सिंहगे, मीनलग्नके॥ ३०६॥

मुम्बापुर्यां तेजपालसंस्कृतोच्चकलालये।
कांग्रस् सभा उपक्रान्ताऽसीत् देशस्वातंत्र्य सिद्धये॥ ३०७

भारतीयगोत्रे हस्तनक्षत्रे कन्याराशौ
मीनलग्नवहमानायां शुभवेलायां मुम्बापुर्यां
श्रीगोकुलदास् तेजपाल संस्कृत महाविद्यालये
जन्म—दीर्घायुष्यमस्तु
जन्मसाफल्यमस्तु
सर्वेजनाः सुखिनो भवन्तु। समस्तसन्मंगलानि सन्तु।

शुभम् शुभम् शुभम्

**इति उपोद्धात प्रकरणम्**

---

१. कलिवर्षाः 4986=1885 ईस्वी

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

## Śarvilakā—The Yaugandharāyana of Śudraka[1]

*Dr. Sudharshan Kumar Sharma*[2]

Scholars hold divergent views on the point of demarcating the real plot of the play mṛcchakatikā of Śudraka. Most of them affirm it emphatically that the love episode of Carudatta and Vasantasena forms the main thread of the narrative to which the theme of the political revolution plays a secondary role. But a closer and more persevering effort at construing the norm of political events taking recourse to action pervading the incidental recurrence of the intrigues poised and counter-poised by the ruling and the revolting parties respectively makes it evidently clear that the political revolution sponsored by the allies of Carudatta, Sarvilaka, Darduraka, Aryaka, Rebhila and others with a view to dethroning the tyrant Pālaka the younger brother of Gopālaka, son of Mahasena, king of Ujjayini and enthroning Aryaka the son of Gopalaka, Grandson of Mahasena and nephew of palaka forms the intended motive behind thé motivated imagination of śudraka improvising the motif of the whole plot of the play. Controversy apart regarding the authorship of the play we find a panoramic ransacking of the whole city of Ujjayini by the pedestrian strata of Śociety wherein.

"The courtesan, who contrary to her class declares quality as the attraction and loves a poor Brāhmana of merit, that Brāhmana himself, a merchant by calling, poor by munificence, lovable and possessed of the character and generosity which could spare his mortal enemy any punishment, his staunch friend Maitreya, Sarvilaka the flashy Brāhmana who for love of a girl commits a

1. Title presented for the 30th All India Oriental Conference. Santiniketan 1980.
2. Senior Lecturer in Sanskrit Rajindra Govt. College, Bhatinda (Pb)-151001.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

theft according to the text books on that science, wants to execute a breach in the most attractive design and takes part in a political revolution; the hero's enemy Sakara, who is a strange composite of fool and Villain, braggart and coward but always the most entertaining malaprop, the viṭa who can assist only without transgressing the bounds of dharma, to which Nature herself, if not man, is a constant witness, the mere Cart driver whose fear of sin and the other world is proof against the best bribes that his idiotic master can offer him, gamblers, a shampooer, Cart drivers, judge and jury, executioners and a Buddhist monk, nearıy 30 Characters are thrown in the distinctiveness of none of these, not even the smallest, getting blurred."[3] These views of Dr. V.Raghavan preceded by his remarks:—

"(King Śudraka put into his drama everything) the great love of Cārudatta and Vasantasenā, the course of politics, the perversity of the law, the nature of the wicked, and above all, Fate which like a pulley on a well, raises one and lowers another"—Sum up, no doubt, the entire characteristic norm of the whole play which considered as a literature of action, comes np to the highest pitch of accuracy, but afford a cue to the initiated researcher to pick up food for further thought.

There is no doubt that it is Cārudatta who takes lead in the open arena of the politieal stage in Ujjayini wherein tho political revolution is strategically contrived about, yet it is Sarvilaka who like Yaugandharayana of Bhasa constitutes the master mind behind the weaving of the threadbare sequence of the events that take lead to a successful denoument of a political coup that had been brought out for a practical shape in vengeance to the one already brought about by the recalcitrant foe which was apprehensive of a counter move and had been adopting adequate measures with a view to keeping away the counter covin with a cruel hand. The dramatist has knowingly put the sequence of events in such a way that the

3. The Social play in Sanskrit by Dr. V Raghavan. The Indian Institute of world culture Basavangudi Bangalore. 1 Transaction No. 11, P.10
4. Ibid.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

secondary motif of the love episode of Cārudatta and Vasantasenā may look all too manifest to the public eye affording to it a delirious impression that their opponent is dallying deep in amorous sports and is not active enough to counterpoise a political coup. But the coup intended for an implementation needs a thorough check up of the political set up prevailing in Ujjayinī and its outskirts with a view to applying the dictum of Kanṭaka Sodhana enunciated by Kauṭilya following in the footsteps of Bṛhaspati, the latter being most probably the main source of Śudraka's intelligence with the former playing adjunct to the philosophy of the latter.

Like Yaugandharāyana of Bhāsa (Pratijñayaugandharāyana in particular[5]) avowing a requital for the wrong done to his master Udayana it is Śarvilaka who is seen stepping into the shoes of his illustrious predecessor by having avowed in the like manner for the release of his illustrious friend Āryaka in Act IV of the play Mrcchakatika-*Verse 26 "Sarvilakah-ahamidānīm—*

*"Jñātīn Viṭān svabhujavikrama labdha Varṇān*
*rājāpamāna Kupitāṃsca Narendra bhṛtyān*
*Uttejayamī Suhṛdaḥ pari-Mokṣaṇāya,*
*Yaugandharāyana ivodayanaṣya rajñah"*
*"apica—Priyasuhṛdamakāraṇe grhītam*
*ripubhīrasādhubhirāhitātmaśaṇkaih,*
*Sarabhasamivādya mocayāmi*
*Sthitamiva rāhumukhe Śaśankabimbam"*[6]

5. "Yadi śatru-balagrasto rāhunā candramā iva. mocayāmi rājānam nāsmi Yaugandharāyanah."
Prat. I 16. p49 ed. by myself
"Subhadrāmiva gāndīvī nāgah padmalatāmiva.
yaditām nāharedrājā nāsmi Yaugandharāyanah"
"Yadi tām caiva tam caiva tām Caivāyatalocanām
naharāmi nrpaṃ caiva nāsmi Yaugandharāyaṇah
Ibid III 8-9 P. 140.

6. Mṛcchakatikaṃ edited by M.R. Kale 1962 IV 26, 27 pp. 152, 154 Nirṇayasāgara Press edition 1950. P 113
R. D. Karmarkar's edition 1947 pp 124-125
Dr. R.S. Tripāṭhi Ed. 1969 pp 281-282

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

This vow of Śarvilaka aptly forms the true reflective index of the vow of Yaugandharayaṇa. The Play proper commences on a plaintive note which consists in the pathetic prevarications of the Sūtradhāra on the one hand and of Maitreya and Cārudatta on the other purporting forth acrimonising impact of penury which is followed by the chase of Vasantasenā by viṭa, Ceṭa and Śakāra with a view to persecuting her to allegiance perforce the royal mandate which had authorised Śakāra to impose legal or illegal authority on any one he deemed desirable. That is why he says—

*"Śakārah-are re duṣṭavaṭuka bhaṇiṣyasi mama*
*Vacanena taṃ daridra cārudattakam-eṣa Saṣu*
*-Varna Sahiranya navanāṭakadarṣanotthita Sutra*
*-dhāriva Vasantasenā nāma ganikā-dārikā Kāma*
*-devā-yatanodyānātprabhrti tvamanuraktāsmā-*
*-bhirbalātkāramanunīyamānā tava gṛham*
*Praviṣṭā tadyadi mama haste svayameva pra*
*-sthapyaināṃ samarpayaṣi tato' dhikaraṇe*
*Vyavahāraṃ Vinā khalu niryātayatāstveva mayā*
*nubaddhā pritirbhaviṣyati athavāniryātayato*
*maraṇāntikaṃ Vairaṃ bhaviṣyati"*[7]

This obviously illustrates the hostility of Śakāra unto Cārudatta who had won over Vasantasenā styled as a navanāṭakaṣutradhārī" by him partly owing to his personal yearning for her hand and partly owing to innate proneness to subvert the treacherous intrigues of the Citizen-folk, likely to contrive Covins with a view to dethronirg Pālaka the tyrant monarch who had killed his elder brother and imprisoned his nephew 'Āryaka' in whose favour almost whole of Ujjayanī could unite in revolt through surreptitious contrivances. The term—

*"navanāṭaka-darṣanotthita Ṣutradhārivā"* is significant here in so far as it clearly alludes to a new drama wherein she is stage directress. The drama here must be the panoramic master plan of

7. Ibid p. 54 MR Kale.
P. 40 *NSPE*, P-99 Dr R.S. Tripāṭhi P. 38 R. 38 R.D. Karmarkar.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

the Revolution where by Pālaka was to be overthrown and Āryaka was to be enthroned to the ancestral kingdom; Śakara as the sentinel of Palaka could obviously act as a spy assuming the role of a bravado a villain subverting the move of Vasantasenā in alliance with Cārudatta, the latter needing finances and refuge for the security of the plans outlayed by the sponsors of the Revolution. That is why he challenges Cārudatta to hand over Vasanta-Senā to him or else he would turn an enemy to him. Dereliction of Vasanta-Śena from Carudatta meant the dereliction from duty of Cārudatta who was covertly organising the whole show by affording clues to Śarvilaka, Darduraka, and others having taken cues from the activities of the sentinels of Palaka.

The following statement of Darduraka indicates the above assertion- "*Dardurakah-svagataṃ) Pradhāna Sabhiko māthuro mayā virodhitaḥ tannātra Yujyate Sthātuṃ Kathitaṃ ca priya- vayasyena Sarvilakena yathā kila āryaka nāmā gopaladārakaḥ Siddhādesena Samādiṣto rājā bhaviṣyatiti Sarvaṣco-smadvidho Janaḥ Tamanusarati tadahamapi Tatsamipameva gacchami*"

This statement of Darduraka suggests him to be the Supreme sentinel of Śarvilaka who was his dear friend and whom he had been following in his aim of enthroning Āryaka as king.

To me he appears a Compeer to Gātrasevaka of Bhāsa in Pratijnāyaugandharāyaṇa. Act IV.

Wherein the following words-

"*gātra-sevakaḥ-āh ! Ko mattaḥ ? Kasya vāmadāḥ ? Vayaṃ Khalvāryayaugandharāyaṇena sveṣu Sthāneṣu Sthāpitāscāra puruṣāh. Yāvadahamapi Suhṛjjanasya Saṃjñāṃ Karomi.*" *Ete te Suhṛdaḥ niro-dha-muktā iva Kṛṣṇa Sarpāḥ itastato nirdhāvanti-bhoh ! bhoh Suhṛdaḥ ! Sṛṇavantu Sṛṇavantu Bhavantaḥ*"[9]

---

8. Ibid II p 84 M.R. Kale p. 65 RD Karmarkar's text NSPE p63 p 152 Dr R.S. Tripathi.

9. Pratijñāyaugandharāyana edited by myself aud published by Messrs Moti Lal Banarsi Dass Delhi-110007 1965 Ist edition P 160.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

sums up his characteristic role. Sarvilaka, there fore, stands at par with Yaugandharayana in so far as he has been esteemed as a Director of the Panoramic show of Revolution that has been sponsored in view of the prophesy of a sooth sayer. Apart from this Yaugandharayana assuming the guise of a madman (Unmattaka) in the third Act of Pratijnayaugandharayana affords further cue to Sarvilaka becoming the stage Director of the whole drama of Political events camouflaged in a most skilled manner :

"*nṛpatipuruṣa Ṣaṅkitāpracāram paragṛha dūṣaṇa niścitaikaviram ghanatimira niruddha-Sarvabhāvā rajaniriyam Jananivasaṃvṛṇoti*"[10] brings to light Sarvilaka in the role of a house-breaking thief mechanising the structure of a hole within the hinder walls of Cārudatta's house with a view to stealing the ornaments to be bestowed as gift to Madanikā the lady of his love abiding in the mansion of Vasanta-senā. All this appears to have been done on a preplanned-Contrivance ensuring security against the sabotage of the sentinels of Pālaka. We shall do well in quoting here the view of Dr. S. A. Dange who has given a eomplete summary of the role played by Śarvilaka in the play.

[11]The Prakarana is an intermixture of two things-love on the one hand and the political plot on the other. Both these get fused in to each other. The Prakarana brings in an atmosphere of love giving no hint whatsoever to the future political shuffling the first hint coming only from the mouth of Darduraka[12] who cleverly saves the Samvahaka from the hands of his creditors. It is here that we have the first mention of Sarvilaka as a dear friend (Priyavayasyah).

---

10. Ibid; III 10 p 110 MP Kale.
    P. 195 Dr. R. S. Tripathi p. 86, R,D. Karmarkar's Text P 83 NSPE.
11. Sarvilaka not a resident of Ujjayini by Dr. S. A. Dange pp 77 78 in Critiques on Sanskrit Dramas by S, A. Dange and Smt Sindhu S. Dange.
    An article read by S. A. Dange at the AIOC 19th Session Delhi Dec. 1958
12. See cff 8 above.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

of Darduraka. Love between Vasantasena and Carudatta being well established and Sakara, being fixed as tne cruel villian in the garb of his crooked humour, Sarvilaka being casually introduced by the minor, Darduraka suddenly arrived on the scene as way-ward brahmana youth, well versed in the art of house breaking, a regular disciple of the worthy Master whose name he utters with due reverence. And all this for love. He wants to win Madanika's freedom. That is in the third Act. Here he does not strike us as any thing of an important personality. The remark about him by Darduraka (Act-II) has been completely washed away from our minds. The 4th Act shows Sarvilaka as an ardent lover happy in union with his beloved, jealous and foamy in suspicion, cooling off in to a guile less child as truth dawns upon him and as he feels sore about Madanika and in the happiest moment of his life. There is a turn of events which throws full light upon his personality and we know him as a heroic youth ready to save his friend Aryaka, the Gopaladaraka who has been imprisoned by king Palaka in wicked jealousy at any cost. He is gone and we meet him only in the tenth Act as the victorious one who set free his friend and thus helped him to become the king. That is all the part played by Sarvilaka. His love for Madanika does not strike us as being important as far as his own character goes. The stern and dutiful soldier in him is what we see and hear in the next part of the play, whenever the attention is focussed on him. He comes before our eyes more as the whip of the political plot than as a tender power. This leadership is nowhere smoothly brought about, but is referred to more than once. We have referred to the speech of Darduraka in the 2nd act. Candanaka also refers to Sarvilaka as "My dear friend" and goes after him The Vita also joins Sarvilaka saying "I shall go where Sarvilaka and Candanaka etc are." Thus we clearly see that Śarvilaka is the pivot of the plot for the release of Āryaka the Gopāladāraka. Śarvilaka is, as a matter of fact, the second hero of this prakaraṇa. for in the absence of Ṣarvilaka. though Cārudatta possibly would have been set free, the evil doer, Śakāra might not have been humiliated. It is clear from his behaviour in the court scene (Act IX) where he asserts that he would even replace the judge. It is Śarvilaka who as a Saviour of Āryaka has profitable position and utilizes it to the full as we see in the prakarana."

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

Carrying on Dr. Dange argues in details regarding Sarvilaka not being a resident of Ujjayini at least at the time and a considerable lengh of time before the events described in the play. Dr. Dange's dissertation on the positicn of Śarvilaka in the play mṛcchakaṭika is fairly reasonable. He narrates the facts but draws his conclusions somewhat on the same lines as followed by his predecessors. He considers Śarvilaka as the pivot of the plot for the release of Āryaka, the Gapāladāraka. He also construes him to be a second hero of the prakarana. He is obviously the pivot of the political plot which comprises of a revolution envisaged in terms of of a peaceful Camouflage void of any carnage in case of the teeming millions of Ujjayinī pestered under the strain of the tyranny of Pālaka who ultimately becomes a prey to the carnage at the hands of Śarvilaka and Aryaka who avenge the wrong done to Gopalaka the sire of the latter. To me, however, Śarvilaka would strike as the Primary Hero of the play in so far as Cārudatta in collusion with Vasantasenā provides hīm the pedestal of the platform from where he was to enact the show of a Political coup or else an open activity in the light of the coup could afford cues to the spies of Pālaka to sabotage the strategems being manipulated as such. Śarvilaka's appearance on the stage ought to have been casual only on occasions when a certain plan had been laid to fructification and he was required to offer indications to his loyal colleagues that he was not sleeping over the matters. At the same time we cannot preclude the possibility of his guised garb promenading through the streets of Ujjayinī like Yaugandharāyaṇa in the political events of PratijnāYaugandharayaṇa only to appear on strategic spots with a view to cautioning the leaders of various findspots." *Sarvaścāsmadvidho janastamanusarati tadahampitatsamīpam gacchāmi*"

These two expressions relating to Śarvilaka mentioned in the preceding lines, are significant. The ravishing ravage of Śakāra in Act. I suggesting the spying the spying intuition of the Villain working havoc in public sector, the fight of the gamblers calculated with a view to spotting out the secret agents of Pālaka, Darduraka's reaction to the ravaging fight and his soliloquy exposing the real character of his intention, his description of Śarvilaka as his dear friend whom persons of his standing were affording a

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

following afford me a cue to the conjecture that Vidūṣaka in the IIIrd Act of Pratijnayaugandharāyaṇa talking to himself and inviting there by Rumaṇvan and Yaugandharayaṇa must hold a compeer to Darduraka in the Mṛcchakatika while Yaugandharāyaṇa appearing on the scene on the indīcations and gestures of Vidūṣaka in the same play may bear comparison to Sarvilaka appearing on the scene of Ujjayinī in cimmerian gloom of the night with a view to breaking through the house of Cārudatta only to find access to the door of Vasantasenā through his go-between turned into a beloved Madanikā the two ladies already conniving at the incidents happening beyond their control only to afford cues to Cārudatta and Śarvilaka the former playing adjunct to the latter. There is no doubt that Śarvilaka enters the stage towards the middle of the IIIrd act but the soliloquy of ceta (Vardhamānaka) followed by the former, conversation of Cārudatta and Maitreya in the Cimmerian gloom of the nocturnal hour, the humorous jokes of the two with ceta, Ceta's handing over of the gold ornament to Vidūṣaka and Vidūṣaka's remarks after accepting the same as a deposit—

> "*Vidūṣakaḥ-(gṛhītvā) adyāpyetattiṣṭhati, Kimatro--jjayinyām Cauro' pināsti yah etaṃ dāsyāḥputraṃ nidrācauraṃ nāpaharati bhoh! vayasya! ābhyan taro-Catuśśālakan praveśayāmyenaṃ*"[13]

Subsequent sleep of Cārudatta and Vidūṣaka preceding it make it evident that the entire scene has been laid with a view to clearing the ground for the secure movement of Sarvilaka who was to survey the field of his own action for the intended coup against Pālaka or else the spies of Pālaka could wade through the streets of Ujjayinī and create obstacles-in the surreptitious movements of Śarvilaka and his allies Darduraka, Samvāhaka and others. Requiring proper security channels Śarvilaka needed the cooperation of the Chief functionaries of the body politic or else he could be spotted out by the spies of Pālaka. The intended coup against Pālaka by effecting release of Āryaka from the Jail through a breach of the fortification and by ensuring security for his life was not a simple affair. It needed a thorough thrashing out of the pros

13. Mṛcchakaṭika. III p. 100 M.R. KALE.

CC-0. Nepal Sanskrit Academy, Kathmandu Collection

